क्षस्यान्तर्गतभावं ज्ञात्वाऽब्रवीत् किमर्थं माग्निपतनमिच्छसि चिरजीव्यब्रवीत् अहं तावद्युष्मदर्थे इमामापदं मेघवर्णेन प्रा
पितः तदिच्छामि तेषां वैरयातनार्थमुलूकत्वमिति तच्छ्रुत्वा राजनीतिकुशलो रक्ताक्षः प्राह भद्र कुटिलोसि कृत्रिमवचनव
नस्त्वं तत्त्वमुलूकयोनिगतोपि स्वकीयामेव वायसयोनिं बहुमन्यसे श्रूयते चैतदाख्यानम् सूर्यं भर्तारमुत्सृज्य पर्ज
न्यं मारुतं गिरिम् स्वजातिं मूषिकी प्राप्ता स्वजातिर्दुरतिक्रमा मंत्रिणः प्रोचुः कथमेतत् रक्ताक्षः कथयति अस्ति विषम
शिलातलस्खलितांबुनिर्घोषश्रवणसंत्रस्तमत्स्यपरिपूर्णेनातिसंजनितसितफेनचूलतरंगायां गंगायास्तटे जपनियम
तपःस्वाध्यायोपवासयागक्रियानुष्ठानपरायणैः परिपूतपरिमितजलजिघृक्षुभिः कंदमूलफलसेवालाहारकदर्थितशरी
रैर्वल्कलकृतकौपीनमात्रप्रच्छादनैस्तपस्विभिराकीर्णमाश्रमपदम् तत्र याज्ञवल्क्यो नाम कुलपतिस्तस्य जाह्नव्यां स्ना राम
त्वोपस्पृष्टुमारब्धस्य करतले श्येनमुखच्युता मूषिका पतिता तां दृष्ट्वा न्यग्रोधपत्रे ऽवस्थाप्य पुनः स्नात्वोपस्पृश्य २६
च प्रायश्चित्तादिक्रियां कृत्वा तां मूषिकां तपोबलेन कन्यकां कृत्वा समादाय स्वाश्रममशिश्रियत् अनपत्यां च जा
यामाह भद्रे गृह्यतामियं तव दुहितोत्पन्ना यत्नेन संवर्धनीयेति ततस्तया पालिता लालिता च यावद्द्वादशवार्षि

कोसंजाता अथविवाहयोग्यांदृष्ट्वाभर्त्तारमेवमूचे भर्त्तः किमिदंनावबुध्यसे यथास्याः स्वदुहितुर्विवाहसमयातिक्र
मोभवति अथासावाह प्रियेमाशंक उक्तंच स्त्रियःपूर्वंसुरैर्भुक्ताः सोमगंधर्ववह्निभिः भुंजतेमानुषाःपश्चात्तस्मात्दोषो
नविद्यते सोमस्तासांददौशौचंगंधर्वाः शिक्षितांगिरम् पावकः सर्वमेध्यत्वंतस्मान्निष्कल्मषाःस्त्रियः असंप्राप्तरजागौरी प्रा
प्तेरजसिरोहिणी अव्यंजनाभवेत्कन्याकुचहीनाचनग्निका व्यंजनैस्तुसमुत्पन्नैः सोमोभुंक्तेचकन्यकाम् पयोधरैस्तुगं
धर्वारजस्यग्निः प्रतिष्ठितः तस्मादुद्वाहयेत्कन्यांयावन्नर्तुमतीभवेत् विवाहस्त्वष्टवर्षायाः कन्यायास्तुविशिष्यते व्यंज
नैर्हंतियःसर्वंपरंचैवपयोधरौ रतिः शिष्टान्तथालोकान्हन्यात्पितरंरजः ऋतुमत्यास्तुतिष्ठंत्याः स्वेच्छादानंविधीयते
तस्मादुद्वाहयेन्नग्नांमनुः स्वायंभुवोब्रवीत् पितुर्गेहेतुयाकन्यारजः पश्यत्यसंस्कृता अविवाह्यातुसाकन्याजघन्या
वृषलीमता श्रेष्ठेभ्यःसदृशेभ्यश्चजघन्येभ्योरजस्वला पित्रादेयाविनिश्चित्यपतितादोषोनविद्यते अतोहमेनांसदृशाय
प्रयच्छामि उक्तंच ययोरेवसमंवित्तंययोरेवसमंकुलम् तयोर्विवाहः सख्यंचनतुपुष्टविपुष्टयोः कुलंचशीलंचसना
थताचविद्याचवित्तंचवपुर्वयश्च एतान्गुणान्सप्तविचिंत्यदेयाकन्याबुधैः शेषमचिंतनीयम् तद्यदिस्यारोचतेतदा
भगवंतमाहूयादित्यंतस्मैप्रदीयते साप्याह कोदोषः क्रियतामितत् अथमुनिनासौवनिताअहूतस्तत्क्षणात्
देवाभ्युपगतः प्रोवाच भगवन्किमहमाहूतः सोब्रवीत् एषामदीयाकन्यकातिष्ठति त्वमुद्वहिष्यसि एवमु
क्तास्वदुहितरमुवाच प्रतिभातितेवरोयंवते एषभगवान्त्रैलोक्यदीपकः पुत्रिकाब्रवीत् तातनैनिदहनात्मि

नायर

पं.तं.तृ. कोयंनाहमभिलखामि तदस्मादन्यः कश्चिदुत्कृष्टतरस्तमाहूय अथतस्यास्तद्वचनंमुनिर्भास्करमुवाच भगवन्त्वदधिको
१७ स्तिकश्चित भास्कर आह अस्तिमदधिकोमेघोयेनाछादितोहमदृष्टोभवामि अथमुनिनामेघमथाहूयकन्यामिहि
ता पुत्रि अस्मै प्रयछामि सा आह हहा वर्णोयंजडात्मा तदस्य सकाशादन्यस्य प्रधानस्य मां प्रयछ अथमुनिना
मेघः पृष्टः भोमेघत्वदप्याधिकोस्तिकश्चित मेघेनोक्तम् मत्तोप्यधिकोस्तिवायुः अथतेनवायुराहूतः पुत्रि अस्मै
प्रयछामि साब्रवीत तात अतिचपलोयं तदस्मादप्यधिकः कश्चिदानीयताम् मुनिराह भोवायोत्वदप्य
धिकोस्तिकश्चित पवनेनोक्तं मत्तोप्यधिकोस्तिपर्वतः अथमुनिनापर्वतमाहूयकन्यामुवाच पुत्रिकस्मैत्वां
प्रयछामि सा आह तातकठिनात्मकोयं तदन्यस्मैदेहिमाम् मुनिनापर्वतपृष्टः भोपर्वतराजत्वदधि
कोस्तिकश्चित गिरिणोक्तं मत्तोप्यधिकाः संतिमूषकाः मुनिनामूषकमाहूयतस्याः प्रदर्शनं आह च
पुत्रि एष प्रतिभासते मूषकः सापितंदृष्ट्वास्वजातीय इतिमत्वा पुलकोद्भूषितशरीरा उवाच तातमांमूषिकींकृत्वा तत्
अस्मै प्रयछ येनस्वजातिविहितंकर्मानुतिष्ठामि सोपिस्वतपोबलेनतांमूषिकांकृत्वातस्मैप्रादात् अतोहं ब्रवीमि
सूर्यंभर्तारमुत्सृज्य पर्जन्यंमारुतंगिरिम् स्वजातिंमूषिकाप्राप्ता स्वजातिर्दुरतिक्रमा इति द्वादशी कथा ॥१३ रामः

अथ रक्ताक्षस्य वचनमनादृत्यैतैः स्वपक्षविनाशाय स्वदुर्गमुपनीयते सोंतर्लीनमवहस्य चिरजीव्यचिंतयत् । हन्यतामिति येनोक्तं स्वामिनो हितवादिना । स एवैकोऽत्र स-
र्वेषां नीतिशास्त्रार्थतत्त्ववित् तद्यदि तस्य वचनमकरिष्यंस्तन्नैतेषां स्वल्पोप्यनर्थोऽभविष्यत् तदेवमाह अथ दुर्गद्वारं प्राप्यारिमर्दनोऽब्रवीत् भो भो हितैषिणोऽस्य
चिरंजीविनो यथाभिमतं स्थानं प्रयच्छत तच्छ्रुत्वा चिरंजीवी व्यचिंतयत् मया तावदेषां वधोपायश्चिंतनीयः स च मध्यस्थेन न साध्यते यतो मदीयमिंगिता-
दिकं विचारयंतस्तेपि सावधाना भविष्यंति तत् दुर्गद्वारमेवाश्रितोऽभिप्रेतं साधयामीति निश्चित्य उलूकपतिमाह देव युक्तमिदं यत्स्वामिनाभिहितम् परमहमपि नी-
तिज्ञस्ते हितश्च तद्यद्यप्यनुरक्तः शुचिस्तथापि दुर्गमध्ये आवासो नार्हः तदत्रैव दुर्गद्वारस्थः प्रत्यहं भवत्पादरजः पवित्रीकृततनुः सेवां करोमि तथेति प्रतिपन्ने प्रति-
दिनं ते उलूकपतिसेवकाः प्रकामाहारं कृत्वा उलूकराजादेशात्प्रकृष्टमांसाहारं चिरंजीविने प्रयच्छंति अथ कतिपयैरेवाहोभिर्मयूर इव स बलवान्संवृत्तः अथ
रक्ताक्षः चिरंजीविनं पोषमाणं दृष्ट्वा सविस्मयो मंत्रिजनं राजानं च प्राह अहो मूर्खोयं मंत्रिजनो भवांश्चेत्येवमहमवगच्छामि उक्तं च पूर्वं तावदहं मूर्खो द्विती-
यः पाशबंधकः ततो राजा च मंत्री च सर्वं वै मूर्खमंडलम् ते प्राहुः कथमेतत् रक्ताक्षः कथयति अस्ति कस्मिंश्चित्पर्वतैकदेशे महान्वृक्षः तत्र च कोपि
पक्षी प्रतिवसति यस्य पुरीषे सुवर्णमुत्पद्यते अथ कदाचित्तमुद्दिश्य व्याधः कोपि समायातो स च पक्षी तदग्रत एव पुरीषमुत्स-
र्जे अथ पातसमकालमेव तत्सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत् अहो मम शिशुकालादारभ्य शकुनिबंधव्यसनिनोऽशीतिवर्षाणि
समभूवन् न च कदाचिदपि पुरीषे सुवर्णं दृष्टमिति विचिन्त्य तत्र वृक्षे पाशं बबंध अथासावपि पक्षी मूर्खो विश्वस्तचित्तो यथापू-
र्वमुपविष्टस्तत्कालमेव पाशेन बद्धः व्याधस्तं पाशादुन्मुच्य पंजरे संस्थाप्य निजावासं नीत्वा चिंतयामास किमनेन सापायेनाहं

पं.तं.त केरिष्यामीति यदि कदाचित्कोपि स्तनमीदृक्षं ज्ञात्वा राज्ञो निवेदयिष्यति नूनं मम प्राणसंशयोपि स्यात् ततः स्वयमेव पक्षिणं राज्ञो निवेदयामीति वि-
१८ चार्य्य तथैवानुष्ठितवान्। अथ राजापि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमलः परां तुष्टिमुपागतः। आह च हं हो रक्षकपुरुषाः एनं पक्षि-
णं यत्नेन रक्षत अन्नपानादिकं यथेष्टं प्रयच्छत। अथ मंत्रिणाभिहितं किमनेन अश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेनांडजेन
किं कदाचित्पक्षिपुरीषे सुवर्णं भवति तन्मुच्यतां बंधनपंजरादयं पक्षी इति मंत्रिवचनात् राज्ञा मोचितो सो पक्षी उच्चतद्वारतोरणे समु-
पविश्य सुवर्णमयीं विष्ठां विधाय पूर्वं तावदहं मूर्ख इत्यादि श्लोकं पठित्वा यथासुखमाकाशमार्गेण प्रायात्। अतोहं ब्रवीमि।
पूर्वं तावदहमित्यादि वयोस्त्री कथा। अथ ते पुनरपि प्रतिकूलदैवतया हितमपि रक्ताक्षवचनमनादृत्य भूयस्तं [illegible]
सादरं विविधाहारेण पोषयामासुः। अथ रक्ताक्षः स्ववर्गानाहूय रहः प्रोवाच भो एतावदेवास्मद्भूपतेः कुशलं कुलं च ततु-
पदिष्टं मया यत्कुलक्रमागतः सचिवोभिधत्ते तदुद्यमन्यत्पर्वतदुर्गं संप्रति दुर्गमाश्रयामः। उक्तं च। अनागतं यः कुरु-
ते स शोभते विनश्यते यो न करोत्यनागतम्। वनेवसन्नेव जरामुपागतो बिलस्य वाचा न कदापि मे श्रुता॥ ते प्रोचुः कथमेतत् रक्ता-
क्षः कथयति। अस्ति कस्मिंश्चिद्वनोद्देशे खरनखरो नाम सिंहः। स कदाचिदितश्चेतश्च परिभ्रमन् क्षुत्क्षामकंठो न किंचिदपि सत्त्व-
मासादितवान्। ततोस्तमये महतीं गिरिगुहामासाद्य प्रविश्य चिंतितवान्। नूनमस्यां गुहायां केनापि सत्त्वेन रात्रावागंतव्यं। राम:
तन्निभृतो भूत्वा तिष्ठामि। एवं तस्य तत्र स्थितस्य तत्स्वामी दधिपुच्छो नाम शृगालकः समायातः। स यावत्पश्यति तावत्सिंह- १८
पदपंक्तिर्गुहायां प्रविष्टा न च निष्क्रमणं गता। ततश्चाचिंतयत् अहो विनष्टोहमस्मीति। नूनमस्यां अंतर्गतेन सिंहेन भाव्यं

तत्किं करोमि। कथं गच्छामि एवं विचिंत्य द्वारस्थः फूत्कर्तुमारब्धः। अहो बिल अहो बिल इति प्रोक्त्वा भूयोप्यभाषत भोः किं न वेत्सि त्वयास्मह ने
समयधर्मोस्ति। तिमया त्वं बाह्याद्यागतेन त्वयाहमाकारणीयः तद्यदि मां नाह्वयसि ततोहं द्वितीयं बिलं यास्यामि। तियो मामाह्वास्य
ति। सिंहोपि तच्छ्रुत्वा चिंतितवान् नूनमेषा गुहास्यागतस्य सदाह्वानं कुरुते साद्य मम भयान्न किंचिद्ब्रूते अथवा साध्विदमुच्यते भयसंत्र
कंपः स्तमनसां हस्तपादादिकाः क्रियाः प्रवर्तंते न वाणी च वेपथुश्चाधिको भवेत्। तदहमप्यस्याह्वानं करोमि येन प्रविश्य मम भोज्यतां याति।
इत्येवं संप्रधार्य तस्याह्वानमकरोत्। अथ सिंहशब्देन सा गुहा प्रतिरवसंपूर्णा अन्यानपि दूरस्थान् सत्वान् त्रासयामास गोमांतकोपि
पलायनपर इमं श्लोकमपठत् अनागतं यः कुरुते स शोभते स शोच्यते यो न करोत्यनागतम् वनेत्र संस्थस्य समागता जरा बिलस्य वाणी न क
दापि मे श्रुता। इति चतुर्दशी कथा भीमया अंगीकृतं तद् उत्तिष्ठ आगम्यतां यथा तत्कालोचितं भवति तत्क्रियतामिति स अंतर्विहस्याह
हे देवा किं पंडुनाप्यर्थं जल्पितेन मदीयकुलीनतां फलेन शास्यतीति तच्छ्रुत्वा वक्रनाशः आह भो विनष्टको शिक [illegible] जगत
केस्य कथ्यते उक्तं च यतः दोषमर्जनं कृत्स्नं पार्थिवाय निवेदयेत् यदस्या ह्यप्यवान्य पक्षदाकर्त्तां निवेदयेत् एवमनाद्दत्स
चिरजीवी विनमादाय शनैः रक्तचतुर्गो मासत्यास्त्रष्टुं कपातिः चिरजीवी अप्यति दुर्गो विषमता मालो स्वविचिंतितवान् वध्य
तामिति यनौ कः स्वामीमो प्रति संपतवाणी नीति तत्राहतश्च अन्यपनर्म्मे ६ तमाः स्वामि नास्य अथ तेउलूकास्तेनोलूकप
तिनोक्ताः अहो चिरंजीविनामद्रूत रस्माश्रयसमर्पणीयमिति तच्छ्रुत्वा चिरंजीवी प्रावितयत् मयातावदेतेषां वधोपायो
विचिंत्यः समयाम [illegible] प्रतेन न भविष्यति एतोपि सावधाना भविष्यंति। तदहं दुर्गद्वारमाश्रयामि येनात्र स्थितोऽभि
प्रेतं करोमि तत्रापि [illegible] समाह देव युक्तं तवेतान् परमहमपि वनीतिलोहितश्च यद्यपि तथाप्य रकाः शुनायस्त

पं.तं.त. यापि दुर्गमध्ये न वासोऽर्हः अहमत्रैव दुर्गद्वारस्थितः सेवा भक्तिं करिष्यामि तथानुष्ठिते वक्रनाशः स्ववर्गानाहूय प्रोवाच भो एतावंत
१९ स्थ्येन देवमन्वासयासंतोमाप्तामिमिति तदभिधाय सपरिजनोऽन्यदेशं वक्रनाशो गतः अथ वक्रनाशे गते स्थिरजीव्यचिंतयत् अहो
कल्याणमस्माकमुपस्थितं यद्वक्रनाशो दीर्घदर्शी गतः तदेतेषां हतमानां सुवध्यानमेव जाता उक्तं च यतः न दीर्घदर्शिनो ये
स्युर्मंत्रिणः स्युर्महीपतेः क्रमायाताध्रुवं तस्य न चिरात्स्यात्परिक्षयः अहो साध्विदमुच्यते मंत्ररूपा हि रिपवः संभाव्याः स्युर्वि
चक्षणैः ये सन्तं नयमुत्सृज्य सेवन्ते प्रतिलोमतः एवं व्यचिंतयत् नित्यं स्वकुलाये वनकाष्ठिकामेकैकां प्रक्षिपति दिने गुहा
प्रदीपनार्थं न च ते उलूकाः मूर्खा विजानंति यदेतं कुलायमस्माकं दाहोत्पादनाय वृद्धिं नयति अथवा साध्विदमुच्यते अमित्रं कुरु
ते मित्रं मित्रं द्वेष्टि हिनस्ति च शुभं वेत्त्यशुभं पापं भद्रं दैवहतो नरः तथा च क्रीतानपाशवद्धानां दैवापहतसाम अक्रमं कुर्व चेत
ग्रामिण्या भवंति महतामपि अथ प्रभूतेन कुलायव्याजेन धनकुटीद्वारे संजाते सूर्योदयेऽन्धतां प्राप्तेषूलूकेषु स्थिरजीवी
ह्नविचिंत्य शीघ्रं गत्वा मेघवर्णमाह स्वामिन् मया सज्जीकृता दाहसाध्या मया रिपुगुहा तत्सर्वैः परिवारैः सहागतैस्त्वमेहि
एकैकां वनकाष्ठिकां ज्वलंतीं प्रगृह्य त्वं सर्वैर्वायसैस्तत्र गुहाद्वारे अस्मिन्कुलाये प्रक्षेप्तव्यं येन शत्रूणां कुंभीपाकन्या
यो भवति तच्छ्रुत्वा प्रहृष्टो मेघवर्णोऽप्याह तात तत्कथयात्मवृत्तांतं चिरात् दृष्टोऽसि स आह वत्स नायं कालो वक्तव्य राम
स्य कदाचित्तस्य रिपोः प्रणिधिः समागमनं निवेदयिष्यति तत् ज्ञानाद्धोप्यन्यत्र शरणं करोमि तत्त्वर्यताम् उ १९
क्तं च यतः शीघ्रकृत्यस्य हि कार्यस्य फलस्य विशेषतः क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् तद्दहायाति

सर्वबाधे

शत्रोः सर्वं विस्तरं निर्वाकुल नया कथयिष्यामि अथासीत् लदाकर्णपसपारजनस्यैकां यच्छिकां चलंती वंचागोरपरही। त्यातकुहाडू
रंध्राप्यविरजीवीकुलायप्रक्षिपत नरत्नेसर्वे दिवौधावञ्कनाशस्य याकानिस्सरेणोगुहामध्येकुंभी पाकस्यापमापन्नाः इति। एवंसशत्रु
निःशेषतानीत्वामध्यवर्णोन्यपिनमेवन्यग्रोधपादपदुर्गंगतः अभूदितमनाःस्कपवोपाविहः स्वभामध्येविरजी विनमप्रभुतता
तकथंयकथंत्वयाशत्रुगृहगतेनकालानीतः योनकमस्माकं वर्त्ततेकथ्यतामिति यतः वरमेनोप्रदीप्तेपिप्रयातः पुत्रपुत्रकायेणा
म नवारिजनसंसर्गोप्रहत्तेमपिसेवितः तदाकर्णसमोप्रवीत वत्स आगामिकफलबांछयाकष्टमपिसेवाद्भुनेशापेत उक्तंच यतः
उपजनितमयेवीयोमार्गोहितार्थकरोभवेत ससनिपुणःवायुप्रासेव्योमहामूकपुत्तोपिवा करकरणनिभोज्यादीनाकोमहा
स्त्रविशारदो रसिनवलयामश्रीवद्धोकरोतिकिकीटिना अन्यच्च शक्तेनापिसनाजनेनाविदुषाकालांतरप्रेक्षिणा हसत्वर्यं
वज्रपातविषमन्दुम्पिपापजने दवीप्रयच्छकरताहमस्तक्लिनेनायामसपुकेनाकिमीनीमिनानिवलनमत्स्यभुवलनेपावत्त्वया
दितान अथच सिद्धार्थयताजनेनाविदुषातेजनिगदधस्यकसत्वात्साहवतापिदेवगीतहस्थैर्यप्रकायेवुधैः देवेंद्रद्रवि
णापमेयंकृतवोरम्भावतिनोत्यात्मभिः किं द्विक इः सावरविराटभवनेपूर्वं नधर्मोन्मत्तः ब्रह्मानक्षत्रविषमपातितः साधुभिरगादि
तंतत्कालापलीहृदयानिहतंबुद्धिमान्कर्म कुर्यात् किंगतो वसुकरहुत्सगणास्काजनहररणपालितोसीहृद्लीलानदनाविलसन्को
खलः सांक्तसावी अन्यच्च रूपाभिजनसंपन्नोमाद्रिपुत्रोवलान्वितो गोकर्मसंश्वाधमापारेविराटग्रहस्यसतांगतो [illegible]
प्रतिमनयावनगतोश्वत्थकुलजन्मनागतव्यानिदन्नानिदेववशातोमयाधनंचोहृतो सैरंध्रीतिविभाव्यद्
तितिभिः सासेपमा [illegible] यादोपयाकिलमत्स्यराजभवनेघ्रष्टंनाकं वंदनम् तदैवयाविष्णोभवतिस्यो पत्नांतरमपि

पं.तं.त्र हरित्वा कार्यं साधयति उक्तं च यतः सहते सुहृदपि हत्वा ग्राह्यः शक्तिक्षये निराकारम् कालं प्रतीक्षमाणाः क्षीणे निष्ठुरो हितता श

२० क्तिः तत्किं बहुना ... क्रमयामूर्खं सुमेदायो दृष्टो मुक्तो केवलं क्रकनाशो तेन च पुनः सर्वो ममाभिज्ञायो ज्ञातो तानि वेदनं हस्तस्वामि

मिने तत्श्च तस्य वचनेन करुणाद्गुणस्य पाति परित्यक्त्वा सपरिजनो गतः शेषामंत्रिणः स्वामिनास्मत्तत्रैव विनष्टाः अथवा सा

ध्विदमुच्यते संतापयंति कमपथ्यभुजं न रोगा दुर्मंत्रिणं क उपयांति न नीतिदोषाः कं श्रीर्न दर्पयति कं न निहंति मृत्युः

कं स्त्रीकृता न विषयाः परिपीडयंति मद्यस्य नश्यति यशो विषमस्य मैत्री नष्टक्रियस्य कुलमर्थपरस्य धर्मः विद्याफ

लं व्यसनिनः कृपणस्य सौख्यं राज्यं प्रमत्तसचिवस्य नराधिपस्य वाचितं च क्रकनाशेन गच्छता तस्य भोस्वामिन्निवेदयितामे

पश्चिमसंदेशं शत्रुभ्योऽभ्यागतोऽयं त्वः शत्रुसंवासतत्परः विकारहेतुर्विज्ञेयो न च तस्य त्वविश्वसेत् आसनेन शयनेन या

नेपानेवा भोजनेन तथा किंचिच्छिद्रं समासाद्य तेऽकुर्वंति विपताम् तस्मात्सर्वप्रयत्नेन त्रिवर्गो निलयं बुधः आत्मो

नमावृत्तो रक्षेत्प्रमादाद्धि विनश्यति इत्युक्त्वा वक्रनाशः सपरिजनो गतः अथ स मृतिं तेषामपमानमपि सम्मानरक्षन्

नरश्चेदी वैतानि तदिनानि यावत्स्थितः उक्तं च यतः अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः स्वार्थमालंबयेत्प्रा राम

ज्ञः स्वार्थभ्रंशो हि मूर्खता स्कंधेनापि वहेच्छत्रुं यावत्कार्यं न सिद्धति महता कृष्णसर्पेण मंडूका बहवो हताः

मेघवर्ण आह कथमेतत् चिरंजीवी कथयति अस्ति कस्मिंश्चित्प्रदेशे परिणतवयाः मंदविषो नाम कृष्णसर्पः २०

स एवं चिंतितवान् मर्थिननाम कथं नाम मया सुखोपपत्त्या वृत्तिर्विधेया ततोऽसौ बहुमंडूकं हृदमुपगम्य धृति

पि। तमियात्मानं दर्शितवान् अथ तथास्थितेन तेन मित्र उदकप्रांतगतेन केन मंडूकेन दृष्टो भणितश्च किमद्य यथापूर्वमाहारार्थं न विहरसि
सोऽब्रवीत् भद्र कुतो मम मंदभाग्यस्याहाराभिलाषः यत्कारणं अद्य रात्रौ प्रदोषे एव मया आहारार्थं विहरमाणेन दृष्टो मंडूकः तद्ग्रहणा
र्थं मया क्रमः संज्ञितः सोऽपि मां दृष्ट्वा मृत्युभयेन स्वाध्यायप्रसक्तानां ब्राह्मणानामंतरेऽपक्रांतो न भावितो मया क्वापि गतः ततस्तत्सादृश्यमोहि
तचित्तेन मया कस्यचिद्ब्राह्मणस्य सूनोर्ह्रदतटजलांतःस्थस्यांगुष्ठो दष्टः ततस्तस्य दोषेण त्वं मंडूकानां वाहनो भविष्यसीति एतत्तेन मंडूकानामा
वेदितं ततस्तैः प्रहृष्टमनोभिः सर्वैरेव गत्वा जलपादनाम्नो दर्दुरराजस्य विज्ञप्तम् अथासावपि मंत्रिपरिवृतोऽत्यद्भुतमिदमिति मन्य
मानः ससंभ्रमं मंडूकादुत्तीर्य मंदविषस्य फणाप्रदेशमारूढः शेषाश्चापि यथाज्येष्ठं तत्पृष्ठोपरि समारूढाः किं बहुना तदुपरि स्था
नमप्राप्नुवंतस्तस्यानुपदमेव धावंति मंदविषोऽपि तेषां तुष्ट्यर्थमनेकप्रकारान् गतिविशेषानदर्शयत् अथ जलपादो लब्धतद
गसंस्पर्शसुखस्तमाह न तथा करिणा यानं तुरगेण रथेन वा नरयानेन वा यानं यथा मंदविषेण मे अथान्येद्युर्मंदवि
षः छद्मना मंदं मंदं विसर्पति तच्च दृष्ट्वा जलपादोऽब्रवीत् भद्र मंदविष यथापूर्वं किमद्य न साधु उह्यते मंदविषोऽब्रवीत् देव आहा
राभावान्न मे वोढुं शक्तिरस्ति अथ सोऽब्रवीत् भद्र भक्षय क्षुद्रमंडूकान् तच्छ्रुत्वा प्रहर्षितसर्वगात्रो मंदविषः ससंभ्रम
मब्रवीत् ममायं विप्रशापोऽस्ति तत्त्वानेनानुज्ञावचनेन प्रीतोऽस्मि अथासौ नैरंतर्येण मंडूकान् भक्षयन् कतिपयैरेवाहोभिर्ब
लवान्संवृत्तः प्रहृष्टश्चांतर्लीनमवहस्येदमब्रवीत् मंडूका विविधा ह्येते छलपूर्वोपसाधिताः कियंतं कालमक्षीणा भवेयुः खा
दतो मम जलपादोऽपि मंदविषकृतकवचनेन व्यामोहितचित्तः किंचिदपि नावबुध्यते अत्रांतरे अन्यो महाकायः कृष्णसर्पस्त

पं.तं.२ प्रदेशमागतः स च मंडूकेनोपविष्टमानं दृष्ट्वा विस्मयमगमत् आह च वयस्य कस्मात् कमलभूतैर्वाह्यसेविरू द्रमेतत् मंदविषोऽब्रवीत् सर्वमेतद्दु
२१ तानामिय यथावाद्यो स्मिन्द्वरैः किंचित्कालं प्रतीक्षोहं दृष्ट्वा तो धोब्राह्मणो यथा सोऽब्रवीत् कथमेतत् मंदविषः कथयति अस्ति कस्मिं
श्चित्स्थाने मंदविषो नाम ब्राह्मणः तस्य भार्या पुंश्चली अन्यासक्तमना अजस्रं विहाय स्वखंडछुन्नरूपा कृत्वा भर्तुर्घृतशर्करायात्रयाचं
ति अथ कदाचिद्दृष्ट्वा भर्त्रा ... किमेतत्त्वया रिपच्यते कुत्र वा अजस्रं नयसि कथय सत्यं सा चोत्पन्नप्रतिभा कृतकव
चनैर्भर्तारमब्रवीत् अत्रानतिदूरे भगवत्या देव्या आयतनं तत्राहं उपोषिता सती बलिं भक्ष्यविशेषांश्चापूर्वान् नयामि अथ तस्य
पश्यतो गृहीत्वा देव्यायतनाभिमुखी प्रतस्थे यत्कारणात् देव्या निवेदितेनानेन मदीयो भर्ता एवं मन्यते यन्मम ब्राह्मणी भगव
त्याः कृते भक्ष्यविशेषान्नित्यमेव नयतीति अथ देव्यायतने गत्वा स्नानार्थं नदीमवतीर्य यावत्स्नानक्रियां करोति तावद्भर्तापि मा
र्गान्तरेणागत्य देव्याः पृष्ठतो ऽदृष्टो व्यवतस्थे अथ सा ब्राह्मणी स्नात्वा देव्यायतनमागत्य स्नानविलेपनधूपबलिक्रियादिकं
कृत्वा देवीं प्रणम्य व्यजिज्ञपत् हे भगवति केन प्रकारेण मम भर्ता अंधो भविष्यति तच्छ्रुत्वा स्वरभेदेन देवीपृष्ठस्थितो ब्रा
ह्मणो जगाद यदि तस्य त्वमजस्रं घृतपूरादिकं प्रयच्छसि ततः शीघ्रमंधो भविष्यति सा तु बंधकी कृतकवचनवञ्चितमानसा
तस्मै ब्राह्मणाय तदेव नित्यं प्रददौ अथान्येद्युर्ब्राह्मणो नाभिहितं मंदलाहं स्फुटं न पश्यामि तच्छ्रुत्वा चिंतितं त्वयैत एवः
त्प्राप्तं देवीप्रसादो यं जात इति अथ तस्या हृदयवल्लभो विटस्तत्सकाशमंधीभूतोयं ब्राह्मणः किमस्य करिष्यतीति निः
शंकः प्रतिदिनमभ्येति अथान्येद्युस्तं प्रविशंतमभ्याशागतं दृष्ट्वा केशेषु गृहीत्वा लगुडपार्ष्णिप्रहारैस्तावदताड २१

पत यावदसौ पंचत्वमापन्नस्तावन्मया पुष्पपल्लीच्छिन्ना नासिकां छित्वा विससर्ज अतोहं ब्रवीमि सर्वमेतद्धि जानामीति पंचदशी कथा
अथ मंदविसर्पिणी तल्पीं नमत्कुणस्य पुनरपि मंडूकाधिपविविधोद्यत इति तदेवाब्रवीत अथ जलपादस्तत्कृत्वा स्फुततरामाविस्मयहृदयः किमने
नाभिहितं इति तमस्तं तत्र भद्राकं त्वयास्माभिर्हितं इदं विरुद्धं वक्तः अथासावाकारप्रच्छादनार्थं नर्किं विदित्वा ब्रवीत तथैवैतत्कवचन
यामभिहितविलीजलपादस्तस्य दुष्टाभिसंधिनावगुप्ततो किं बहुना तथाते सर्वे पि भासिताः यथा वीजमा गर्मापि नावशिष्टे अतो
हं ब्रवीमि स्कंधेनापि वहेच्छत्रुं यावत्कार्यं नास्य भूतीति षोडशी कथा यथा राजन्मंदविषेण वृद्धबलेन मंडूकानिहतास्तथा
मयापि सर्ववैरिगणाइति अथवासाधिदमुच्यते वनवह्निलिताः दहत्ययानि रस्याति समूलोन्मूलनं कुर्यात्सुवायुस्तु
शीतलः मेघवर्णो ब्रवीत तातसत्यमेवैतत् यमहात्मानो भवतितेमहासत्वा आपद्गता अपि प्रारब्धं नत्यजंति उक्तं चयतः न
हत्वमेतन्महतां नयालंकारमारिणाम नमुं चंति यदारब्धं प्रारेषिव्यसनोदये तथा च प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रार
भ्य विघ्नविहता विरमंति मध्याः विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारभ्यमुत्तमगुणा न परित्यजंति तत्कृतं निष्कंटकं मम
राज्यं शत्रुन्घ्नता अथवा युक्तमेतत उक्तं च यतः ऋणशेषमग्निशेषं रिपुशेषं तथैव च व्याधिशेषं वानिःशेषं कृत्वा प्रा
ज्ञो न सीदति तन्नास्ति त्वत्समो न्यो बुद्धिमान्मंत्री येन रुद्धक्रमोपायेन विनापि क्रमात्पुरुषमाहताः अथवासाधिदमुच्यते
शस्त्रहता रिपुजना न हता भवंति प्रज्ञाहतास्तु नितरां सुहता भवंति शस्त्रानि हंति पुरुषस्य शरीरमेकं प्रज्ञा कुलं च विभवं च
यशश्च हंति चिरंजीवी प्राह तद्ध प्रतापप्रभवो यस्य विघ्नहृदि स्त्रवर्क वपुत्तत्त्पानं नमात्रे उक्तं च यतः प्रसे
रति मतिः कार्यारंभे दृढा भवति स्थिराव स्थ सहाय सुपस्यतः फलति विनयवाले क्लफलमत्यं सत्यं समुन्न

पं.तं.तृ. तिमप्रकृतेर्भवति वरभिः प्राग्ये कृत्येन रस्य भविष्यतः तवमात्रो भविष्यता बुद्धिविपर्यासेन मयाज्ञाता यो वित्ताभ्यर्थिनि कुतु
२२ घाणां भविष्यतां प्यवहाद्देवजानाति उक्तंचयतः वांछेवस्यवयति सर्वेन संभाविष्यं पुंसोन्यजन्मस्फकनेयादिवे हरन्त्र वि
क्षायते शिशुरजातकलापाविद्धः प्रत्यकूपदैः परिसरन्सरसः कलापी। तद्यस्याविधिः सन्तुरवोभवति सत्वभिवद्धुधासिपन्नो
भवति उक्तंचयतः नदेवाः शस्त्रमादायरक्षन्तिरिपुवत्कुधा यंतु ते हंतुमिच्छंति बुद्ध्या विश्लेषयंतितम् वृद्धो कलुषम्
तायां विनाशे समुपस्थिते अनयोपि नयो भाति सर्वदा अमेध्यदोहनाम यथा तवारिपोः संजाता तथा च नयेत्यागशोध्यसंघ
ने पुरुषे राज्यमिति उक्तं च त्यागिनि शूरे ताविदुषि संसर्गरुजे नागुणी भवति गुणवति धनं धनाच्छ्रीमान्श्रियाया त्याग
स्ततो राज्यं राज्याच्छ्री मत्याज्ञा मेघवर्णी आह नूनं सत्यफलानि नीतिशास्त्राणि यत्त्वयानुकूल्येनानुप्रविश्यारिमर्द
नः सपरिजनउछितः चिरञ्जीव्याह नीतोपायमेवाश्रित्य गम्यो पि यार्थस्तत्प्रयत्ने संप्रयः साधुयुक्तः उक्तंचाग्रः
आग सारभूतो वनानां मानां भ्यर्च्यं छित्वेतेपाद पेऽस्थि अथवा स्वामिन्कितेनाभिहितेन यदनंतरकालं क्रियारहितमस्तुव
साधुर्यो भवति साधु यदनुष्ठ्येते अनिश्चितेर व्यवसायभीरुभिः फलैर्विसंपादमुपागता गिरः प्रयाति लोके परिहा
स्यवस्तुतां न वलघुष्वपि कर्तव्येषु बुधैर्भर्तृरप्यनादरः कार्यः शक्नुमि यत्कुर्विदमल्पमयत्नसाध्यमिचादरः कर्तुमि कम
क्रत्यस्योपेक्ष्यमाणः किंचित्प्रमत्तमनसः परिभायदुःखमापत्त्यसंग्रमस्त्रभंगरूवाः प्रयान्ति तद्यथाजिहतारिसं २२
द्विषो यथापूर्वं निद्रालाभो भविष्यति उक्तं चेतत्र निःसर्पे बद्धसर्पे वा भवनेसूप्यते सुखं सदा दृष्टभुजंग

तुनिद्रासुखेन लभ्यते तथा च विस्तीर्णव्यवसायसाध्यमहतां स्निग्धैः प्रभुक्ताशिषं कार्याणां नैव साहसोन्नतिमतामिच्छापदारोपि
णाम् मानोत्कटकपराक्रमव्यसनिनः पारं न यावद्गताः सामर्षहृदये वेकैव विषयास्तावत्कथं निर्वृतिः तदद्य स्थिरकार्य्यारंभस्य वि
श्राम्यतो मे च हृदयम् तदिदमधुना निहतकंटकं राज्यं प्रजापालनतत्परो भूत्वा पुत्रपौत्रादिक्रमेण वल्लभ यासनं श्रियं भुंक्ष्व:
अपि च प्रजानरंजनेन सुतरां राजा रक्षादिभिर्गुणैः अज्ञागलस्तनस्येव तस्य राज्यं निरर्थकम् गुणोपरागो व्यसनेषु नादरो रतिः
स्वभृत्येषु च यस्य भूपतेः चिरं स भुंक्ते चलचामरांशुकां सितातपत्राभरणां नृपश्रियम् न च त्वया प्राप्तराज्योऽस्मीति मत्वा
श्रीमदेनात्मा व्यसने योजयितव्यः यत्कारणं चला हि राजविभूतयः वंशारोहणमिव राज्यं लक्ष्मीर्दुरारोहा क्षणेन निपात
रतं प्रयत्नशतैरपि धार्य्यमाणा दुर्द्धरा स्वभावाधिष्ठितापि प्रलंभिनी वनराजीरिव अनेकचित्रा पद्मपत्रोदकमिवा
घटितसंश्लेषा पवनगतिरिवातिचपला अनेकसंगतिभिकाऽस्थिरा आशीविषवद्बहुरूपचारा संध्याभ्रलेखेव मुहू
र्त्तरागा जलबुद्बुदावलीव स्वभावभंगुरा शरीरप्रकृतिरिव कृतघ्ना स्वप्नलब्धराशिरिव क्षणदृष्टनष्टा अपि च
यदेव राज्याभिषेके क्रियतेऽभिषेकस्तदेव बुद्धेर्व्यसनेषु योऽपा घटा कुराज्ञामभिषेककाले सहांभसैवापदमुद्गिरंति न
च कश्चिदनधिगमनीयो नामास्त्यापदाम् उक्तं च रामस्य व्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं वृष्णीनां निधनं
नलस्य नृपते राज्यात्परिभ्रंशनम् नाट्याचार्यकमर्जुनस्य पतनं संचिन्त्य लंकेश्वरे सर्वं कालवशाज्जनः सहते
कः कं परित्रायते दशरथः स्वर्गीं गतो नाभवत् ... दतः कृतसज्जलनिधेर्वेलां वधोऽमतः सगरस्तथा ... सक

श्रीरामो जयति

पं.त. रक्तलोचनं तीर्थेऽपि कस्सर्येनतुर्मनर्नेजवलवताकालेनेते प्रबोधानिमीलिता: अपिच मांधाताधगतस्त्रिलोकोवि

२ धीतरा अक्रमसत्यव्रतो देवानां । नृपातिम्रो सर्वविवास्ताः प्रमदास्तास्तिकाननं ब्रह्मानिसन्दते वनाश्च तानिवक्रतानंदृष्टा

निनष्टानि एवंमत्वा करिकर्णावलोराज्यलक्ष्मीमवाप्यन्यायेकनिष्ठो भूत्वाऽपभुंक्ष्व इतिसमाप्तदर्पीकथा ॥ ७ ॥ ६

लिखितकशर्मणाकृते पंचतंत्राख्ये नीतिशास्त्रे संधिविग्रहादिगुणादुपसंयुक्ते काकोलूकीयं नाम तृतीयतंत्रं समाप्त

म् शाके १६७० कार्तिककृष्णपक्षे शनौ मध्याह्ने लिखितं देवकीनंदनेन शुभमस्तु श्रीरामार्पणमस्तु श्रीः ९

राम:

५३

ॐ श्री ॥ अथेदमारभ्यते लब्धप्रणाशं नाम चतुर्थं तंत्रम् ॥ यस्यायमाद्यः श्लोकः ॥ प्राप्तमर्थं तु यो मोहात्संधानैः प्रतिमुंचति स तदा वंच्यते मू
ढो मकरः कपिना यथा ॥ राजपुत्रा ऊचुः कथमेतत् ॥ विष्णुशर्माब्रवीत् ॥ अस्ति समुद्रोपकण्ठे महान् सदाफलो जंबूपादपः तत्र रक्तमुखो
नाम वानरः प्रतिवसति स्म ॥ अथ कदाचित्तस्य तरोरधस्तात् समुद्रसलिलान्निष्क्रम्य विकरालमुखो नाम मकरः सुकोमलबालुका
सनाथे तीरोपांते न्यविशत् ॥ ततश्च रक्तमुखेन प्रोक्तो भवानतिथिस्तद्भक्षय मया दत्तान्यमृततुल्यानि जंबूफलानि ॥ उक्तं च ॥
प्रियो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा ॥ वैश्वदेवांतमापन्नः सोऽतिथिः स्वर्गसंक्रमः ॥ न पृच्छेच्चरणं गोत्रं स्वाध्यायं देशमेव च ॥
अतिथिं वैश्वदेवांते श्राद्धे च मनुरब्रवीत् ॥ दूरादागतं पथि श्रांतं वैश्वदेवांतमागतम् ॥ अतिथिं पूजयेद्यस्तु स याति परमां ग
तिम् ॥ अन्यच्च ॥ अपूजितोऽतिथिर्यस्य गृहाद्याति विनिःश्वसन् ॥ गच्छंति विमुखास्तस्य पितरः सह दैवतैः ॥ एवमुक्त्वा जंबूफला
नि तस्मै प्रददौ ॥ सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वगृहमगात् ॥ एवं नित्यमेव तौ वानरमक
रौ जंबूच्छायास्थितौ विविधशास्त्रगोष्ठ्या कालं नयंतौ सुखेन तिष्ठतः ॥ सोऽपि मकरो भक्षितशेषाणि जंबूफलानि गृहं गत्वा प
त्न्याः प्रयच्छति ॥ अथ तया कदाचित्स पृष्टः ॥ नाथ एवंविधान्यमृतफलानि क्व प्राप्नोषि ॥ सोऽब्रवीत् ॥ भद्रे मम
अस्ति सुहृद्रक्तमुखो नाम वानरः ॥ स प्रीतिपूर्वमिमानि फलानि प्रयच्छति ॥ अथ तयाभिहितम् ॥ तस्य हृदयममृतमयं
भविष्यति ॥ तद्यदि मया भार्यया प्रयोजनं तत्तस्य हृदयं मे प्रयच्छ येन तद्भक्षयित्वा जरादिरहिता त्वया सह क्रीडामि ॥
मकरोऽब्रवीत् ॥ भद्रे तावदेकं प्रतिपन्नो भ्रातासौ अस्माकं अपरं फलदाता ॥ ततो व्यापादयितुं न शक्यते ॥ तत्त्यजैनं मिथ्या
ग्रहम् ॥ उक्तं च ॥ एकं प्रसूयते माता द्वितीयं वाक् प्रसूयते ॥ वाग्जातमधिकं प्रोचुः सदा सोदरवद्बुधाः ॥ साब्रवी

२ एकादशे पूर्णितकत्रहं

पं॰तं॰ ४ न त्वया सह वर्त्तनान्यथा कदापि तत्तन्नूनमेषा वानरी भविष्यति तदनु रागात्त्वं सकलभूपविदिनं गमयसि ततो मे वांछितं न प्रयच्छसि यतः
१ कारणान्मया सह संगमे प्राप्ते रात्रौ प्राप्तो कृतवह ज्वालासमं प्राकुलोसि कंठाश्लेषं चुंबने च शिथिलतामालंबसे तन्नूनं भवद्हृदयका
चिन्महिला स्थिता अथासौ स्वपत्न्याः पुरतः स दीनमाह मा किं त्वत्पादपतितो किंकरत्वमुपागते त्वं प्राणवल्लभे कस्मात्कोपनेको
पेमख्पसि सापि तद्वचनमाकर्ण्याश्रुप्लुतमुखी तमुवाच साकं मनोरथशतैस्तव हृदि कांतासि वसति नाम न सा कि कुंभभाक्रम्याः
अस्माकं मलिनवा किं सिरिहा कस्मात् शठ तस्मात्तव तं चरणपातविडंबनाभिः अपरं यदि तेन वल्लभा साता किमं याचाम्यो कोपि न व्यापा
दयसि अथ स मकरस्तेन तेन सह हृतं स्नेहेन नातिवक्तुना यदि तस्य हृदयं न भक्षयसि तदानं चापरि या योपवेशनं कृत्वा प्राणा
त्यजामि पूर्ववत्तस्या निश्चयं ज्ञात्वा चिंताकुलितचित्तः स प्राह अहो साधिदमुच्यते वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च
एकाग्रहस्तु मीनानां नीलीमद्यपयोस्तथा तत्किं करोमि कथमसौ मे वध्यः स्यादिति निश्चित्य वानरपार्श्वमगमत् वानरो
पि चिरायान्तं सोद्वेगमिव तमालोक्य प्रोवाच भो मित्र अद्य किं चिरवेलायामायातोसि कथं सहर्षं नालपसि न सु
भाषितं पठसि स आह मित्र अहं तव भ्रातृजायया निष्ठुरगिरा अभिहितो भो कृतघ्न मा मे त्वं मुखं दर्शय यतः
त्वं प्रतिदिनं मित्रमुपजीवसि न च तस्य पुनर्गृहद्वारदर्शनेनापि प्रत्युपकारं करोषि तत्ते प्रायश्चित्तमपि नास्ति उक्तं च
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः तत्त्वं मम देवरं प्रत्युपकाराय राम॰
गृहे मीनय भविष्यति वा मे त्वया सह परलोके दर्शनं तदहं त्वया प्रोक्तस्तव सकाशमागतः तेन मे तया सह त्वद् १
गृहे कलहायमानस्य इयती वेला लग्ना तदागच्छ मद्गृहं तव भ्रातृजाया विरचितचतुष्कापूरितमाणिक्यमालिका

युवितसत्काराद्द्वारदेशे वद्धवंदनमालिकासोत्कंठा तिष्ठति मर्कट आह भो मित्र युक्तमभिहितं मे भ्रातृपत्न्या ककंव ददातिप्रतिश्रयकालित्थ
द्रुमाश्रयस्यापि पृच्छति यं सा भोजयते चैव याडूिधं श्रीतिलक्रमाम् परं वनचरा वयं युष्मदीयं च जलांतर्गृहं तत्कथं तत्र गंतुं शक्यते तस्मात्ता
मपि भ्रातृपत्नीमत्रानय येन प्रणम्य तस्या आशीर्वादं गृह्णामि सोब्रवीत मित्रास्ति समुद्रांतः सुरम्ये पुलिनप्रदेशे अस्मद्गृहं तन्मम पृ
ष्ठमारूढः सुखेनाकृतभयो गच्छ सोपि तच्छ्रुत्वा सानंदमाह भद्र यद्येवं तर्हि त्वर्यतां किं विलंबेन एषोहं तव पृष्ठमारूढः तथा
नुष्ठिते गाधे जले योगच्छंतं मकरं वा भयत्रस्तमना वानरः प्रोवाच भ्रातः शनैः शनैः गम्यतां जलकल्लोलैः प्लाव्यते मे शरीरं तच्छ्रुत्वा मकर
श्चिंतयामास असावघातावनमम पृष्ठगतोऽगाधसलिले त्वात्तिलमात्रमपि गंतुं न शक्तस्तत्कथयाम्यस्य स्वाभिप्रायं येनाभीष्टदे
वतामनुस्मरति उक्तवांश्च भद्र त्वं मया भार्यावाक्येन विश्वास्य वधार्थमानीतः तत्स्मर्यतामभीष्टदेवता सोब्रवीत भ्रा
तः किं तेन मयापकृतं यस्माद्भवता मे वधोपायश्चिंतितः ततः मकर आह भो तस्यास्तावदमृतफलास्वादनेन तत्त्वद्धृदयस्य मधु
रासहृदः संजातस्तदेतदनुष्ठितम् ततः प्रत्युत्पन्नमतिर्वानर आह भद्र यद्येवं किं त्वया तत्रैव न कथितं येन जंबूकोटरे तत् स्वा
पितृष्वस्वादुहृदयं सहैव समानयाम् तदाह स्वादुहृदये न विना यद्य दत्तो आनीतः तच्छ्रुत्वा मकरः सानंदमाह भद्र
यद्येवं तदर्पय मे तदेव हृदयं येन साहु दुष्टपत्नी तद्भक्षयित्वा नशनादुत्तिष्ठते अहं त्वां तमेव जंबूपादपं प्रापयामि एवमुक्त्वा
निवृत्य तदेव जंबूतरुतलं समागमत् वानरोपि तीरविविधदेवतोपयाचितेन प्राप्तः कथमपि तत्क्षितीरमासाद्य दीर्घतर
क्रमं चंक्रमणेन तदेव जंबूपादपमारूढश्चिंतयामास अहो मयाल्लब्धाः प्राणाः अथवा साध्विदमुच्यते न विश्वसेदविश्वस्ते वि
श्वस्ते नातिविश्वसेत् विश्वासाद्भयमुत्पन्नं मूलादपि निकृंतति तन्ममैतद्य पुनर्जन्मादिनमिव संजातं मकर आह भो मि
त्र अर्पय तद्धृदयं येन तत्भ्रातृपत्नी तद्भक्षयित्वा अनशनादुत्तिष्ठति अथ विहस्य तं निर्भर्त्स्य मर्कट आह धिङ्मूर्ख

पं॰तं॰४ विश्वासघातकस्य विहृदयं द्वितीयं भवति तच्छ्रुत्वा तं वानरं अस्य अंशं हृदयस्याधस्तान्न पुनरागंतव्यमिति उक्तं च सकृद्दुष्टं च यो मित्रं पु
नः संधातुमिच्छति स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा तच्छ्रुत्वा स विलक्षो मकरश्चिंतितवान् अहो किं मया मूढेनास्य स्वाभिप्रा
रेदि यो निरूपितः इति विचार्य उक्तवान् भो मित्र मम न तव हृदयेन प्रयोजनं मया तव हृदयपरीक्षणार्थं हास्येनेदमभिहितं तदागच्छ प्रा
घूर्णकन्यायेनास्मद्गृहवासं तव भ्रातृपत्नी त्वां प्रति उत्कंठिता तिष्ठति वानर आह भो दुष्ट गम्यतामधुना नाहमागमिष्यामि
इत्येका कथा उक्तं च यतः बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवंति आख्याहि भद्रे प्रियदर्शनस्य न गंगदत्तः पु
नः प्रयातिकूपम् मकर आह कथमेतत् सोऽब्रवीत् अस्ति कस्मिंश्चित्कूपे गंगदत्तो नाम मंडूकराजः स कदाचिद्दायादैरुद्वेजि
तः अरहट्टघटीमालामारुह्य कूपात्क्रमेण निष्क्रांतः अथ तेन चिंतितं कथं तेषां दायादानां मया प्रत्यपकारः कर्तव्यः उक्तं च आप
दि येनोपकृतं येन च हसितं दशासु विषमासु उपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये एवं चिंतयन्स बिले प्रविशंतं प्रि
यदर्शनाभिधानं कृष्णसर्पमपश्यत् तं दृष्ट्वा भूयोऽप्यचिंतयत् एनं कृष्णसर्पं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि
उक्तं च यतः शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा पादलग्नं करस्थेन कंटकेनेव कंटकम् एवं स विभाव्य बिलद्वारं ग
त्वा तमाहूतवान् एह्येहि प्रियदर्शन एहि तच्छ्रुत्वा सर्पश्चिंतयामास कोऽयं मामाह्वयति स तावत्स्वजातीयो न भवति नेदृशी राम:
सर्पवाणी अन्येन केनापि सह मर्त्यलोके मम संधानं नास्ति तदत्रैव स्थितस्तावद्वेद्मि कोऽयं भविष्यति उक्तं च यस्य न ज्ञा
यते शीलं न कुलं न पराक्रमः न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः स कदाचित्कोऽपि मंत्रवादी औषधचतुरो वा माहू २
य बंधने क्षिपति अथवा कश्चित्पुरुषो वैरमनुस्मृत्य कस्यचिद्भक्षणार्थं आकारयति आह च को भवान् सोऽब्रवी

द अहंगंगदत्तोनाममंडूकाधिपतिः त्वत्सकाशंमैत्र्यर्थमभ्यागतः तच्छ्रुत्वासर्प आह भोअश्रद्धेयमेतत् तृणानांवह्निनासहसंग

वधः उक्तंच योयस्यजायतेवध्यःसस्वप्नेपिकथंचन नतत्समीपमभ्येतितत्किमेतत्जल्पसि गंगदत्त आह भोसत्यमिदंस्वभा

ववैरीभवानस्माकं परंपरिभवादहंत्वत्सकाशंप्राप्तः उक्तंचयतः सर्वस्वनाशेसंजातेप्राणानामपिसंशये अपिशत्रुंप्रणम्या

पिरक्षेत्प्राणान्धनानिच सर्प आह कस्मात्तेपरिभवः स आह दायादेभ्यः सर्पोब्रवीत् तत्कुत्रतेआश्रयः किंकूपेवापीतडागे

वा तत्कथयस्वकाश्रयं स आह कूपेममाश्रयः सर्प आह तन्नास्तिमेतत्रप्रवेशः प्रविष्टस्यस्थानंनास्ति यत्रस्थितस्तव

दायादान्व्यापादयामि तत्कुप्यतोमितिउक्तंच यच्छक्यंग्रसितुंग्रासंग्रस्तंपरिणमेच्चयत् हितंचपरिणामेस्यात्तत्कार्यंभूति

मिच्छता गंगदत्त आह भोसमागच्छत्वं अहंसुखेनोपायेनतत्रप्रवेशंकारयिष्यामितथातस्यमध्येजलोपान्तेरम्यतरंकोटरमस्ति

तत्रस्थितस्त्वंलीलयातान्दायादान्व्यापादयिष्यसि तच्छ्रुत्वासर्पोव्यचिंतयत् अहंतावद्वृद्धः कदाचित्कथंचिन्मूषकमे

कंप्राप्नोमिनवा अथवासाधुइदमुच्यते योपिप्राणपरिक्षीणः सहायैःपरिवर्जितः सोपिसर्वसुखोपायांवृत्तिमारभतेबु

धः एवंविचिंत्यसआह भोगंगदत्त यद्येवंतदग्रेभवयेनतत्रगच्छावः गंगदत्त आह भोप्रियदर्शन अहंत्वांसुखोपायेनतत्रने

यामिस्थानंचदर्शयिष्यामि परंत्वयास्मत्परिजनोरक्षणीयः केवलंयानहंदर्शयिष्यामितएवभक्षणीयाः सर्प आह भ

द्रसांप्रतंत्वंमेमित्रत्वमुपागतः तन्नभेतव्यं यदेवतवाभिलषितंतदेवकरिष्यामीति एवमुक्त्वाबिलान्निष्क्रम्यतमालिं

ग्यतेनैवसहतत्रप्रस्थितः अथकूपमासाद्यरहट्टघटिकामार्गेणसर्पस्तेनसहतस्यालयंगतः ततश्चगंगदत्तेन

कृष्णसर्पंकोटरेधृत्वादर्शितास्तेदायादाः तेनतेसर्वेभक्षिताः २ विश्वासस्य मा ... तदभावे किंचित् ... यावत्पितेन

पं.तं.४ सा कांचि[illegible]पनिःशेषिताः अथ सर्पेणाभिहितं मंडूकाः निःशेषितास्तत्प्रयच्छ मे किंचिद्भोजनं यतोऽहं त्वयानीतः गंगदत्त आह भ
३ द्र त्वया कृतं मित्रकृत्यं तत्साम्प्रतमनेनैव अरहट्टघटिकामार्गेण गम्यतामिति सर्प आह भो गंगदत्त सम्यङ्नाभिहितं भवता कथमहं तत्र
गच्छामि मदीयं बिलदुर्गमन्येन रुद्धं भविष्यति तत्रात्र स्थितस्य मे मंडूकमेकैकं स्वकीयमपि प्रयच्छ नोचेत्सर्वानपि भक्षयिष्यामि
तच्छ्रुत्वा गंगदत्तो व्याकुलितमना व्यचिंतयत् अहो किमेतन्मया कृतं एनमानीय तद्यदि निषेधयिष्यामि तत्सर्वानपि भक्षयिष्य
ति अथवा साध्विदमुच्यते योऽमित्रं कुरुते मित्रं वीर्याभ्यधिकमात्मनः स करोति न संदिग्धमात्मनो विषभक्षणम् ततः प्र
यच्छाम्येकैकं दिनं प्रति सुहृदमपि उक्तं च सर्वस्वहरणे युक्तं शत्रुं बुद्धियुता नराः तोषयंत्यल्पदानेन वाडवं सागरो य
था तथा च सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पंडितः अर्द्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः न स्वल्पस्य कृते भूरि नाश
येन्मतिमान्नरः एतदेव हि पांडित्यं यत्स्वल्पाद्भूरिरक्षणम् एवं निश्चित्यैकैकं मंडूकं नित्यमेवादिशत् सोऽपि तं भक्षयि
त्वा अन्यमपि तस्य परोक्षं भक्षयति अथवा साध्विदमुच्यते यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते एवं चलितवित्तस्तु
गंग शेषं तत्र न रक्षति अथान्यस्मिन्नहनि तेन मंडूकान्भक्षयता दत्तसुतो यमुनादत्तो नाम मंडूको भक्षितः तं दृष्ट्वा
गंगदत्त आर्तस्वरेण विललाप ततः स्वपत्न्याभिहितं किं क्रंदसि निराक्रंदं स्वपक्षक्षयकारक स्वपक्षस्य क्षये जाते को नस्त्रा राम
णं कः करिष्यति तदद्यापि विचिंत्यतामात्मनो निष्क्रमणं अस्य वधोपायो वा अथ गच्छता कालेन तेन समस्ता अपि निः ३
शेषितास्ते मंडूकाः केवलं गंगदत्तोऽवशिष्यति ततः प्रियदर्शनेनोक्तं भद्र गंगदत्त बुभुक्षितोऽहं निःशेषिताः सर्वे

मंडूकास्तदीयतां किंचिद्भोजनं मे यतोऽहं त्वयात्रानीतः स आह भो मित्र न त्वयात्र विषये मया विद्यमानेन चिंता कार्या तद्यदि मां श्रेयसि
तदन्येषामपि कूपानां विश्वास्य सर्वान्मंडूकानत्रानयामि सोऽब्रवीत् ममतावत्त्वमसि भ्रातृस्थानेन तद्युक्तमेवं करोषि तत्त्वं प्रतिपितृ
स्थाने भवसि तदेवं कृत्वोपायविचक्षणस्तस्मात्कूपान्निष्क्रांतः प्रियदर्शनोऽपि तदागमनं कांक्षमाणस्तत्रस्थः प्रतीक्षमाणस्तिष्ठति
अथाचिरात्प्रियदर्शनस्तस्मिन्नेव कूपेऽन्यकोटरवासिनीं गोधामुवाच भद्रे क्रियतां मे साहाय्यं यतश्चिरपरिचितस्ते गं
गदत्तस्तं गत्वा तत्सकाशं कुत्रचिज्जलाशये मम संदेशं कथय तदागम्यतां भवता द्रुततरमेकाकिनापि यद्यन्ये मंडूका नागच्छं
ति नाहं त्वया विना अवस्थातुं शक्नोमि तथा त्वयि यदि त्वां जानाति मनसापि विरुद्धं समाचरामि तन्मदीयजन्मसुकृतं तवेति गोधा वच
चनात् द्रुततरमन्विष्य गंगदत्तमाह भद्र तव सुहृत्प्रियदर्शनस्तव मार्गं समीक्षमाणस्तिष्ठति ततः शीघ्रमागम्यतां अपरं चैते
न त्वां जानाति विरूपाचरणार्थे जन्मसुकृतमंतरे धृतं तन्निःशंकेन मनसा समागम्यतामिति तच्छ्रुत्वा गंगदत्त आह बुभुक्षि
तः किं न करोति पापमिति एवमुक्त्वा तां विसर्जयामास इति द्वितीया कथा तन्न दुष्टस्य वरे अहमपि गंगदत्त इव त्वद्गृ गत
हे न कथं विश्वास्यामि तच्छ्रुत्वा मकर आह भो मित्र नैतद्युज्यते कर्तुं सर्वथैव मे कृतघ्नतादोषमपनय गृहागमनेन अथवा
तवोपरि प्रायोपवेशनं करिष्यामि वानर आह मूढ किमहं लंबकर्णो नाम यद्दृष्ट्वापायोऽपि स्वयमेव तत्रैव गत्वात्मानं व्या
पादयामि आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमम् अकर्णहृदयो मूर्खो यो गत्वा पुनरागतः मकर आह कोऽसौ लंबक
र्णो नाम कथं दृष्ट्वापायोऽपि मृतस्तन्मे निवेद्यतामिति वानर आह अस्ति कस्मिंश्चिद्वनोद्देशे करालकेसरो नाम सिंहः त
स्य च धूसरको नाम शृगालः सदानुयायी परिचारकोऽस्ति अथ कदाचित्सिंहस्य हस्तिना सह युध्यमानस्य शरीरे

पंतं. ४ उत्कटाः प्रहाराः संजातास्तैः पदमपि चलितुं न शक्नोति तस्य चानुचरो धूसरकः क्षुत्क्षामकंठो दौर्बल्यं गतोन्यस्मिन्नहनि तमवोचत् स्वा
४ मिन्बुभुक्षया पीडितोहं पदमपि चलितुं न शक्नोमि तत्कथं तव शुश्रूषां करोमि सिंह आह भो धूसरक अन्वेषय किंचित्सत्वं येनेमामव
स्थां गतोपि व्यापादयामि तच्छ्रुत्वा शृगालोन्वेषयन् कंचित्समीपवर्तिनं ग्राममासाद्य लंबकर्णो नामानं रासभं तडागोपांते प्रवि
रलदूर्वांकुराणि तत्कृच्छ्रादास्वादयंतं ददृशवान् ततेन तेन समीपवर्त्तिना भूत्वाभिहितः भो मामा मम प्रियोयं नमस्कारः संभाव्यतां चिराद्द
ष्टः कथमेवं दुर्बलतां गतः लंबकर्ण आह भो भगिनेय किं करोमि रजकोतिनिर्दयो मामतिभारेण पीडयति घासमुष्टिमपि न
प्रयच्छति केवलं ममात्र धूलिमिश्रितान्दूर्वांकुरान्भक्षयतो नास्ति शरीरपुष्टिरिति शृगाल आह मामा यद्येवं तदस्ति मरकतस
दृशशष्पप्रायो नदीसनाथो रमणीयः प्रदेशः तत्रागत्य मया सह सुभाषितगोष्ठीसुखमनुभवंस्तिष्ठ लंबकर्ण आह भो भ
गिनेय युक्तमुक्तं भवता परं ग्राम्याः पशवोरण्यचरवध्यास्तत्किं तेन भव्यप्रदेशेन शृगाल आह मामा मैवं वद मद्भुजपंज
रपरिरक्षितः प्रदेशोसौ तन्नास्ति कस्यचिदपरस्य तत्र प्रवेशः परमनेनैव भवदीयावधिना रजककदर्थितास्तिस्रो रासभ्योना
थाः संति ताश्च पुष्टिमापन्ना यौवनोत्कटा मामिदमाहुः भो मातुलक कमपि ग्रामं गत्वास्मदुचितं पतिमानय तदर्थं त्वा
महमानेतुमायातः अथ शृगालवचनं श्रुत्वा कामपीडितांगो लंबकर्णस्तमुवाच भद्र यद्येवं तदग्रे भव त्वरितं तत्र गच्छा
वः उक्तं चैतत् नामृतं न विषं किंचिदेकां मुक्त्वा नितंबिनीम् जीव्यते संगतो यस्याः म्रियते च वियोगतः ततः शृगालेन रामः
सहासौ सिंहांतिकमुपागतः सिंहोपि व्यथितमूर्तिस्तथापि तं क्रमप्राप्तमपि खरं दृष्ट्वा अतिहर्षादुत्फाल्य तदुपरि पपात ४
अथ रासभो वज्रपातमिव मन्यमानः किमिदमित्यावलयन् असन्नतलेरव दैवात्कथमपि तस्मादपेतः यावत्

श्वादवलो कथयति तावत् क्रूरं रक्तांतनयनं अतिभयानकमदृष्टपूर्वं सत्वं दृष्ट्वा भयार्त्तस्त्वरितपदं तदेव नगरं जगाम अथ गोमायुना सिं
हेभिहितः भो किमेतद्दृष्टस्ते विक्रमोयं अथ सिंहः सविस्मयमाह भो मया न ज्ञातं सज्जितं आसीत् तत्किं करोमि मत्क्रमात्क्रांतो
गजोपि न गच्छेत् शृगाल आह संप्रत्यपि यावत् सज्जितं कृत्वा तिष्ठ तमहं पुनरप्यानयामि यतः पुनरप्येन महत्वदंतिकमानेष्यामि सिंह आह भद्र
यो मां प्रत्यक्षं दृष्ट्वा गतः स कथं पुनरत्र समेष्यति तदन्यत्किंचित्सत्वमानय शृगाल आह किं तवानया चिंतया त्वं केवलं सज्जीभूतस्तिष्ठ अहमेव जाग
रूकोस्मि ज्ञामि इत्युक्त्वा शृगालोपि रासभमार्गेण यावद्गच्छति तावत्तत्रैव स्थाने चरन्तिष्ठति अथ शृगालं दृष्ट्वा रासभः प्राह
भो भागिनेय भव्यस्थाने हं त्वयानीतः यद्दैवान्मृत्युवशं न गतः तत्कथय किं तत्सत्वमातिरौद्रं यस्य वज्रोपमप्रहारादहं मुक्तः
तच्छ्रुत्वा शृगालः प्रहस्याह मामसा रासभी विहिता ऽ तच्छृंगारा त्वामवलोक्य सानुरागा आलिंगितुं उत्थिता त्वं च कात
रतया नष्टः तया पुनर्नश्यतोपि भवतोवलंबनार्थं हस्तः प्रसारितो न चान्यत्कारणं तदागच्छ सा त्वत्कृते प्रायोपवेशनं कृत्वा
ऽभाति वदति यदि मे लंबकर्णो भर्ता न भवति तदहमग्नौ जले वा प्रविशामि विषं वा भक्षयामि तथापि तद्वियोगं सोढुं न शक्नो
मि तत्प्रसादं कृत्वा तत्रागम्यतां नो चेत् स्त्रीहत्या भविष्यति मन्मथश्च प्रकोपं करिष्यति उक्तं च स्त्रीमुद्रां मकरध्वजस्य ज
यिनीं सर्वार्थसंपादिनीमेनां ये प्रविहाय यांति कुधियो मिथ्याः स्वर्गापवर्गेछया तद्दैवैर्विनिहन्यते ऽतुततरं भग्नाः कृताः केचि
ताः केचिद्रक्तपटीकृताश्च जटिलाः कापालिकाश्चापरे अथासौ तद्वचनं श्रद्धेयतया भूयोपि तेन सह प्रस्थितः सा
धिदमुच्यते जानन्नपि नरो दैवात्प्रकरोति विगर्हितम् कर्मो यत्कर्म किं लोके गर्हितं रोचते कथम् अत्रांतरे पूर्वरचि
तविग्रतारितो रासभः पुनरपि सिंहस्यांतिकमागतः ततः प्राक्संज्ञितोसौ सिंहेन तत्कालं व्यापादितः तत

पं.तं.४ घातंहत्वाश्टगालंरक्षपालंविधायस्वयंस्नानार्थंनद्यांगत: श्टगालेनातिलौल्यात्खरस्यकर्णौहृदयंभक्षितं अथसिंहआगत्यतत्कर्णौ
५ हृदयंभक्षितंज्ञात्वाकोपपरीतात्माश्टगालमाह आ:पापकिमिदमनुचितमनुष्ठितं यत्कर्णहृदयभक्षणेनोच्छिष्टतांनीत:खर:
श्टगाल:सविस्मयमाह स्वामिन्मामेवंवद कर्णहृदयरहितएवायमासीत् कथमन्यथागतोऽसौस्वयंत्वामवलोक्यभयाद्गत्वापुन
रागत: अतएवोच्यते आगतश्चगतश्चैवदृष्ट्वासौत्वांभयानकम् अकर्णहृदयोमूर्खोयोगत्वापुनरागत: अथश्टगालव
चनेनजातप्रत्यय:सिंहस्तेनैवसहसंविभज्याशंकितमनास्तमभक्षितवान् अतोऽहंब्रवीमि नाहमपिलंबकर्णइति इतित
तीयाकथा तन्मूर्खविकपटकृतंत्वयापरंयुधिष्ठिरेणेवसत्यवचनेनाविनाशितं साध्विदमुच्यते स्वार्थमुत्सृज्ययोदंभीसत्यं
ब्रूतेसुमंदधी: सस्वार्थाद्भ्रश्यतेनूनंयुधिष्ठिरइवापर: मकरआह कथमेतत् सोऽब्रवीत् अस्तिकस्मिंश्चिदधिष्ठानेको
पिकुंभकार:सकदाचित्प्रमत्तस्तीक्ष्णाग्रस्यभग्नभांडकर्परस्योपरिमहतावेगेनधावन्पपात ततश्चकर्परकोट्यापाटितल
लाटतलोरुधिराप्लुतशरीर:कथंचिदुत्थित: ततश्चापथ्यसेवनात्कर्परप्रहार:करालतांगत: अथकदाचिद्दु
र्भिक्षपीडितेदेशेसक्षुत्क्षामोऽसौकैश्चिद्राजसेवकै:सहदेशांतरंगत्वाराजसेवकोबभूव सचराजातस्यललाटेविकरा
लाकारंकर्परप्रहारंदृष्ट्वाचिंतयामास नूनंवीरपुरुषोऽयंकश्चित्तेनललाटस्यसंमुख:प्रहारइतिचिंत्यमान:दा राम:
नादिभि:सर्वेषांराजपुत्राणामधिकंप्रसादंपश्यतितेपिराजपुत्रास्तस्यप्रसादातिशयंपश्यंत:परमेर्ष्याधर्मंव
हंतोराजभयान्नाकिंचिदूचु: अथान्यस्मिन्नहनिक्रियमाणायांवीरसंभावनायांप्रकल्प्यमानेषुगजेषुसंन ५
ह्यमानेषुवाजिषुविलोक्यमानेषुयोधपुरुषेषुतेनाकुंभकार:प्रस्तावेदृष्टोभोराजपुत्रकिंतेनामकावाजाति ४

कस्मिंसंग्रामेप्रहारोयंतेनलब्धः सोब्रवीत् देवयुधिष्ठिराभिधःकुंभकारोहंजात्यानचायंशस्त्रप्रहारः किंतुअनेककर्परसंकुलेगृहांग
णप्रदेशेमद्यपानविकलःप्रधावन्कर्परोपरिपतितः ततःकर्परप्रहारेणायंकरालतांगतः ततोराजाव्यचिंतयत् अहोवंचितोहमनेन लोह
एनपुत्रानुकारिणाकुंभकारेणतद्दीयतामस्यार्द्धचंद्रः तथानुष्ठितेकुंभकारःप्राह देवमैवंकुरु पश्यमेसमरेहस्तलाघवं राजाप्राह
भोसर्वगुणनिधिर्भवान्तदपिगम्यतामिति उक्तंच शूरोसिकृतविद्योसिदर्शनीयोसिपुत्रक यस्मिन्कुलेत्वमुत्पन्नोगजस्तत्रन
हन्यते कुंभकारआह कथमेतत् राजाकथयति अस्तिकस्मिंश्चिद्वनोद्देशेसिंहमिथुनं अथकदाचित्सिंहीपुत्रद्वयंजनयामा
स सिंहोपिनित्यंमृगादीन्व्यापाद्यसिंह्यैददाति अथकदाचित्तेनवनेभ्रमतानकिंचिदासादितंभगवानादित्योप्यस्तशिखरमुपग
तः अथतेनस्वगृहमागच्छतामार्गेशृगालशिशुःप्राप्तः सोबालकोयमितिकृपान्वितेनयत्नाद्दंष्ट्रामध्येविधृत्यपाल्येनजीवन्नेवानीयसिंह्यै
समर्पितः सिंह्याभिहितं भोकांतत्वयानीतंभोजनंकिंचित् सिंहआह प्रियेअद्यैनंशृगालशिशुंविनानकिंचिदासादितं सचायंम
पिस्वजातीयोबालश्चेतिमत्वामयानहतः उक्तंच स्त्रीविप्रलिंगिबालेषुप्रहर्तव्यंनकर्हिचित् प्राणत्यागेपिसंजातेविश्वस्तेषु
विशेषतः इदानींत्वमेनंभक्षयित्वापथ्यंकुरु प्रातरन्यत्किंचिदानेष्यामि साब्रवीत् भोकांतत्वयाबालकोयमितिविचार्यनव्यापा
दितस्तदहमपिकथमेनंस्वोदरार्थेवधामि उक्तंच अकृत्यंनैवकर्तव्यंप्राणत्यागेप्युपस्थिते नचकृत्यंपरित्याज्यमेषधर्मः
सनातनः तस्मान्ममायंतृतीयःपुत्रोभविष्यतीत्युक्त्वास्तनक्षीरेणपरांपुष्टिमनयत् एवंत्रयोप्येतेशिशवःपर
स्परमज्ञातजातिविशेषाएकाचारविहाराबाल्यंनिर्वाहयामासुः अथकदाचित्तद्वनेभ्रमन्नरण्यगजःसमायातः
तंदृष्ट्वासिंहसुतौद्वौकुपितौहंतुंचलितौ तयोःशृगालसुतेनाभिहितं अहोगजोयंयुष्मत्कुलशत्रुस्ता

पं.तं.४ नगंतव्यं एवमुक्त्वा गृहं प्रतिधावितः तावपि ज्येष्ठभंगान्निरुत्साहतांगतौ साधुवेदमुच्यते एकेनापि सुधीरेण सोत्साहेन रणांप्रति सोत्सा
६ हं जायते सैन्यं भग्ने भंगमवाप्नुयात् तथाच अतएववांछंति भूपा योधान्महाबलान् शूरान्धीरान्कृतोत्साहान्वर्जयंतिच कातरान् तो
द्वावपि भ्रातरौ गृहं प्राप्य विहसंतौ पित्रोरग्रे ज्येष्ठभ्रातृचेष्टितमूचतुः यत्किलायं गजं दृष्ट्वा दूरतोपि प्रनष्टः सोपि तदाकर्ण्य कोपा
विष्टमनाः स्फुरिताधरपल्लवस्ताम्रलोचनस्त्रिशिखां भृकुटिं कृत्वा तौ निर्भर्त्सयमानः परुषमुवाच अथ सिंह्या एकांते नीत्वा प्रबोधितो
सौ वत्स कदापि मैवं वादीः भवदीयभ्रातरावेतौ अथासौ मातृवचनेन प्रभूततरकोपाविष्टस्तामप्युवाच किमहमेताभ्यां रूपेण सौ
दर्येण विद्याभ्यासकौशलेन वा हीनो यदेतौ मामुपहसतः तन्मया अवश्यमेतौ व्यापादनीयौ तच्छ्रुत्वा तस्य जीवितमिच्छंती सिंही वि
हस्य प्राह शूरोसि कृतविद्योसि दर्शनीयोसि पुत्रक यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते तत्सम्यक् शृणु वत्स त्वं शृगाली
सुतो मया कृपया स्वस्तनक्षीरेण पुष्टिं नीतः तद्यावदेतौ मम पुत्रौ त्वां शृगालं न जानीतस्तावद्द्रुततरं गत्वा स्वजातीयानां मध्ये
भव नोचेदेताभ्यां निहतो मृत्युपथमेष्यसि सोपि तच्छ्रुत्वा भीतमनाः शनैः शनैरपसृत्य स्वजातीयानां मिलितः तस्मात्त्वम
पि यावदेते राजभटाः कुलालं त्वां न जानंति तावत्त्वं द्रुततरमपसर नोचेद्विडंबनां प्राप्य मरिष्यसीति कुलालोपि तदाकर्ण्य सत्वरं
प्रनष्टः अतोहं ब्रवीमि स्वार्थमुत्सृज्य यो दंभीति शूरोसीति स्वार्थमुत्सृज्य इति वनौकसा धिङ्मूर्ख यत्त्वया स्त्रियोर्थे एत रामः
त्कार्यमनुष्ठातुमारब्धं नहि स्त्रीणां कथंचिद्विश्वासमुपगच्छेत् सुष्टुचाल्विदमाख्यानमाख्यायते यदर्थे स्वकुलं त्यक्तं ६
जीविताद्धं च हारितं सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः मकर आह कथमेतत् वानरः कथयति अ

स्ति कस्मिंश्चिदधिष्ठाने कोपि ब्राह्मणस्तस्य च प्रिया अतिप्राणप्रिया कुटुंबेन सह कलहं कुर्वाणा न विश्राम्यति सोपि ब्राह्मणः कलहमसह
मानो भार्यावात्सल्यात्स्वकुटुंबं परित्यज्य ब्राह्मण्या सह विप्रकृष्टं देशांतरं गतः अथ महाटवीमध्ये ब्राह्मण्याभिहितं आर्यपुत्र तृष्णा मां बाधते तत्
उदकं क्वाप्यन्वेषय अथासौ तद्वचनानंतरं यावदुदकं गृहीत्वा समागच्छति तावत्तां मृतामपश्यत् अतिवल्लभतया विषादं कुर्वन्यावद्विल
पति तावदाकाशे वाचमशृणोत् हे ब्राह्मण शुचीभूय जीवितार्द्धं प्रयच्छ दत्ते जीवितार्द्धे समभवज्जीविता सा ब्राह्मणी अथ जलं
पीत्वा वनफलानि भक्षयित्वा गंतुमारब्धौ ततः क्रमेण नगरद्वारदेशे कस्यापि विस्तृतपुष्पवाटिकां प्रविश्य ब्राह्मणो भार्यामभिहितवान्
भद्रे यावदहं भोजनं गृहीत्वागच्छामि तावदत्र त्वया स्थातव्यम् इत्यभिधाय प्रायासीत् अथ तस्यां पुष्पवाटिकायां पंगुः रहट्ट
घटीं खेटयमानो दिव्यगिरा गीतमुद्गिरयति तच्च श्रुत्वा कुसुमेषुणार्दितया तत्सकाशं गत्वाभिहितं भद्र यदि मां न काम
यसे तन्मम सकाशात्स्त्रीहत्या तव भविष्यति पंगुरब्रवीत् त्वं किं मया व्याधिग्रस्तेन करिष्यसि साब्रवीत् किमनेनोक्तेन
अवश्यं त्वया सह मम संगमः कर्तव्यः तच्छ्रुत्वा तथा कृतवान् सुरतानंतरं साब्रवीत् इतः प्रभृति यावज्जीवं मयात्मा भ
वते दत्तः इति ज्ञात्वा भवानप्यस्माभिः सहागच्छतु साब्रवीत् एष पंगुर्बुभुक्षितस्तदेतस्यापि कियंतमपि ग्रासं देहि इ
ति. तथैवानुष्ठिते ब्राह्मण्याभिहितं ब्राह्मण सहायहीनस्त्वं यदा ग्रामांतरं गच्छसि तदा मम वचनसहायोपि नास्ति. त
देनं पंगुं गृहीत्वा गच्छावः साब्रवीत् न शक्नोम्यात्मानमपि ग्रामांतरं नेतुं पुनरयं पंगुः साब्रवीत् पेटाभ्यंतरस्थमहमेनं ने
ष्यामि अथ तत्कृतकवचनामोहितचित्तेन प्रतिपन्नं तथानुष्ठिते वान्यस्मिन्दिने कूपोपकंठे विश्रांतो ब्राह्मणस्तया
पंगुपुरुषासक्तया संप्रेर्य कूपे पातितः सापि पंगुं गृहीत्वा कस्मिंश्चिन्नगरे प्रविष्टा तत्र चौर्यशुल्करक्षानिमित्तं

पं.तं.४ रत्नयुक्तेषेरितस्ततोऽश्रमच्छिन्नमस्तकस्यां पेटिकां दृष्ट्वा बलाद्गृहीत्वा राजाग्रे नीता राजापि यावत्तामुद्घाटयति तावत्तं मुण्डं ददर्श ततः
सा ब्राह्मणी विलापं कृतवती राजपुरुषाश्च पदमेव तत्रागता राज्ञा छद्मास्थे सा तां नमस्कृत्य अब्रवीत् ममैष भर्त्ता व्याधितो दायादैरुच्छि
न्नो मया यत्नेन व्याकुलितमानसया शिरः संगृहीत्वा त्वत्सकाशमानीतः राजाब्रवीत् आश्चर्यमेतत् त्वं भगिनी ग्रामं गृहीत्वा
भर्त्रा सह भोगान्भुंजाना सुखेन तिष्ठ अथ स ब्राह्मणो दैववशात्केनापि साधुना कूपादुत्तारितः परिभ्रमन्तद्देवनगरमा
यातः तया दुष्टभार्यया दृष्टो राज्ञे निवेदितश्च राजेन्द्र अयं मम भर्त्तुर्वैरी समायातः राज्ञापि वध्यायादिष्टः सोऽब्रवीत्
देव अनया मम सर्वं किंचिद्गृहीतमस्ति यदि त्वं धर्मवत्सलस्तदा दापय राजाब्रवीत् भद्रे त्वया अस्य सर्वं किंचिद्गृहीतमस्ति तत्समर्पय
सा प्राह देव मया नास्य किंचिद्गृहीतं ब्राह्मणः प्राह यन्मया त्रिवाचिकं जीवितार्धं दत्तं तद्देहि अथ सा राजभयात्तथैव त्रिवाचिकं मे
जीवितं मया दत्तमिति जल्पन्ती प्राणैर्वियुक्ता ततः सविस्मयं राजाब्रवीत् किमेतदिति ब्राह्मणेनापि पूर्ववृत्तान्तं तस्मै सक
लोऽपि निवेदितः अतोऽहं ब्रवीमि यदर्थे स्वकुलं त्यक्तमिति षष्ठी कथा वानरः पुनरप्याह साधु चेदं मे पाख्यानकं श्रूयतां
न किं कुर्यान्न किं दद्यात् स्त्रीभिरभ्यर्थितो नरः अनश्वा यत्र हेषन्ते शिरः पर्वणि मुण्डितं मकर आह कथमेतत्
वानरः कथयति अस्ति प्रख्यातबलपौरुषोऽनेकनरेन्द्रमुकुटमरीचिजालजटिलीकृतपादपीठः शरच्छशाङ्ककिरणनि राम:
र्मलयशाः समुद्रपर्यन्तायाः पृथिव्याः भर्त्ता नन्दो नाम राजा तस्य च सर्वशास्त्राधिगतसमस्ततत्त्वः सचिवो वररुचिर्नाम तस्य
च प्रणयकलहेन जाया कुपिता सा च अतीव वल्लभानेकप्रकारं परितोष्यमाणापि न प्रसीदति ब्रवीति च भर्त्ता ७

मद्येयेन प्रकारेण तव वाञ्छितं कथय निष्पादितं करोमि ततः कथं चित्तयोक्तम् यदि शिरो छेदयित्वा मम पादयोर्निपतसि तदा
प्रसादाभिमुखी भवामि तथा वाञ्छितं प्रसन्नासि अथ चंद्रस्वामि भार्या तथैव स्त्री प्रसादमभ्यागतन् लुष्यति तेनोक्तं भद्रे त्वया
विना गृहं गमिष्यामि न जीवामि पादयोः पतित्वा प्रसादयामि सा ब्रवीत् यदि स्वशीर्षं भुवं पातयिष्यसि अहं तव सुस्वरूपं त्वां धावयामि
धावितश्चेदस्य च तव तदा मम प्रसन्ना भवामि तथा वाञ्छितं प्रसन्नासा अथ प्रभातसमये सभोपविष्टस्य राज्ञो वररुचिरा
यातः तं कथयामास भो वररुचे किमपर्वतलिंगो मुण्डितं शिरस्ते सोऽब्रवीत् नाकिं कुर्यात् नाकिं दद्यादिति तन्मुखं त्वमपि नं
द वररुचि वित्सवीचयपः ततस्तद्राजितेन त्वयामात्य प्रतिवचोपायः प्रारब्धः परं वाग्दोषेण गोवध्यकर्त्तः इति सप्तमी कथा ७
अथवा माधिदं कथयते आत्मनो कुथवत्तावतां वर्ष्यं तेषु कस्मारिकाः धकारस्तु अनवधानतेमो न सर्वार्थसाधकम् तथा च श्रूयतां
रसमाणोपि दर्शयन्त्यारूपं वपुः व्याघ्रचर्मपरिछन्नो वाक्कृतरासभो हतः मकरंध्वाद कथमेतत् सोऽब्रवीत् अस्ति कस्मिं
श्चिद्धिष्ठाने शुद्धपटो नाम रजकः तस्य च गर्दभः कोऽस्ति सोपि घासाभावात् दुर्बलतां गतः तेन रजकेनाटव्यां भ्रमता मृतो व्याघ्रो दृष्टः चिन्तितं
तीव्याघ्रा दृष्टः चिन्तितं च अहो शोभनमापतितं अनेन व्याघ्रचर्मणा प्रच्छाद्य रासभं रात्रौ यवक्षेत्रेषु मुत्सृजामि
निकटवर्ती क्षेत्रपतिः तथानुष्ठिते रासभो यथेच्छं यवभक्षणं करोति प्रत्यूषे रजकोऽपि स्वाश्रयं नयति एवं गच्छता कालेन
स पीततनुः संजातः कष्टाद् बन्धनस्थानमपि नीयते अथान्यस्मिन्नहनि रासभो दूरस्थितां रासभीं रटन्तमश्रृणोत् ततः
...रासभो रटितुमारब्धः अथ तैः क्षेत्रपैः रासभोऽयमिति ज्ञात्वा ... प्रात

हरेर्व्यापादितः अतोहं ब्रवीमि कुंभगं रक्तमालोपीत्यादि ॥ अष्टमी कथा अथैवं तेन सह विवदतो जलचरेणैकेनागत्याभिहि
तं भो मकर त्वदीया भार्या त्वदागमनं प्रतीक्षमाणा अनशनेनोपविष्टा मृता सोपि तच्छ्रुत्वा अतीव व्याकुलितमनाः प्रालपत् भोः किमि
पं०तं० ४ दं संजातं मम मंदभाग्यस्य उक्तंच माता यस्य गृहे नास्ति भार्या वा प्रियवादिनी अरण्यं तेन गंतव्यं यथारण्यं तथा गृहम् त
न्मित्र क्षम्यतां किंचिन्ममापराधः अहं तद्वियोगाद्वैश्वानरप्रवेशं करिष्यामि तच्छ्रुत्वा वानरो विहस्य प्रोवाच भोः ज्ञात
८ स्त्वं मया प्रथममेव असौ स्त्रीवश्यः स्त्रीजितश्चेति सांप्रतं प्रत्ययः संजातः तन्मूढ आनंदेपि जाते त्वं विषादं यातः तादृग्भार्यायां
मृतायामुत्सवः कर्तुं युज्यते उक्तंच यतः या भार्या दुष्टचारित्रा सततं कलहप्रिया भार्यारूपेण सा ज्ञेया विदग्धैर्दारुणा ज्व
९ रा तस्मात्सर्वप्रयत्नेन नामापि परिवर्जयेत् स्त्रीणामिह हि सर्वासां य इच्छेत्सुखमात्मनः यदंतस्तन्न जिह्वायां यज्जिह्वा
यां न तद्बहिः यद्बहिस्तन्न कुर्वंति विचित्रचरिताः स्त्रियः आस्तां तावत्किमन्येन दौरात्म्येनेह योषितां विधृतं स्वो
दरेणापि घ्नंति पुत्रमपि स्वकम् रूक्षायां स्नेहसद्भावं कठोरायां सुमार्दवम् नीरसायां रसं बालो बालिकायां विक
ल्पयेत् मकरश्चाह भो अस्त्वेतत्परं किं करोमि मम अनर्थद्वयमेतत्संजातं एकं तावद्गृहभंगः अपरं मित्रेण सह संतो
षश्च अथवा भवत्येव दैवोपहतानां उक्तंच यतः यादृशं मम पांडित्यं तादृशं द्विगुणं तव नाभूज्जारो न भर्ता च किं नु रामः
पश्यसि नग्निके वानर आह कथमेतत् सोब्रवीत् कस्मिंश्चिदधिष्ठाने हालिकदंपती प्रतिवसतः स्म हालिकभार्या प ८
तिर्वृद्धभावात्सदैवान्यचित्ता न कथंचिद्गृहे स्थैर्यमालंबते केवलं परपुरुषानन्वेषयंती अथ केनचित्परवित्तापहारकेणोपा

ततोऽसौ कामासक्ता शुभम्र तभार्याऽहं त्वद्दर्शनेन स्मरपीडिता तच्छ्रुत्वा दीयतां मे रतिसर्वस्वदक्षिणा ततस्तयाभिहितं भोः सुभग यद्येवं तदस्ति मे पतिगृ
हे धनम् सद्गृहीत्वा स्वयं चलितुं न पार्यते समर्थः ततस्त्वरादाय गच्छामि यथा त्वया सह अन्यत्र रतिसुखं भजामि सोऽब्रवीत् रोचते मे यं तत्त्वं प्रत्यूषे
प्यत्रस्थाने शीघ्रमेव समागंतव्यं येन शुभं दरं किंचिन्नगरं गत्वा त्वया सह जीवलोकः सफलीक्रियते साऽपि तथेति प्रतिज्ञाय प्रहसितव
दना स्वगृहं गत्वा रात्रौ प्रसुप्ते भर्त्तरि सर्वं वित्तमादाय प्रत्यूषसमये कथितस्थानमुपागमत् धूर्तोऽपि तामग्रे विधाय दक्षिणां दिश
माश्रित्य प्रस्थितः एवं स गच्छन् तया सह वार्तासुखमनुभवन् योजनमात्रद्वयेन व्यतीते नैकां नदीं दृष्ट्वा चिंतयामास किमहं
एतया यौवनजरत्या करिष्यामि किंच कदाचिदस्याः पृष्ठतः कोऽपि समेष्यति ततः सुमहाननर्थः स्यात् केवलं अस्या वित्तमादा
य गच्छामीति संचिंत्य तामुवाच प्रिये दुस्तरेयं महानदी तदहं द्रव्यमात्रं पारे धृत्वा समागच्छामि यथा त्वामेकाकिनीं पृष्ठमारो
प्य सुखेनोत्तारयामि साऽब्रवीत् एवं क्रियतां तत् त्वया सर्वं वित्तमादाय पुनरप्याह भद्रे परिधानाच्छादनवस्त्रमपि समर्पय
येन जलमध्ये निःशंका सती व्रजसि तथाऽनुष्ठिते धूर्तोऽपि वित्तं वस्त्रयुगलं चादाय यथाचिंतितं विषयं गतः साऽपि कंठविनिवेशित
हस्तयुगला सोद्वेगा नदीतीरे यावदुपविष्टा तिष्ठति तावत्कायित् शृगालिका गृहीतमांसपिंडा तत्राजगाम आगत्य च यावत्प
श्यति तावन्नदीतीरे महान्मत्स्यः सलिलान्निष्क्रम्य बहिः स्थित आस्ते तं च दृष्ट्वा सा मांसपिंडमुत्सृज्य तं मत्स्यमभिदुद्राव अत्रा
न्तरे आकाशात्कोऽपि गृध्रस्तं मांसपिंडमादायोत्पपात मत्स्योऽपि शृगालिकां दृष्ट्वा नद्यां प्रविवेश अथ सा शृगालिका व्यर्थ
श्रमा गृध्रमवलोकयंती नग्निकया सस्मितमभिहिता गृध्रेणापहृतं मांसं मत्स्योऽपि सलिलं गतः मत्स्यमांसपरिभ्रष्टे
किं पश्यसि जंबुके तच्छ्रुत्वा शृगालिका तामपि पतिधनजारभ्रष्टां दृष्ट्वा सोपहासमाह यादृशं मम पांडित्यं तादृ
शं द्विगुणं तव नाऽपि जारो न भर्ता च किं पश्यसि नग्निके इति नवमी कथा एवं तस्य कथयतः पुनरन्येन जलचरेण

पं.तं.४ गत्वा निवेदितम् यदहो त्वदीयं गृहमपि अपरो महामकरेण गृहीतं ततः कुलालो अतिदुःखितमनास्तं गृहान्निःसारयितुमुपायं चिंतयन्
८ वाच अहो पश्यत ममैव दैवहतकस्य यत्किल मित्रं चामित्रतां यातम् अपरं मे प्रिया मृता गृहमन्येन च व्याप्तं किमद्यापि भविष्यति अ
थवा युक्तमिदमुच्यते क्षते प्रहारा निपतंत्यभीक्ष्णमन्नक्षये वर्द्धते जाठराग्निः आपत्सु वैराणि समुद्भवंति छिद्रेष्वनर्था बहुली
भवंति तत्किं करोमि अनेन सह युद्धं किं वा साम्नैव संबोध्य गृहान्निःसारयामि किं भेदं दानं वा करोमि अथवाऽमुमेव वानरमित्रं
पृच्छामि उक्तं च यतः यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान् स्वहितान् गुरून् न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि इति विचिंत्य
स्योऽपि जंबूवृक्षमारूढं तमपृच्छत् भो मित्र तदहं त्वां पृच्छामि कथय किं करोमि सामादीनामुपायानां मध्ये कस्यात्र विषयः
घ्न स आह भोः कृतघ्न मे यानिषिद्धोऽपि किं भूयो मामनुसरसि नाहं तव मूर्खस्योपदेशमपि ददामि उक्तं च यतः उपदेशो न दात
व्यो यादृशे तादृशे जने पश्य वानरमूर्खेण सुगृही निर्गृही कृता मकर आह कथमेतत् वानरः कथयति अस्ति कस्मिं
श्चिदरण्ये वृक्षशाखायां कृतकुलायं पक्षिदंपती प्रतिवसतः स्म अथ कदाचिन्माघमासे अकालवर्षवृष्टिसमाहतवात
कंपिततनुः कश्चिद्वानरस्तद्वृक्षमूलमुपगतः सोऽपि दंतवीणां वादयन् अतिदीनः संकुचितकरचरणस्तया सानुकंपमभिहि भि
तो यथा हस्तपादसमायुक्तो दृश्यसे पुरुषाकृतिः शीतवाताहतो मूढ कथं न करिष्यसि गृहम् सोऽपि तदाकर्ण्य चिं
नयत् अहो आत्मसंतुष्टो जीवलोकः यदेषापि क्षुद्रचटिका आत्मानं बहु मन्यते उक्तं च यतः स्वचित्तकल्पितो गर्वः राम
कस्य नात्र न विद्यते उत्क्षिप्य टिट्टिभः पादौ शेते भंगभयाद्दिवः एवं विचिंत्य तामाह सूचीमुखि दुराचारे रंडे पंडित ८
मानिनि तूष्णीं भव किं मामिति न वदसि नो चेत् निगृह्णामि अहम् एवं तेन सा निषिद्धापि पुनः पुनराश्रयकरणोपदेशेन

तस्युद्देजयति तदासोतं दृष्ट्वा समारुह्य तस्याः कुलायं स्वं डशः कृत्वा बभंज अतोहं ब्रवीमि उपदेशो न दातव्य इति ॥ इति द्वामीकथा ॥ पु
नरपि वानर आह नाहं ते कथंचित् आभिपद्यार्थ्यो वाक्येनाहं भवता समुद्रे प्रक्षेप्तुं नीतः तदेव न ... यद्यप्यतीव वल्लभा भार्या
तदपि तद्वाक्येन मित्रबांधवादयः समुद्रे किं प्रक्षिप्यंते तच्छ्रुत्वा मकरः प्राह भद्र यद्यप्येवं तथापि सर्वस्य साम्प्रदो न मित्रवि
चिंत्य किंचिन्ममहितं समुपादिश उक्तं च यतः उपदेशस्य दातॄणां नराणां हितमिच्छता परस्मिन्निह लोके च व्यसनं नोपपद्य
ते तत्सर्वथा कृतघ्नोपि कुरु प्रसादमुपदेशदानेन उक्तं च उपकारिषु यः साधुः साधुत्वे तस्य को गुणः अपकारिषु यः सा
धुः स साधुः सद्भिरुच्यते तदाकर्ण्य वानर आह भद्र यद्येवं तर्हि तत्रागत्वा तेन सह युद्धं कुरु उक्तं च यतः उत्तमं प्रणिपातेन शूरं
भेदेन योजयेत् नीचमल्पप्रदानेन समं तथा हि पराक्रमैः मकर आह सोब्रवीत् अस्ति कस्मिंश्चिद्वनोद्देशे महाचतुरको ना
म शृगालः तेन कदाचिदरण्ये स्वयं मृतो गजः समासादितः तस्य परं तस्य समंतात् परिभ्रमति कठिनां त्वचं भेत्तुं न शक्नोति अ
त्रावसरे इतश्चेतश्च परिभ्रमन् कश्चित् सिंहस्तत्रैव वनोद्देशे समायायौ अथ तमागतं दृष्ट्वा ससंभ्रमं क्षितितलविन्यस्तमौलिमंडल
संयोजितकरकमलः सविनयमुवाच स्वामिन् त्वदीयोहं लागुडिकः त्वदर्थे गजमिमं रक्षामि तदेनं भक्षयतु स्वामी अथ त
सिंह आह भो नाहमन्यहतं कदाचिदपि भक्षयामि तत्तवैव गजोयं मया प्रसादीकृतः तच्छ्रुत्वा शृगालः सानंदमाह
युक्तमिदं स्वामिनो निजभृत्येषु अथ सिंहे गते कश्चिद्व्याघ्रस्तत्रायातः तमपि दृष्ट्वा व्यचिंतयत् एकस्तावद्दुरात्मा प्र
णिपातेनापवाहितः तत्कथमिदानीमेनमपवाहयिष्यामि नूनं शूरोयं न खलु भेदं विना साध्यो भवति उक्तं च य
त्र न शक्यते कर्तुं सामदानमथापि वा भेदस्तत्र प्रयोक्तव्यो यतो सौ वशकारकः किंच सर्वेपि भेदेन बध्यंते उक्तं

त्यक्ते

पं.तं.४ अंतस्थेनाविरुद्धेनसुवृत्तेनातिचारुणा अंतर्भेदेनसंप्राप्तंमौक्तिकेनापिबंधनम् एवंसंप्रधार्यतदभिमुखोगत्वाद्बद्धुन्नतकंधरःस
संभ्रममुवाच मामकिमत्रभवान्मृत्युमुखेप्रविष्टः येनैषसिंहेनगजोव्यापादितः समांतद्रक्षणेनियुज्य स्वयंस्नानार्थंगतस्ते
१० नचगच्छतासमादिष्टं यदिकश्चिदिहव्याघ्रःसमागच्छतितत्त्वयासुगुप्तंममावेदनीयं येनवनमिदंमयानिर्व्याघ्रंकर्तव्यम्
यतःपूर्वंव्याघ्रेणैकेनव्यापादितोगजःशून्येउच्छिष्टतांनीतः तद्दिनादारभ्यव्याघ्रान्प्रतिकुपितोस्मि अथतत्श्रुत्वाव्या
घ्रःसंत्रासमाह भोभागिनेयदेहिमेप्राणदक्षिणाम् यतस्त्वयातस्यात्रचिरायमदीयाकापिवार्तानाख्येयेत्येवमभिधाय
सत्वरंपलायांचक्रे अथगतेव्याघ्रेतत्रकश्चिद्द्वीपीसमागतस्तमपिदृष्ट्वाव्यचिंतयत् दृढदंष्ट्रोयंचित्रकःतदस्मादेवगज
चर्मभेदंकारयामि इतिनिश्चित्यतमुवाच भोभागिनीसुतकिमितिचिराद्दृष्टोसि कथंबुभुक्षितइवलक्ष्यसे तदति
थिरसिमे उक्तंच समयाभ्यागतातिथिरिति तदेषगजःसिंहेनहतस्तिष्ठति अहंचास्यतदादिष्टोरक्षपालः परंतथा
पियावदसौनसमायातितावदस्यगजस्यमांसंभक्षयित्वातृप्तिंकृत्वाद्रुततरंव्रज सआह मामयद्येवंतन्नकार्यं
मेऽस्यमांसेन यतोजीवन्नरोभद्रशतानिपश्यति तत्सर्वथातदेवभुज्यते यदेवपरिणामतिनदहमितोऽपयास्या
मि शृगालआह भोवीरावश्रब्धोभूत्वाभक्षय तस्यागमनंदूरतोपितवाहमावेदयिष्यामि अथद्वीपिनातथा
नुष्ठितेभिन्नांत्वचंविज्ञायतथाभिहितंजंबुकेन भोभगिनीसुतगम्यतांगम्यतां एषसिंहः समायाति तत्श्रु रातः
त्वाचित्रकोपिदूरंप्रणष्टः अथयावदसौतद्भेदकृतद्वारेणमांसंभक्षयतितावदतिसंक्रुद्धोऽपरःशृगालः १०

समायेयो ऽत्यंतमात्मतुल्यं ज्ञानपराक्रमं दृष्ट्वा उत्तमं प्रणिपातेनेत्यादि श्लोकं पठन् तदभिमुखः कृतप्रयाणः स्वदंष्ट्रा
भिस्तं विदार्य दिगंतभाजं कृत्वा स्वयं सुखेनाचिरकालं हस्तिमांसं बुभुजे एवं त्वमपि निजरिपुं संजातं छद्मेन परिभूय
दिगंतगतं कुरु नो चेत् प्रवृद्धमूलात् तस्मात् त्वमपि विनाशमवाप्स्यसि उक्तं च यतः संभाव्यं गोषु संपन्नं संभाव्यं ब्रा
ह्मणे तपः संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयम् इत्येकादशी कथा ऽत्यंत च यतः सुभक्ष्याणि विचि
त्राणि शिथिलाः पौरयोषितः एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते मकर आह कथमेतत् वानरो ऽब्रवीत् अस्ति
कस्मिंश्चिदधिष्ठाने चित्रांगो नाम सारमेयः तत्र चाचिरकालं दुर्भिक्षं संपतितं अन्नाभावात् सारमेयाद्याः निःकु
लतां गंतुमारब्धाः अथ चित्रांगः क्षुत्क्षामकंठस्तद्भयादन्यदेशांतरं गतः तत्र कस्मिंश्चित्पुरे कस्याश्चिद्गृहमेधिनो चि
गृहिण्याः प्रसादेन प्रतिदिनं गृहे प्रविश्य विविधान्नानि भक्षयन् परां तृप्तिं गच्छति परं तद्गृहाद्बहिर्निष्क्रामन् अन्यैर्मदोद्धतसा
रमेयैः सर्वासु दिक्षु परिवृत्य सर्वांगं दंष्ट्राभिर्विदार्यते ततस्तेन विचिंतितम् वरं स्वदेशो यत्र दुर्भिक्षेणापि सुखेन स्थी
यते न च कोपि युद्धं करोति तदहं स्वनगरं व्रजामीति अवधार्य स्वस्थानं गतः अथासौ देशांतरादायातः स्वज
नैः पृष्टो भोः कथय चित्रांग कीदृग्देशः किं चेष्टो लोकः कश्चाहारः को विहारस्तत्रेति स चाह किं कथ्यते देशस्य
क्षमिदम् शिथिलनार्य इत्यादि इति द्वादशी कथा सोपि तदुपदेशं श्रुत्वा कृतमरणनिश्चयो वानर

पंचतंत्र.४ नतु शाप्यशाप्यवनिजाश्रयेते नरककुंडे अविहेन स्नातंताचिनासह विग्रहं कृत्वा दृढसत्वावष्टंभाद्युतं व्यापादयत्वा
११ श्रयं चलघ्वा सर्वेन चिरकालं भातिष्ठत साधिदमुच्यते श्रकृत्वा पौरूषं याश्रीः किं तयापि हतभाग्यथा कुरं
गोपि समश्नाति दैवादुपगतं तृणम् इतिश्री विष्णुशर्मणा कृते पंचतंत्राख्ये नीतिशास्त्रे लब्धप्रणाशन
नाम चतुर्थं तंत्रम् ॐ शाके १६७० कार्तिकशुक्लत्रयोदश्यां रवौ लिखितं देवकीनंदन श्रीशुभमस्तु

श्रीः॥ अपरीक्षितकारितं नाम पंचमं तंत्रमारभ्यते यस्यायमाद्यश्लोकः कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् तन्नरेण न कर्तव्यं नापितेन यथा कृत-
म् राजपुत्राः पृच्छंति कथमेतत् विष्णुशर्मा कथयति अस्ति दाक्षिणात्ये जनपदे पाटलीपुत्रं नाम नगरं तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति
स्म तस्य धर्मार्थकाममोक्षान् कुर्वतो विधिवशाद्धनक्षयः संजातः ततस्तस्माद्विभवक्षयात् अपमानपरंपरया परं विषादमुपगतो रात्रौ चिं-
तितवान् अहो धिगियं दरिद्रता उक्तं च यतः शीलं शौचं क्षांतिर्दाक्षिण्यं मधुरता कुले जन्म न विराजंति हि सर्वे वित्तविहीनस्य पुरुषस्य मानो
वा दर्पो वा विज्ञानं विभ्रमः सुबुद्धिर्वा सर्वं नश्यति सहसा विभवविहीनो यदा पुरुषः प्रतिदिनमुपयाति विलयं वसंतवाताहतेव शिशिरश्रीः
बुद्धिर्बुद्धिमतामपि कुटुंबभरचिंतया सततम् विपुलमनसोऽप्यनल्पं नश्यति बुद्धिः पुरुषस्य विभवहीनस्य घृतलवणतैलतंडुलवस्त्रेंधनचिंतयास-
ततम् न विभाव्यंते लघवो वित्तविहीनाः पुरोपि निवसंतः सततं जातविनष्टाः पयसामिव बुद्बुदाः पयसि विरसयति नैव लोकः कामं गर्जंतमपि प-
तिं पयसाम् सर्वमलज्जाकरमिह यद्यत्कुर्वंति परिपूर्णाः इत्येवं संप्रधार्य भूयोप्यचिंतयत् तदहमनशनं कृत्वा प्राणानुत्सृजामि किम-
नेन व्यर्थजीवितव्यसनेन एवं निश्चयं कृत्वा प्रसुप्तः अथ तस्य स्वप्ने पद्मनिधिः क्षपणकरूपः संदर्शनं कृत्वा प्रोवाच भोः श्रेष्ठिन् मा त्वं वैराग्यं
गच्छ अहं पद्मनिधिस्तव पूर्वपुरुषोपार्जितः तदनेनैव रूपेण प्रातस्तव गृहं समागमिष्यामि तत्त्वयाहं शिरसि लगुडप्रहारेण हंत-
व्यो येन कनकमयोऽक्षयो भवामीति अथ प्रातः संबुद्धः सन् स्वप्नं चिंतयन्स्तिष्ठति अहो स्वप्नोयं सत्योऽसत्यो वा भविष्यतीति न ज्ञाय-
ते अथवा नूनं मिथ्यानेन भाव्यम् यत्कारणादहमहर्निशमेव केवलं चिंतयामि उक्तं च यतः व्याधितेन सशोकेन चिंताग्रस्तेन जं-

पं.तं. ५ तुना कामार्त्तेनार्थिमत्तेन दृष्टः स्वप्नः फलोस्थितः एतस्मिन्नंतरे तद्भार्य्यया कश्चिन्नापितो नखप्रक्षालनार्थं समायातः ततस्तस्याः सोपि प्रक्षालनकर्म
१ समाचरन्ति तावत्क्षपणकः सहसा प्रादुर्भूतः अथ मणिभद्रस्तं समालोक्य प्रहृष्टमना आसन्नकाष्ठखंडेन शिरसि अताडयत् सोपि सुव
र्णमयो भूत्वा तत्क्षणात् भूमौ निपपात अथासौ वणिक्कृतं गृहमध्ये संस्थाप्य नापितं संतोष्य प्रोवाच भद्र न कस्यचिदाख्येयोयं वृत्तां
तः नापितोपि तद्वचनमंगीकृत्य स्वगृहं गत्वा व्यचिंतयत् नूनं सर्वेप्येते शिरसि काष्ठदंडाहता नग्नकाः कांचनमया भवंति तदहमपि प्रात
स्तान्प्रभूतानामेव लगुडेहन्मि येन प्रभूतं हाटकं भवति इत्येवं तस्य चिंतयतस्तद्दिनं निशा च कथमपि व्यतिक्रामं अथ प्रभाते समुत्था
य क्षपणकविहारं गत्वा उत्तरासंगं विधाय जिनस्य प्रदक्षिणात्रयं दत्वा जानुभ्यामवनीं गत्वा वक्त्रद्वारविन्यस्तोत्तरीयपल्लवः कृतांजलि
रुच्चारस्वरेण इमं श्लोकमपठत् जयंति ते जिना येषां केवलज्ञानशालिनाम् मनोभवाभिधबीजे मानसेनोषरायितम् अन्यच्च सा जिह्वा
या जिनं स्तौति तच्चित्तं यत्तदर्पितम् तावेव च करौ श्लाघ्यौ यौ तत्पूजाकरौ करौ इत्येवमन्यदपि बहुधा संस्तुत्य ततः प्रधानक्षपणक
मासाद्य क्षितितलनिहितजानुचरणो नमोस्तु वंदे इत्युच्चार्य लब्धधर्मवृद्ध्याशीर्वादः सुकुमारिकाभिगृहीतव्रतादेशः सन् प्रश्रयमिदमाह भगवन्
अद्य भूयविहरणक्रियायां समस्तमुनिसमेतैरस्मद्गृहे कर्तव्येति स आह भो श्रावक धर्मज्ञोपि किमेवं वदसि किं ब्राह्मणा वयं यदामंत्र राम:
णं करोषि वयं सदैव तत्कालं चर्यया भ्रमन्तो भक्तिभाजं श्रावकमवलोक्य तस्य गृहे गच्छामः तच्छ्रुत्वा तेन भूयोप्येवं वाच्यमनुकृत्वा
नापितः प्राह भगवन् वेद्म्यहमेतत् तत्कालं करिष्यामि परं भवतां प्रभूताः श्रावकाः अर्हणां कुर्वन्ति अस्माभिः पुस्तकाच्छादनयोग्यपट्ट १

कर्पटानि च गुणीकृतानि संति पुस्तकानां लेखनाय लेखकानां च भवितव्यं दत्तं सर्वं कुरु । नोचितं कर्त्तव्यमिति एवमुक्त्वा स्वगृहं प्रति प्र-
स्थितः तत्र गत्वा खदिरमयं लगुडं सज्जीकृत्य कपाटकोणैकदेशे संस्थाप्य सार्द्धप्रहरोद्देशे भूयोपि विहारद्वारमाश्रित्य स्थितः
ततश्च सर्वान् क्रमेण गच्छतो गुरुप्रार्थनया स्वगृहमनयत् तेपि कर्पटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान्परित्यज्य
प्रहृष्टास्तस्य पृष्ठतो जग्मुः अथवा साध्विदमुच्यते एकाकी गृहसंत्यक्तः पाणिपात्रो दिगंबरः सोपि संवाध्यते लोके तृ-
ष्णया पश्य कौतुकम् ततो नापितोपि गृहमध्ये तान्प्रवेश्य द्वारं लकुडप्रहारैरताडयत् तेपि ताड्यमानाः केचिन्मृत्युमुपागताः
अन्ये भिन्नमस्तकाः फूत्कर्तुमारेभिरे अत्रांतरे तमाक्रंदध्वनिमाकर्ण्य पुरकोट्टपालपुरुषैरभिहितं भो भोः किमेतन्नगरमध्ये
महान्कोलाहलः तद्गम्यतामिति वदंतस्ते सर्वे यावद्वेगात्कृत्वा पश्यंति तावत्क्षपणकाः रुधिरप्लावितशरीराः नापितगृहा-
त्पलायमाना दृष्टाः पृष्टाश्च भोः किमेतत् ते प्रोचुः यथावस्थितनापितवृत्तांतं तैरपि नापितो दृढबंधनबद्धो हतशेषैः
क्षपणकैः सह धर्माधिष्ठानं नीतः कारणिकैः पृष्टश्च भोः किमेतद्भवता कुकृत्यमनुष्ठितं सोब्रवीत् भोः करोमि
एतदपि किं अभिधायते मां माणिभद्रवृत्तांतमकथयत् ते च माणिभद्राकारणाय कश्चित्प्रेषितः तेन वेगात्माणिभद्रः स-
मानीतः तैः स पृष्टः भो श्रेष्ठिन् किं त्वया कश्चित्क्षपणको व्यापादितः यतस्तेनापि सर्वः क्षपणकवृत्तांतः कथितः
अथ तैरभिहितं अहो शूले आरोप्यतामसौ कुपरीक्षितकारी दुरात्मा नापितस्तथानुष्ठितैरभिहितम् कुकृतं कु-
परीक्षितेति इत्येका कथा अथवा साध्विदमुच्यते अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम् पश्चाद्भवति सं-
तापो ब्राह्मणी नकुलं यथा माणिभद्र आह कथमेतत् ते प्रोचुः अस्ति कस्मिंश्चिदधिष्ठाने देवशर्मा नाम ब्राह्मणः

तस्यभार्यापुत्रमेकंनकुलंचप्रसुषुवे अथसासुतवत्सलासुतवन्नकुलमपिस्तनदानाभ्यंगमर्दनादिभिःपुपोष परमेषकुष्टजातित्वा
त्कदाचिल्सुतस्याविरुद्धमाचरिष्यतीतिननकुलस्याविश्वसिति अथवासाध्विदमुच्यते कुपुत्रोपिभवेत्पुंसांहृदयानंदकारकः
दुर्विनीतःकुरूपोपिमूर्खोपिव्यसनीखलः अथसाकदाचित्पुत्रंशय्यायांसुस्थितंविधायजलकुंभमादायपतिमुवाच भो
उपाध्यायजलार्थमहंयास्यामि पुत्रोयंभवतानकुलाद्रक्षणीयः अथगतायांतस्यांब्राह्मणोपिगृहंशून्यंकृत्वास्वयम
पिभिक्षार्थंनिर्ययौ अत्रांतरेकृष्णसर्पोबिलान्निष्क्रम्यदैववशात्तस्यबालकस्यपर्यंकांतिकमागमत् अथनकु
लंस्वभाववैरिणंमत्वाभ्रातृवधशंकयाअंतरालेसन्निपत्यदुष्टसर्पेणसहसंग्रामंविधायतंखंडशोविधायदूरत
श्चिक्षेप ततोनिजशौर्यप्रमुदितोरुधिराप्लुतमुखःस्वव्यापारप्रदर्शनायमातुःसंमुखमाजगाम मातापितंरुधिरक्लिन्न
मुखमतिसंरब्धमागतंतमवलोक्यनूनंभक्षितोनेनदुरात्मनाममदारकइतिशंकिताचित्ताकोपादविमृश्यतस्योपरि
जलकुंभंचिक्षेप कुंभपातमात्रेणगतजीवितम् नकुलंतत्रैवावगणय्ययावत्स्वगृहंगच्छति तावद्बालस्तथैवास्तेपर्यंका
न्तिकेचमहान्तंकृष्णसर्पंखंडशःकृतंददर्श अथसाउपकारकपुत्रस्यानालोचितकृतवधशोकेनदुःखितहृदयाआ
त्मशिरोवक्षःस्थलादिताडनमकरोत् एतस्मिन्नंतरेब्राह्मणोपिकुलाद्भिक्षांगृहीत्वानिश्वासकःपरिभ्रम्यदैवादागतः
पश्यतितावत्पुत्रशोकाभिभूताब्राह्मणीविलपति भोभोलोभाभिभूतेनभवतायन्नकृतंममवचनंतदनुभवसां रामः
प्रतंनिजपुत्रमृत्युदुःखवृक्षफलम् इतिद्वितीयाकथा अथयाभवत्येतदतिलोभाभिभूतानाम् अतिलो २
भोनकर्तव्योलोभंनैवपरित्यजेत् अतिलोभाभिभूतस्यचक्रंभ्रमतिमस्तके ब्राह्मणआह कथमेतत् [illegible]:

ब्राह्मणी कथयति ऐहिकं कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः परस्परं दृढसौहृदाः प्रतिवसंति स्म ते चापि अतिशयदारिद्र्योपहता मं
त्रयांचक्रुः अहो धिगियं दारिद्र्यभावः उक्तं च यतः स्वामी द्वेष्टि सुसेवितोपि सहसा प्रोज्झंति सद्बांधवाः छीयंते तेन गुणास्त्यजंति तनु
जाः स्फारीभवंत्यापदः भार्या नो सुमवंशजापि भजते नायांति मित्राणि च न्यायारोपितविक्रमाण्यपि नराणां येषां न स्याद्धनं ।
किंच शूरः सुरूपः सुभगश्च वाग्मी शास्त्राणि सर्वाणि विदां करोतु अर्थं विना नैव कलाकलापं प्राप्नोति मर्त्योत्र मनुष्यलोके
तद्वरं मरणं न निर्धनत्वं उक्तं च उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं मम श्रांतस्तावदहं चिरान्मरणजं सेवे त्वदीयं सुखं
साग ८ इत्युक्तो धनवर्जितेन सहसा गत्वा श्मशाने शवो दारिद्र्यान्मरणं परं सुखमिति ज्ञात्वैव तूष्णीं स्थितः तत्सर्वथा अर्थोपार्जने प्र
यतामहे उक्तं च नहि तद्विद्यते किंचिद्यदर्थेन न सिद्ध्यति यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् सर्वार्थः पु
वाणां षड्भिरुपायैर्भवति भिक्षया नृपसेवया कृषिकर्मणा विद्यार्जनेन व्यवहारेण वणिक्कर्मणा च परं सर्वेषामप्येतेषां मध्ये
वणिक्कर्मणा निरपाकोर्थलाभः उक्तं च कृता भिक्षा सैर्विवलति नृपाणामपि मनः कृषिः क्लिष्टा विद्या विनयगुरवे
त्यातिविषमा कुसीदाद्दारिद्र्यं परकरगतग्रंथिकरणान्नवान्यच्छालिक्यात्किमपि सुखवर्तनमहो तच्च वाणिज्यं
सप्तधा वित्तागमाय स्यात् तद्यथा कूटतुलामानं मिथ्याक्रयकथनं निक्षेपप्रवेशः परिचितग्राहकागमो गांधिक
कर्म गांधिकव्यवहारो देशांतरभांडानयनं चेति उक्तं च पूर्णापूर्णे माने परिचितजनवंचनं तथा नित्यं मिथ्याक्र
यस्य कथनं स्वभावरूपं किराटानाम् अन्यच्च निक्षेपगृहपतितश्रेष्ठी संस्तौति देवतां नित्यम् निक्षेपशोस्त्रियतां

पंचतंत्र ५ दारुपायमुपायाचित्तं तनुभ्यस्य तथाच गोष्ठिककर्मनियुक्तः श्रेष्ठी चिंतयति चेतसा हृष्टः वसुधा वसुसंपूर्णा मयाप्ता हि मयाद्य किम
३ न्येन अपरंच परिचितानां गौष्ठिकैः परिपक्वमनोः कांचनादिभिः गच्छतो हि प्रयेदकैः ननु सहस्रेणादीयते देशांतरभांडानय
नं च विस्तवतामेवाहति उक्तंच प्रेक्षास्थाद्द्विगुणं वित्तं संभूय तत्तेपि दूरतः ते धैर्यस्थानि वध्यंति जैर्स्वयमहागजानिव द्विगु
णं त्रिगुणं वित्तं क्रयविक्रयकोविदाः प्राप्नुवंत्युद्यमाल्लोकाः दूरदेशांतरंगताः किंच सुभीताः परदेशेभ्यो बहुकालेभ्याः
प्रमादिनः स्वदेशे निधनं यांति काकाः कापुरुषा मृगाः इत्येवं संप्रधार्य देशांतरगमनं च निश्चित्य गृहं स्फ ह्लनंतप
रित्यज्य चत्वारोपि प्रस्थिताः अथवा साधु इदमुच्यते सत्यं परित्यज्य निजं बांधवं धुर्वागौरी ह्य विहाय जननीमपि जन्म
भूमिम् संत्यज्य गच्छति विदेशमभीष्टलोकं चिंताकुलीकृतमतिः पुरुषः किमन्यत् एवं च क्रमेणावंतीविषयं प्राप्ताः
तत्रैव शिप्राजले स्नात्वा श्रीमहाकालं देवं प्रणम्य यावद्यतो गच्छंति तावद्भैरवानंदो नाम योगी ऽः संमुखो बभूव
तं च ब्राह्मणोचितविधिना संभाव्य तेन सर्वे तेन सह तदीयमायतनं जग्मुः अथ ते योगिना पृष्टाः कुतो भवंतः क्व वा
सां यास्यथ किं प्रयोजनं ततस्तैरभिहितं वयं सिद्धियात्रिकाः तत्र यास्यामो यत्र धनं प्राप्स्यामो मृत्युर्वेति एष नि यं
श्चयः उक्तं च यतः पतति कदाचिन्नभसः खाते पातालतोपि जलमेति दैवमचिंत्यं बलवद्बलवान्ननु पुरुषका राम:
रापि तथा च अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण दैवमिति यदपि कथयसि तदपि पुरुषगुणो ८ ३
सोप्यदृष्टाख्यः क्लेशस्यांगमदत्त्वा सुखमेव सुखानि नेह लभ्यंते मधुभिन्मथनायस्तैराश्लिष्यति बाहुः

मित्रं स्तोम तत्कथ्यतामस्माकं कश्चिद्धनोपायो विवरप्रवेशशाकिनीसाधनश्मशानसेवामहामांसविक्रयसाधकवर्तिप्रभृतीनां वचोऽत्यद्भुतसिद्धिः श्रूयते
वयं चातिसाहसिकाः उक्तं च महान्तस्ते महतामर्थं साधयितुं क्षमाः ऋते समुद्रादन्यः को बिभर्ति वडवानलं सोऽपि तेषां शिष्यो
त्पादनयोग्यतां विज्ञाय सिद्धवर्तिचतुष्टयं कृत्वा प्रत्येकं समर्पयामास. आह च. गम्यतां हिमालयकोत्तरदिग्भागे यत्र यस्य वर्तिः
पतति तत्र तेनासंदिग्धं निधिरवाप्य ततस्ते यथोक्तेन योगेन गच्छतामग्रयायिनो यस्य वर्तिः करान्निपपात अथासौ यावत्तं प्रदेशं खनति ता
वत्ताम्रमयी भूमिस्ततस्तेनाभिहितं अहो गृह्यतां यथेष्टं ताम्रमिदं अथान्ये प्राहुः भो किमनेन यत्प्रभूतमपि दारिद्र्यं न नाशयति तत्
उत्तिष्ठ गच्छामः सोऽब्रवीत् यान्तु भवन्तो नाहमन्यतः समेष्यामि एवमभिधाय ताम्रमादाय प्रथमो निवृत्तः शेषास्त्रयोऽप्यग्रतः प्रस्थि
ताः अथ यावत्किंचिन्मात्रं गतस्याग्रेसरस्याग्रे वर्तिर्निपपात सोऽपि यावत्खनति तावद्रौप्यमयी भूमिः ततः प्रहर्षितः आह भो
गृह्यतां यथेच्छं रौप्यं नाग्रे गन्तव्यं तावूचतुः भो पृष्ठतस्ताम्रमयी भूमिरग्रतो रौप्यमयी भूमिस्तन्नूनमग्रे सुवर्णमयी भूमिर्भविष्यति तदनेन प्रभू
तेनापि न तथा दारिद्र्यनाशो भवति तदावामग्रे यास्यावः सोऽब्रवीत् यातौ भवन्तौ नाहमागमिष्यामि एवमभिधाय रौप्यं गृहीत्वा स्वगृहं निवृत्तः
अथ तयोरपि गच्छतोरेकस्य वर्तिर्निपपात सोऽपि यावत्खनति तावत्सुवर्णमयी भूमिस्तां दृष्ट्वा प्रहृष्टो द्वितीयमाह भो गृह्यतां
यथेच्छं सुवर्णं नातःपरं किंचिदुत्तमं भविष्यति सोऽब्रवीत् मूढ किं न वेत्सि प्राक् ताम्रं ततो रूप्यं ततः सुवर्णं तन्नूनमतः परं
रत्नानि भविष्यन्ति तदुत्तिष्ठ अग्रतो गच्छावः किमनेन भारभूतेनापि भारेण तेन सोऽब्रवीत् गच्छतु भवान् अहमत्र स्थितः
त्वां प्रतिपालयिष्यामि ततः सोऽपि गच्छन्नेकाकी ग्रीष्मार्ककिरणसंतप्तगात्रः पिपासाकुलितचित्तः सिद्धिमार्गमितश्चे
तश्च बभ्राम अथ स भ्रमन्स्थलोपरि मस्तकोपरि परिभ्रमच्चक्रं रुधिराप्लावितकलेवरं पुरुषमपश्यत् ततो द्रुततरं गत्वा

पंचतंत्र ५ तमपृच्छत् कोभवान्किमेवंशिरसिभ्रमता चक्रेणतिष्ठसि तत्कथयमेकुत्रचित्पानीयमस्ति यतस्तृषार्तोस्मि एवंतस्यवदतस्तच्चक्रंतत्क्ष
४ णादेवतन्मस्तकाद्ब्राह्मणशिरसिसमारुरोह सोऽब्रवीत् भद्रकिमेतत् सप्राह ममाप्येवमेवैतच्छिरस्यारूढं चक्रधरप्राह त
कथयत्वंकदाएतदपसरिष्यति महतीमेवेदनावर्तते सप्राह यदात्वमिवकोपिधृतसिद्धवर्तिर्हस्तःसमागत्यएवमालापयिष्य
तितदातस्यमस्तकसमारोक्ष्यति सोऽब्रवीत् कियान्कालस्तवैवंस्थितस्य सोऽब्रवीत् सांप्रतंकोराजाधरणीतले चक्रधरप्राह
वीणावत्सराजः प्रत्युषप्राह रामोराजाआयेदासीत् तदाहंदारिद्र्योपहतःसिद्धवर्तिमादायत्वमिवसमागतस्ततोमयान्यपुरुष
धृतचक्रमस्तकोदृष्टश्च ततस्तेवंपृष्टस्तदेवममापिशिरसितन्मस्तकाच्चक्रमारुरोह परंकालसंख्यांनवेद्मि चक्रधरःप्रा
ह भद्रकथंतर्हिएवंस्थितस्यभोजनप्राप्तिरासीत् प्रत्युषप्राह भद्रधनदेननिधानहरणभयात्सिद्धानामेतद्भयंदर्शितम्
येनकश्चिदपिनागच्छति अथकथमपिकश्चिदायातिभद्रसक्षुत्पिपासारहिताजरामरणवर्जितःकेवलमित्थंवेदना
मनुभवतीतितदनुज्ञापयमांमोचितोस्मित्वया अत्रप्रव्राद्नर्था तत्सांप्रतंस्वगृहंयास्यामिइत्युक्त्वागतः अथतस्मि
न्गतेकथंमेसहायोचिरायतीतितदन्वेषणपरस्तत्पदपंक्त्यानुसारेणस्वर्णसिद्धिःप्रस्थितः यावत्किंचिन्मार्गांतरंगच्छति
तावद्रुधिरप्लावितशरीरंतीक्ष्णचक्रेणमस्तकोपरिपरिभ्रमतासवेदनातंसस्वरंददर्श ततस्तत्समीपवर्तिनाभूत्वा
सवाष्पंपृष्टः भद्रकिमेतत् सोऽब्रवीत् विधिविलसितं सप्राह कथयकिमेतत्सोपितेनपृष्टःसर्वंचक्रवृत्तांतमवेद रामः
यत् तच्छ्रुत्वासौतंविगर्हयामास भोस्त्वंमयानिषिद्धःपरंबुद्धिहीनत्वान्मद्वाक्यंनश्रुतवान् इतिनितीयाकथा ४
अथवासाधुचेदमुच्यते वरंबुद्धिर्नसाविद्याविद्यातोबुद्धिरुत्तमा बुद्धिहीनाविनश्यंतियथातेसिंहकारकाः ४ १
२चक्रधरोभिभ्रष्टलोभोनकर्तव्यइति २

चक्रधरः पृछति तत्कथमेतत् सुवर्णसिद्धिः कथयति कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः परस्परं मैत्रीभावमुपगताः संवसंति स्म तेषां
त्रयः सर्वशास्त्रपारगाः परं बुद्धिरहिताः एकस्तु शास्त्रपराङ्मुखः केवलं बुद्धिमान् अथ कदाचित्तैर्मिलित्वा मंत्रितं को गुणो विद्या
याः यद्देशांतरं गत्वा भूपतीन्परितोष्यार्थोपार्जना न क्रियते तत्सर्वथा सर्वदेशांतरं गच्छामः इति अथ किंचिन्मार्गं गत्वा तेषां ज्ये
ष्ठतरः प्राह अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान् न च विद्यां विना राज्ञां प्रतिग्रहः केवल बुद्ध्या लभ्यते तदस्मै स्वोपार्जना
विभागं न दास्यामः तदेष निवृत्य स्वगृहं गच्छतु अथ द्वितीयेनाभिहितं अहो सुबुद्धे विद्याहीनस्त्वं तद्गृहं गच्छ ततस्तृती
येनाभिहितं अहो न युज्यते कर्तुमेवं यतो वयं बालकालात्प्रभृति एकत्र क्रीडिताः तदागच्छतु महानुभावोऽस्मदुपार्जितवित्त
स्य संविभागी भवतु तथानुष्ठिते तैर्मार्गे [illegible] द्भिरटव्यां मृतसिंहस्यास्थीनि दृष्टानि ततश्चैकेनाभिहितं अहो अद्य वी
ता विद्याप्रत्ययः क्रियतां किंचिदेतत्सत्वं मृतं तिष्ठति तदनेन स्वविद्याप्रभावेण जीवनसहितं कुर्मः ततश्चैकेनाभिहितं
अहमस्थिसंचयं कर्तुं जानामि द्वितीयेनाभिहितं चर्ममांसरुधिरं प्रयच्छामि तृतीयेनाभिहितं अहं संजीवनं करो
मि तत एकेनास्थिसंचयः कृतः द्वितीयेन चर्ममांसरुधिरैः संयोजितः तृतीयो यावज्जीवितं योजयति तावत्सुबु
द्धिमता निषिद्धः उक्तं च एष सिंहः यद्येनं सजीवं करिष्यसि तत्सर्वानप्यस्मान् व्यापादयिष्यतीति ततस्तेनाभिहितं
धिङ्मूर्ख नाहं विफलतां नेष्यामि ततस्तेनाभिहितं तर्हि क्षणं प्रतीक्षस्व यावदहमेनं समीपवृक्षमारोहामि तथानुष्ठि
ते यावत्संजीवः कृतस्तावत्त्रयोऽपि तेनोत्थाय व्यापादिताः स च बुद्धिमान्सिंहे स्थानांतरं गते वृक्षादवतीर्य गृहं गतः अ
तोऽहं ब्रवीमि वरं बुद्धिर्न सा विद्या [illegible] कथा तच्छ्रुत्वा चक्रधरः प्राह अहो अकारणमेतत् यतो दैवहता

पंचतंत्र बुद्धयोपि विनश्यंति स्वल्पबुद्धयोपि विद्यधरासितात्र अभिनंदंति उक्तं च शतबुद्धिः शिरस्थोयं लंबंते च सहस्रधीः एकबुद्धिरहं भद्रे क्री
५५ डामि विमले जले सुवर्णसिद्धिराह कथमेतत् चक्रधरः कथयति अस्ति कस्मिंश्चिज्जलाशये शतबुद्धिः सहस्रनामानौ द्वौ
मत्स्यौ प्रतिवसतः स्म तयोरेकबुद्धिर्नाम मंडूको मित्रतामापन्नः एवं ते त्रयोपि जलतीरे कियंतमपि कालं यावत्सुभाषितगो
ष्ठीसुखमनुभूय पुनर्जलं प्रविशंति अथ कदाचित्तेषां गोष्ठीगतानां जालहस्ता धीवराः अस्तमनवेलायां समायाताः तं च जलाशयं दृष्ट्वा
ते मिथः प्रोचुः अहो बहुमत्स्योयं हृदो दृश्यते स्वल्पसलिलश्च तत्प्रभाते अत्रागमिष्यामः इत्युक्त्वा स्वगृहं गताः ते च लब्धप्रपात
सदृग्वचः श्रुत्वा परस्परं मंत्रं चक्रुः तत्र मंडूकोब्रवीत् भो भद्रौ शतबुद्धिसहस्रबुद्धी किमत्र कर्तुं युज्यते पलायनमवष्टंभो वा
तच्छ्रुत्वा सहस्रबुद्धिर्विहस्योवाच भो मित्र मा भैषीः वचनश्रवणमात्रेणापि आगमनमपि तावत्तेषां न संभाव्यते अथ
भविष्यति तदा स्वबुद्धिप्रभावेण त्वामात्मानं च रक्षिष्यामि यतोहं अनेकजलगतीर्जानामि तच्छ्रुत्वा शतबुद्धिराह भोः यु
क्तमुक्तं सहस्रबुद्धिना यतः मयप्राप्तिर्गतिर्वा या रश्मीनां वा विवस्वतः तत्रापि हि विशत्याशु बुद्धिर्बुद्धिमतां सदा
तद्वचनमात्रश्रवणात् जन्मस्थानं पितृपर्यागतं त्यक्तुं न शक्यते इति कदाचिदपि न गंतव्यं अहं त्वां बुद्धिप्रभावेण रक्षि
ष्यामि मंडूक आह मम तावदेकैव बुद्धिः पलायनविषया तदहमन्यं कंचिज्जलाशयमद्यैव सभार्यो यास्यामि एव रोमे
मुक्त्वा मंडूको रात्रिमासाद्यान्यज्जलाशयं गतः अथान्येद्युस्ते यमकिंकराभैर्मत्स्यबंधिभिः प्रभाते आगत्य जालैराच्छादितं रामः
सरः सर्वेपि तत्र कूर्मकर्कटकादयो जलचरा जाले बद्धा गृहीताः तौ च शतबुद्धिसहस्रबुद्धी आत्मानं गतिविशेषै ५
नैरपि रक्षंतौ जाले पातितौ व्यापादितौ च अथा[redacted] पराह्नसमये हृष्टास्ते धीवरा गृहं प्रति प्रस्थिताः शतबुद्धिः

रेकेन गृहीत्वा तच्छिरसि न्यस्ते तः अपरे लोभकृः सहस्रबुद्धिर्नीयते ततश्च वापुष्पकं हसितेनमुक्तं केनाभिहितं पुरः स्वपत्न्याः धरपथि
येशमद्रुद्धिः शिरस्थोयं लंबते च सहस्रधीः एकबुद्धिरहं भद्रे डोलामि विमले जले अतोहं ब्रवीमि नैकान्तबुद्धिरपि श्रेयमाणा
मिति पंचमी कथा सुवर्णसिद्धि आह यद्यप्येतदस्ति तथापि मित्रवचनमनुल्लंघनीयम् परं किं क्रियते मयानिवारि
तोपि नास्थितः अतिलोल्याद्धि द्याहंकारा च अथवा साधिदमुच्यते साधकमातुलगीतेन वारितोपि न यो स्थितः अथवा
यं मणिर्बद्धः संप्राप्तं गीतलक्षणम् चक्रधर आह कथमेतत् सोब्रवीत् अस्ति कस्मिंश्चिदधिष्ठाने उद्धतो नाम गर्दभः
सर्वादिवा रजकगृहे भारोद्वहनं कृत्वा रात्रौ स्वेच्छया पर्यटति अथान्यदा तस्य रात्रौ क्षेत्रे पर्यटतः कदाचिच्छृगालेन
प्र साकं मैत्री बभूव तौ च वृति भंगं कृत्वा कर्कटीक्षेत्रेषु विषयतः फलभक्षणं चक्रतुः यावत्स्वेच्छया भक्षितः अ
थ कदाचिद्रासभः क्षेत्रमध्ये स्थितेन मदोद्धतः रासभेन शृगालोभिहितः भागिनेय पश्य पश्य निर्मला रजनी तद् अहं गीतं
करिष्यामि तत्कतमेन रागेण करोमि सप्राह किमनेनानर्थप्रचालनेन यतश्चौर्यकर्मप्रवृत्तावावां चौरेर्जारैर्नि
य भृतैरेवस्थातव्यमिति उक्तं च कासातुरो विवर्जयेच्चौर्यं निद्रालुश्चेत्कर्म चौरिका मजिह्वालोल्यं वरोगा द्रोजीविनुयोत्र वा
लीति तथा त्वदीयं गीतं शंखशब्दानुवादनं मधुरमिति दूरादपि श्रुत्वा क्षेत्रपरक्षकाः बध्नीयुर्वधिष्यन्ति वा
ति तद्भक्षय तावदमृतः ततश्च श्रुत्वा रासभ आह भो वनाश्रयत्वं गीतरसं न वेत्सि तेनैतद्ब्रवीषि उक्तं च श
रज्ज्योत्स्ना हते दूरं तमसि प्रियसन्निधौ धन्यानां विशति श्रोत्रे गीतझंकारजा सुधा शृगाल आह मामास्त्वेतत्
परं न वेत्सि त्वं गीतं केवलं उन्नदसि तत्किं तेनानादेन स्वार्थभ्रंशिना रासभ आह धिग्धिग्मूर्ख किमहं गीतं न जानामि तच्छ्रूयताम्

पं॰ तं॰ ५ तस्यभेदाः तद्यथा सप्तस्वरास्त्रयोग्रामा मूर्छनाश्चैकविंशतिः तानान्येकोनपंचाशत्तिस्रोमात्रालयास्त्रयः स्थानत्रयंगतीनांत्वषडा
स्यानिरसानव वर्णाः षट्त्रिंशतिर्भावाश्चत्वारिंशत्ततस्मृताः पंचाशीत्यधिकंह्येतद्गीतानांचशतंस्मृतम् स्वयमेवस्वतंपुरु
६ गीतांगैस्सकलैर्युतम् धन्यानांजायतेकर्णे विशेषाच्छरदेस्थिते नान्यप्रियतरंलोके देवानामपिदृश्यते शुष्कस्नायुस्वराह्ला
दात्र्यक्षंजग्राहरावणः ततकथंत्वंमामनभिज्ञंवदसिनिवारयसिच शृगालआह मामयद्येवंतर्हिद्वारदेशस्थःक्षेत्रपालम
वलोकयामित्वंपुनःस्वेच्छयागीतंकुरु तथावानुष्ठितेगर्दभेनउत्कंधरेणग्रीवांप्रसार्यगातुमारब्धः तत्रक्षेत्रपालारासभशब्दंश्रुत्वाक्रो
धाद्दंतान्दंतैर्निघर्षयंतोलगुडहस्ताःप्रधाविताः समेत्यतावत्ताडितोयावद्भूमिपृष्ठेपतितः ततश्चसच्छिद्रोलूखलंगले
बध्वाःक्षेत्रपालाःसुप्ताः रासभोपिस्वजातिस्वभावात्गतवेदनः तत्क्षणादुत्थितः उक्तंच सारमेयस्यचाश्वस्यरासभस्यविशेषतः स्वराच्छस्य
शेषात् मुहूर्तात्परतोनस्यात्प्रहारजनिताव्यथा ततस्तेनैवउलूखलमादायवृतिंचूर्णयित्वापलायितुमारब्धः अत्र
स्मिन्नंतरशृगालोदूरादेवतंदृष्ट्वासस्मितमाह साधुमातुलगीतेनवारितोनमयास्थितः अपूर्वोयंमणिर्बद्धःसं
प्राप्तंगीतलक्षणम् तद्वानपिनिवार्यमाणोमयानास्थितः इतिषष्ठीकथा ततश्चक्रधरआह भोमित्रस
त्यमेतत् अथवासाध्विदमुच्यते यस्यनास्तिस्वयंप्रज्ञामित्रोक्तंनकरोतियः सएवनिधनंयातियथामंथरकोलिकः सम:
तस्यकदाचित्सर्वाणिपटकर्मकाष्ठानिभग्नानि ततःसकुठारमादायकाष्ठार्थंपरिभ्रमन्समुद्रतटंप्राप्यतत्रमहान्तंशिं
शपापादपंदृष्ट्वाचिंतितवान् महानयंवृक्षोदृश्यते तदनेनकर्तितेनप्रभूतानिपटोपकरणानिभविष्यंति ६
इत्यवधार्यतस्योपरिकुठारमभ्युद्यतवान् अथतत्रवृक्षेकश्चिद्व्यंतरआसीत्तेनाभिहितं भोममाश्रयोयं

पारपस्त सर्वं विचारयन्तीयः ततोऽहमिह समुद्रकल्लोलसंस्पर्शशीतलानिलसंस्पृश्यमानशरीरः परमसुखेनातिष्ठामि कौलिक आह
भो तदहं किं करोमि एतत्सामग्री विना युष्मत्सखा प्रीतिं ते कुर्वंति तस्मादन्यत्र श्रीघ्रं गम्यताम् अहमेनं करिष्यामि एतेरो त्रवीत्
भो त्वक्कप्सस्तवाहं प्रार्थितो किंचिदभो ह्यनुतेऽनेपादपम् कौलिक आह यद्येवं तर्हि अहमहं गत्वा स्वामि पत्नीं वरदृष्ट्वा
समागच्छामि अथ तथेति प्रतिपन्ने सैरंध्री कौलिकः स्वगृहं प्राप्तो निहरो यावद्दधिछ्रानेत्रा विशातितायाम्निजगृह दृष्टेना
पितमपश्यत् अहो मित्र मम कश्चित् सैरंध्री मित्रा मिलितः तत्कथय किं प्रार्थयते नापितस्त्वाह न कुसद्येवं तक्रुऽऽपञ्चार्थयस्व
येन त्वं राजाहं मंत्री द्वावपीहलोके सुखमनुभवावः कौलिक आह भो मित्र भवन्मेव परं पत्नीं भो पृच्छामि नापित आह
नहि स्त्रीभिः सह मंत्रयितुं युज्यते उक्तं च श्रीजन्माछादनं स्वाद्वहु कालं विभोषनः कृपणाद्वर्चनारीणां न तासि मं त्रयेत्स
धीः तथा च यत्र स्त्री यत्र कितवो बालो यत्र प्रशासिता तद्गृहं क्षयमायाति भार्गवोऽहिदमब्रवीत् तावद्वत्स वाचं त्वा
तावकुरुजनेरतः पुरुषो यावन्न श्रृणोति स्त्रीवचः एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः न तासां वल्लभो
कोऽपि यस्मात्स्वमपि तासुखं विना कौलिक आह यद्यप्येवं सा पतिव्रता तथापि पृच्छाम्यहं एवं तामभिधाय सत्वरं गत्वा पत्नी
प्रवाच नद्य अस्माकं कश्चित् मित्रः सिद्धः सर्वां छितं मे जयच्छति तदहं त्वां प्रष्टुमागतः तत्कथय किमर्थये एवं ताचको
मम सुहृन्नापितो राज्यं प्रार्थ्यतामिति वदति साब्रवीत् आर्यपुत्र का मतिर्नापितानां तन्न कार्यं तद्वचः उक्तं च चारैः
लोके वंदिभिर्नीचैर्नापितैर्बालकैरपि न मंत्रयेत् तामिः कार्यः सार्द्धमित्रमि एव च आपरञ्च आतिक्लेशो परंपरा
घाराज्ञ्याति: [illegible] नानामनद्वैधी [illegible] पनस्वरं च यच्छति तथा यद्वये

श्री

पं. तं. ५ भ्रातरः पुत्राश्च पितावंछंति यो निजाः। यथाराज्यक्रमेणाद्दापितद्रव्यं दूरतस्त्यजेत्॥ कौलिक आह सत्यमुक्तं भवत्या तत्कथय
७ किंकरोमि साब्रवीत् त्वं तावदेकं पटं नित्यमेव वयस्यादयौ प्रभृति तेन मे सर्वो व्ययशुद्धिः संपाद्यते अधुना तीमन्यद्बाहुयुगलं शि
रश्च याचस्व येन पुरतः पृष्ठतश्च एकैकं पटं संपादयसि तेन त्वमेकस्य मूल्येन गृहव्ययः पुरा भविष्यति द्वितीयस्य मूल्येन विशेष
कृत्यानि करिष्यसि जातं मध्ये श्लाघ्यमानस्य कालो गमिष्यति सोपि तत् श्रुत्वा सहर्षः प्राह साधु पतिव्रते साधु साधूक्तं
भवत्या एवं करिष्यामीति निश्चयः अथ कौलिकः समुद्रतटं गत्वा प्रार्थयांचक्रे भो यदि वांछितं प्रयच्छसि तद्देहि
मे द्वितीयं बाहुयुगलं शिरश्च एवमभिहिते तत्क्षणादेव स द्विशिराश्चतुर्बाहुः संजातः ततश्च प्रहृष्टमना यावद्गृहमा
गच्छति तावल्लोकै राक्षसोयमिति मन्यमानो लकुडपाषाणादिभिस्ताडितो मृतश्च अतोहं ब्रवीमि यस्य नास्ति स्व
= यं प्रज्ञा मित्रोक्तं न करोति यः स एव निधनं याति यथा मंथरकौलिकः॥ इति मंथरकौलिककथा॥ चक्रधर पुनरेवा
ह सर्वोपि जनः कदाशापिशाचिकाग्रस्तो हास्यपदवीं याति अथवा साध्विदमुच्यते अनागतवतीं चिंताम
संभाव्यां करोति यः स एव पांडुरः शेते सोमशर्मपिता यथा सुवर्णसिद्धिराह कथमेतत् चक्रधरः प्राह
अस्ति कस्मिंश्चिदधिष्ठाने स्वभावकृपणो नाम ब्राह्मणः तेन भिक्षार्जितैः सक्तुभिर्भुक्तोर्वरितैः कलशः संपूरि राम
तः तं च घटं नागदंतेवलंब्य तस्याधस्तात् खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति अथ कदाचिद्रात्रौ चिं ७
तयामास सक्तुभिः परिपूर्णोयं घटो वर्त्तते तद्यदि दुर्भिक्षं भवति तदानेन रूपकाणां शतमुत्पद्यते

ते ततश्च तेनाजाद्वयमहं ग्रहीष्ये ततः षण्मासे प्रसववशादजायूथं भविष्यति ततो जाभिर्गा बह्वीर्गवां प्रसवात्तदपत्याधिकं महिषीरि
ष्यामि ततो गोभिर्महिषीर्महिषीभिर्वडवा वडवाप्रसवतो मम प्रभूता अश्वा भविष्यन्ति तेषां विक्रयात् प्रभूतं सुवर्णं भविष्य
ति सुवर्णेन च चतुःशालं गृहं संपत्स्यते ततः कश्चिद्ब्राह्मणो मम गृहमेत्य प्राप्तवयां रूपाढ्यां कन्यां दास्यति तस्याः पुत्रो भविष्यति
तस्याहं सोमशर्मेति नाम करिष्यामि ततस्तस्मिन् जानुचलनयोग्ये जाते प्रत्यहं पुस्तकं गृहीत्वा अश्वशालायाः पृष्ठदेशे उपविष्टस्तदवधारयिष्यामि
ततस्मिन्नन्तरे सोमशर्मा मां दृष्ट्वा जनन्या उत्संगाज्जानुचलनपरोऽश्वखुरासन्नवर्ती मत्समीपमागमिष्यति ततोऽहं ब्राह्मणीं कोपाविष्टोऽभिधास्या
मि गृहाण तावद्बालकं सापि गृहकर्मव्यग्रतया अस्मद्वचनं न श्रोष्यति ततोऽहं समुत्थाय पादप्रहारेण ताडयिष्यामि एवं तेन ध्या
नावस्थितेन पादप्रहारस्तथा मुक्तो यथा स घटो भग्नः सक्तुभिश्च पाण्डुरतां गतः अतोऽहं ब्रवीमि अनागतव
तीं चिन्तामिति अष्टमी कथा सुवर्णसिद्धिराह एवमेवैतत् यतः यो लोभात्कुरुते कर्म नैवोदर्कमपेक्षते विडंबना
मवाप्नोति स यथा चन्द्रभूपतिः चक्रधर आह कथमेतत् सोऽब्रवीत् अस्ति कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः त
स्य पुत्रा वानरक्रीडनार्थं वानरयूथं नित्यमेवानेकभोजनभक्ष्यादिभिः पुष्टिं नीयते तस्यैव कुमारस्य क्रीडार्थमेव मेषयूथम
स्ति तन्मध्यादेको जिह्वालौल्यादहर्निशं महानसं प्रविश्य यत्किंचित्पश्यति तत्सर्वं भक्षयति तेऽपि सूपकारा यत्किंचित्
काष्ठं मृन्मयं पश्यन्ति तेन ताडयन्ति सोऽपि वानरयूथपतिस्तद्दृष्ट्वा व्यचिन्तयत् अहो मेषसूपकारकलहोऽयं
वानराणां क्षयाय भविष्यति उक्तं च यतः अन्नस्वादलम्पटोऽयं मेषो महाकोपाश्च सूपकारा यथासन्नवस्तुना ताडयन्ति
यदि कदाचिदुल्मुकेन ताडयिष्यन्ति तदा ऊर्णाप्रचुरोऽयं मेषः स्वल्पेनापि वह्निना प्रज्वलिष्यति

 ताड्यमानः पुनरप्यकुर्वन्महानसवर्त्तिन्यां प्रविशति सोपि तत्रागत्य यद्यत्पश्यति ततो यूथाधिपः सर्वानाहूयेति शास्त्रेहोवेतुनदे
 तुलं यद्वानरवसत्याः मेषाणां वह्निदाहदोषः प्रशाम्यति तन्नूनमस्माकमुपस्थितोस्माकं क्षय इति। एवं निश्चित्य सर्वान्वानरानाह
यूथपोवाच मेषस्य सूपकाराणां कलहो योत्र वर्त्तते स भविष्यत्यसंदिग्धं वानराणां क्षयावहः तस्मात्स्यात्कलहो यत्र
गृहे नित्यमकारणतः तद्गृहं जीवितं वांछन्दूरतः परिवर्जयेत् तथा च कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम् ममो ८
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् तत्र यावत्सर्वेषां क्षयो न भवति तावदेतत्परित्यज्य वनं गच्छामः अथ तस्य
तद्वचनं श्रुत्वा तेन मदोद्धतेन विहस्योक्तं भोः वृद्धभावाद्भवतो बुद्धिवैकल्यं संप्राप्तं येनैतद्ब्रवीषि न वयं राजपुत्रैः सह ल
प्रदत्तामृतकल्पान्मिष्टान्विविधान्परित्यज्य कषायकटुतिक्तक्षाराणि वृक्षफलानि भक्षयिष्यामः तच्छ्रुत्वा कलुषां
दृष्टिं कृत्वा यूथपः प्रोवाच रे रे मूर्खा यूयं एतस्य सुखस्य परिणामं जानीथ यदापातमात्रमधुरमेतत् स्व परिणामे
विषवद्भविष्यति तदहं कुलक्षयं नावलोकयिष्यामि साम्प्रतं तद्वनं यास्यामि परं स्वगृहाद्भार्या मित्रं च विषमे
स्थितम् धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् इत्येवमभिधाय सर्वांस्तान्परित्यज्य स यूथपोऽटवीं गतः अथ
तस्मिन्याते ऽन्यस्मिन्नहनि स मेषो महानसे गतो वहुः। सो वत्स सूपकारेण किंचिन्नासादितं तदा वर्धज्वलितकाष्ठमादाय। ताड
यसन्ताडितः सोपि तेन ताडितः सन्दह्यमानशरीरः शब्दायमानः प्रत्यासन्नवर्त्तिन्यामश्वकुट्यां प्रविष्टः तेन यत्तत्र ८
प्राचुर्यात्सर्वतोपि वह्निज्वाला समुत्थिता कुट्यां च निबद्धा घोटकाः केचित्स्फुटितनयनाः पंचत्वमुपागताः

नि

केचिद्दग्धनासिकास्त्रोटयित्वाङ्कुशं हेषयमाणाः सर्वोऽपि जनसंघ आकुलीबभूवुः एतस्मिन्नन्तरे राजा सविषादं शालिहोत्रज्ञानश्वचिकित्स
कानाहूय प्रोवाच प्रोच्यतामेषामश्वानां कश्चिद्दाहोपशमोपायः तेऽपि शास्त्राणि विचार्य प्रोचुः देव प्रोक्तमत्र विषये भगवता
शालिहोत्रेण कपीनां वसयाश्वानां वह्निदाहसमुद्भवा व्यथा विनाशमभ्येति तमः सूर्योदये यथा तत्क्रियतामेतच्चिकित्सि
तं यावदेते दाहेन न विनश्यन्ति सोऽपि तदाकर्ण्य वानरवधमादिष्टवान् किं बहुना सर्वे व्यापादिता इति पुत्रपौत्रभ्रातृबान्धवानां कुल
सात्सात्कृतिपरंपरया तु वृद्धवानरो न सेहे उक्तं च यतः धर्षणामर्षयेद्योऽत्र वंशजापरनिर्मितां भयाद्वा यदि वा लोभा
त्स ज्ञेयः पुरुषाधमः अथ तेन वृद्धवानरेण पिपासाकुलेन भ्रमता पद्मिनीखण्डमण्डितं सरः समासादितं त
द्यावन्निपुणतया विलोकयति तावत्प्रविशन्तं वनचरपदपंक्तिं पश्यति न च निर्गच्छन्तं ततश्चिन्तयामास नूनमत्र दुष्टग्रा
हेण भाव्यं ततः कारणात्पद्मिनीनालमादाय दूरस्थोऽपि जलपानं करोमि तथानुष्ठिते तन्मध्याद्रत्नमालालंकृत
कण्ठो राक्षसो निःक्रम्य प्रोवाच भो अत्र सलिले प्रविशति तं भक्षयामीति तन्नास्ति धूर्ततरस्त्वत्तुल्यो योऽनेन विधिना पा
नीयं पिबति ततस्तुष्टोऽहं प्रार्थयस्व हृदयवाञ्छितं कपिराह भोः कियती ते भक्षणशक्तिः स आह शतसहस्रा
युतलक्षाण्यपि जलप्रविष्टानि भक्षयामि बाह्यतः शृगालोऽपि मां धर्षयतीति वानर आह अस्ति मे भूप
तिना सहात्यन्तं वैरं यद्येनां मे रत्नमालां प्रयच्छसि तत्सपरिवारमप्येवं तं भूपतिं वाक्प्रपञ्चेन लोभयित्वात्रैव
सरसि प्रवेशयामि श्रुत्वा राक्षसस्तस्मै रत्नमालां समर्पयामास वानरोऽपि रत्नमालाभूषितकण्ठो वृक्ष

पा

पं.तं.५ पालनेद्गुपरिस्थजनैर्दृष्टः । दृष्टेश्च भो यूथप भवानियंतं कालं क्व गत्वा स्थितः । कुत्र वा ईदृग्रत्नमाला लब्धा यद्दीप्त्या सूर्यमपि

८ तिरस्करोति । वानरश्चाह । अस्ति कुत्र चिदरण्ये धनदविनिर्मितं सुगुप्ततरं सरः । तत्रार्द्धोदिते सूर्ये रविवारे यः कश्चित्प्रविश्य

निमज्जति स धनदप्रसादादीदृक् रत्नमालाविभूषितकंठो निःक्रामति । अथ भूभुजा तदाकर्ण्य तं वानरं समाहूय उक्तं ।

भो यूथपते सत्यमेतत् । कपिराह । स्वामिन्नेष प्रत्यक्षतया मत्कंठस्थितया रत्नमालया प्रत्ययस्ते यदि तवापि तत्र प्रयोजनं तत्

मया सह कमपि प्रेषय येन दर्शयामि । तच्छ्रुत्वा नृपतिः प्राह । यद्येवं तदहं सपरिजनः समागमिष्यामि यथा प्रभूताः

रत्नमालाः संपद्यंते । कपिराह । स्वामिन्नेतदेव चारु । अथ नृपतिः सपरिजनो रत्नमालालोभात्प्रस्थितः । वानरोपि

राज्ञा दोलारूढेन स्वोत्संगमारोपितः सुखेनोपरि गच्छति । अथवा साध्विदमुच्यते । लोभादेव नराधिपादधनविद्यान्वि

ता अपि । अकृत्येषु नियोज्यंते भ्राम्यंते दुर्गमेष्वपि ॥ तथा च । शताधिपः सहस्रं च सहस्री लक्षमीहते । लक्षाधिपस्तथा राज्यं

तो राज्यपरस्त्वा स्वर्गमीहते ॥ जीर्यंति जीर्यतः केशा दंता जीर्यंति जीर्यतः । जीर्यतश्चक्षुषी श्रोत्रे तृष्णैका तरुणायते ॥ अथ प्र

त्यूषे तत्सरः समासाद्य वानरो राजानमुवाच । देव अर्द्धोदिते सूर्ये प्रविष्टानां सिद्धिर्भवतीति तत्सर्वोपि परिजनो वाच्यो ये

नैकहेलया प्रविशंति । त्वया पुनर्मया सह प्रवेष्टव्यं येन पूर्वदृष्टस्थानमासाद्य प्रभूतास्ते रत्नमाला दर्शयामि । अथ प्र

विष्टास्ते सर्वे लोकाः भक्षिता जलराक्षसेन । अथ तेषु चिरायमाणेषु राजा वानरमुवाच । भो यूथ नरपते राक्षसेनांतः

सलिलस्थितेन भक्षितास्ते परिजनाः । साधितं मम कुलक्षयकारणात्त्वया भवता सह वैरम् । तदुच्यतां मम यात्स्वगृहा

राज्यस्थः स्वर्गं

राम:

तृनजीर्यते ह

ह

मीतिमत्वा नात्र त्वं प्रवेशनः उक्तं च यतः हते प्रतिकृतं कुर्य्याद् छिद्रे प्रतिहिंसितं तत्र दोषं न पश्यामि दुष्टे दुष्टं समाचरेत् तत्र
यामम कुलक्षयो निमित्तोमयावर्त्तते इति एवं दाकर्ण्य पिशाचोरोका विकृतस्वरितपदं यमो यथा यातं प्रति निवृत्त इति अथ तस्मिन्
मृ पतितो गते राक्षसः कृतज्ञो जलान्निष्क्रम्य सानन्द मिदमाह हतः शत्रुः कृतं मित्रं रत्नमाला न हारिता नालेनापि पवता तेन यम
बतासाधक वानर अतोऽहं ब्रवीमि यो लोल्यात् कुरुते कर्म इत्यादि नवमी कथा ॥ ९ ॥ अथ वर्णसिद्धिः पुनरप्याह भो वक्र अधुना यमा
स्व गृहं गच्छामि चक्रधर आह कथं मामेतदवस्थं विषम त्यक्त्वा यास्यसि उक्तं च यस्त्यक्त्वा आपद्गतं मित्रं याति निष्ठुरतां वशं वरुन
नू कृतघ्नस्तेन पापेन नरकं गच्छति ध्रुवम् कृ सुवर्णसिद्धि आह भो सत्यमेतत् यदि गम्यस्थाने श्या लिप्सुकस्येऽजति इत
स्मन् जाता मम गम्यस्थानं नास्ति वक्र द्वापि विद्यापि शक्तिरून्मोचयितुं अपरं यथा २ तव चक्रभ्रमतो वदनच्छाया भवत्येव को
5 रं पश्यामि तथा २ जानामि यदि त्रागितः स्थानात् गच्छामि अस्माकमपि कथं विरन्नर्थो भविष्यतीति अथ वासाद्धि
दम् चपते याद्दृशी वं वदनच्छाया दृश्यते तव वानर गृहीतो सि विकालेन यः परेति मज्जो वदति चक्रधर आह कथमेतं
तत्र सा ब्रवीत् अस्ति कस्मिंश्चिदधिष्ठाने भद्रसेनो नाम राजा तस्य सर्वलक्षणसम्पूर्णा रत्नावती नाम कन्यास्ति तां
वक्रच्छिद्राक्षसो हर्तुमिच्छति रात्रावागत्य नित्यमेवोपभुंक्ते परं कृतांगरक्षा परिवेष्टितां हर्तुं न शक्नोति सा च तस्मि
रत्नसमये राक्षससान्निध्य जामवस्थां कंपज्वरादिरनुभवति एवमतिक्रामति काले राक्षसोऽपि गृहकोणस्थितो
राजदुहितुरात्मानमदर्शयत् ततः सासखीमुवाच सखि पश्य पश्य विकालसमये राक्षसो नित्यमेवागत्य मां कद

पं. तं. ५ ५.१

१ येयाति तदस्ति कांचिदस्य दुरात्मनः प्रतिषेधविधानं तन्मत्वा राक्षसो व्यचिंतयत नूनं मयाहं तथान्यः कश्चिद्विकाल नामा मत्र
ह.२ स्याहं रणाय नित्यमेवागच्छति परं सोपि हंतुं न शक्नोति तत्तावदहमस्य रूपं त्वाश्वमध्यस्थो निरीक्षे किं रूपः किं प्रभावश्चेति ह.२
तथानुष्ठिते तेन निशीथसमये राजगृहे कश्चिदश्वापहारकः प्रविष्टः स सर्वान्वाजिनोवलोक्य राक्षसं मश्वरूपं वरमन्तर
मवलोक्य खलीनं तन्मुखे निधाय तस्मिन्नारूढः एतस्मिन्नंतरे राक्षसश्चिंतयामास स एव विकाल नामा मां दृष्ट्वा को
पान्निहंतुमभ्यागतः किं तत्करोमि एवं चिंतयन्नसौ अश्वापहारकेण कशाघातेन ताडितः अथ भयत्रस्तमनाः प्रधावितु
मारब्धः चौरोपि दूरं गत्वा तं खलीनाकर्षणात् स्थिरीकर्तुमारेभे तद्यथा वाजी भवति तथा खलीनं गणयति स तु वेगा
द्वेगं गच्छति अथ तथा वगणित खलीनाकर्षणमवलोक्य चौरश्चिंतयामास अहो नैवंविधा वाजिनो भवंति तन्नू
नमेतेनाश्वरूपेण राक्षसेन भाव्यं तद्यदि पांसुलं भूतलमवलोकयामि तत्रात्मानं पातयामि नान्यथा मे जीवित
व्यमस्ति इत्येवं चिंतयन् इष्टदेवतामनुस्मरंस्तश्चापहाटकस्य सोश्वरूपराक्षसो वटवृक्षतले गतः चौरोपि वटप्ररो
हमासाद्य तत्रैव विलग्नः ततश्च द्वावपि तौ पृथग्भूतौ लब्धजीविताशौ परमानंदनिर्भरौ च बभूवतुः अथ तत्र राम:
वटे राक्षसस्य सुहृत् कश्चिद्वानर आसीत् तेन नश्यंतं राक्षसमवलोक्य व्याहृतं भोः किमेवमलीकभयेन प्रणश्य १०
सि भक्ष्योयं ते भोज्यस्तद्भक्ष्यतां स तस्य वचनं श्रुत्वा स्वरूपमाधाय शंकितमना स्खलितगतिर्निवृत्तः अ
थ चौरस्तं वानराहूतं ज्ञात्वा कोपादुपविष्टस्य वानरस्य लंबमानं लांगूलं मुखे प्रक्षिप्य गाढतरं चर्वितुमारब्धवान्

वानरोपि तं राक्षसादयं ... कं मन्यमानो भयान्नाकिं विद्रुपुत्रवान् ... वलं व्यांयानि मीलितनयनो दंतैर्दंतान् निः पीडयन्
तिष्ठति राक्षसोपि तथाभूतमवलोक्य श्लोकमेनमपठत् यात्रैरीवदन्त्रास्याद्र्पतेतद्वानर गृहीतोसि विकाले
नयः परेति सजीवति इति इदं सामीकथा सुवर्णसिद्धः पुनरप्याह आचक्ष्व मां स्वगृहं गच्छामि त्वं पुनरेव स्थितो दृष्टि
नयफलमनुभव चक्रधर आह भो अकारणमेतत् नयोऽनयो वा यतो दैववशात् ... मात्रमेव नयो न लभ्यते उक्तं
च श्रेष्ठ कः ... कल्पैव त्रिस्तनी राजकन्यका अनयोपि नयं याति यावत् श्रीर्भजते नरम् सुवर्णसिद्ध आह कथमे
तत् चक्रधरः कथयति अस्त्युत्तरपथे मधुपुरं नाम नगरं तत्र मधुसेनो नाम राजा तस्य कदाचित् त्रिस्तनी कन्या जाता
अथ तां त्रिस्तनीं जातां ज्ञात्वा राजा कंचुकिनमाहूय प्रोवाच भो त्यज्यतामियमरण्ये यथा न कश्चिदेव जानाति त
च्छ्रुत्वा कंचुकी आह महाराज श्रूयते ... निष्ठ ... त्रिस्तनी कन्या भवति तदपि ब्राह्मणा आहूय प्रष्टव्याः
येन लोकद्वयेपि विरुद्धा न भवति उक्तं च इत्येकेन सहसा ... कंचुकिनं ... विजानता राक्षसेन्द्र गृहीतेनापि ... ब्राह्मणो द्विजः पुर
राजा आह कथमेतत् कंचुकी कथयति अस्ति कुत्रचिद्दुरण्ये चंडकर्मा नाम राक्षसः एकदा तेन भ्रमता कश्चिद् ब्राह्मणः स
मासादितः तस्य स्कंधमारुह्य प्रोवाच भो अग्रे गम्यतां ब्राह्मणोपि भयत्रस्तमनास्तमादाय प्रस्थितः अथ तस्य कमलो
दरसादृशौ पादौ दृष्ट्वा ब्राह्मणो राक्षसमपृच्छत् भो कथमेवंविधौ भवतः कोमलौ पादौ राक्षस आह नाहमार्द्रपादः कदाचि
दपि भूमिं स्पृशामीति मे व्रतमस्ति ब्राह्मणोप्यात्मनो मोक्षोपायं चिंतयन् सरः प्राप्तः ततो राक्षसेनाभिहितः

पं.तं.५ भोपालवदूहत्वा नंकृत्वादेवतार्चनं विधायसरस्मोनिः सराभिता वत्सयानातः स्थानात्कोपिगंतव्यं तथानुष्ठितेतेश्रोत्रलाश्चितयामा
९१ स हूनंदेवतार्चन विधेरर्द्ध भामेश्वभस्यपिष्यति ततहुतं गछामि एवोनायमाडूपादेयतोमे दृष्टतः समेष्यतीति तथानुष्ठि
तेराहसोप्रतभंगभयात्स्पृतोनगतः क्तोहंअवीभिटव्हकेनसंदृभाव्याभीति इति एकादशी कथा अथ कंगुकिनस्त
द्वचनश्रुत्वाराजाप्रोत्तमानाहूयप्रोवाच भोप्राज्ञामाः श्विरत्ननीमेकन्याजाता तत्किमेतस्याः जतिविधान मस्तिनवा तेप्रोचुः
देवश्रूयतां हीनांगीवाधिकांगीवाभवेद्याकन्यकाअसौ भर्तुर्भवेत्स्याद्दुःशीलात्राणायस्वशीलनिधनायच याप्पुनस्त्रिस्तनीक
न्याप्यौतिलोचनगोचरम् पितरंभक्षयत्येवसाद्रुतं नात्र संशयः तस्मादेतदर्शनंपरिहरतुदेवः यदिकश्चिदेनामुद्वाह
यतितत्तस्मैदत्वादेशत्यागेननियोजयितव्येति एवंकृते नलोक द्वयाविरुद्धताकृताभवति इतितेषांतद्वचनमाकर्ण्यपरा
जासर्वत्रपटहघोषेणआघोषयामास यथा अहोत्रिस्तनीराजकन्यांयःपरिणयतितस्यराजासुवर्णलक्षंदत्वादेश
त्यागंकारयति एवंविधायामाघोषणायां क्रियमाणायांमहान्कालोव्यतीतः नचकश्चित्तांपरिणयति साच्युप्तस्था
नस्थितायौवनाभिमुखीसंजाते अथ तत्रैवनगरे कश्चिदंधोस्ति तस्यचमंथरकनामायष्टिग्राहकःकुब्जकः सहायो
स्ति ततस्तौपटहशब्दमाकर्ण्यमिथोमंत्रयतः शरावलेसोपहो(?) यदि कन्यकासुवर्णंचलभ्यते सुवर्णप्राप्त्यासुखेन रा
कालोगछति अथ कन्यकादोषेणमृत्युर्भविष्यति तदस्यदरिद्रोपद्रवस्यक्लेशस्यपर्यंतोभवति उक्तंवयतः लज्जा ९१
स्नेहस्वरमधुरताबुद्धयोयौवनश्रीः प्राणानंदः स्वजनसमताढुःखहानिर्विलासः धर्मःशास्त्रंसुरगुरुमतिना

रोगमाचारयिंतामहद्दोसिर्जठरपिठरेषाणिन्नां संभवंति एवं मंत्रयित्वांधेनगत्वा पटहः स्पृष्टः आत्त्व अहं तां कन्यां परिणेष्यामि
ततस्तै राजपुरुषै राज्ञे गत्वा निवेदितं देव केनचिदंधेन पटहः स्पृष्टस्तदत्र विषये देव प्रमाणं राजाप्याह भो अंधो वा बधिरो वाथ
कुष्ठी वाप्यत्यजोपि वा परिगृह्णातु तां कन्यां सलक्षां स्याद्दिदेशगः अथ राजादेशानंतरं भवतेः तत्पुरुषैर्नदीतीरे गत्वा
वर्णलक्षं दत्वा त्रिस्तनी तेनांधेन सह विवाहिता ततो यानपात्रमारोप्य कैवर्त्ताः प्रोक्ताः भो देशांतरं नीत्वा कस्मिंश्चिदधिष्ठाने
सकुब्जः सपत्नीकोयमंधो धार्य्यः तथानुष्ठिते विदेशग्राममासाद्य कस्मिंश्चिदधिष्ठाने त्रयोपि ते गृहं मूल्येन प्राप्य सुखेन कालं नयं
ति स्म केवलमंधः पर्यंके सदा सुप्तस्तिष्ठति गृहव्यापारं कुब्जः करोति एवं गच्छति काले त्रिस्तनी कुब्जेन सह विकृता आह
च भो सुभग यद्ययमंधः कथमपि व्यापाद्यते तदावां सुखेन कालं नयावः तदन्विष्यतां कापि विषं येन तद्दत्वा सुखं व्यापा
द्य सुखिनी भवामि अथान्येद्युः कुब्जेन मृतः कृष्णसर्पः कुत्राप्यासादितः तं गृहीत्वा प्रहृष्टमनाः स्वगृहमभ्येत्य तामाह
सुभगे लब्धोयं कृष्णसर्पस्तदेनं खंडशः कृत्वा प्रभूतशुंठ्यादिभिः संस्कृत्यास्मै विगतनयनाय मत्स्यामिषमिति कथयि
त्वा संप्रयच्छ येन द्राक् विपद्यत इति एवमुक्त्वा भूयोपि मंथरको गृहं मार्गं प्रतिप्रस्थितः सापि कृष्णसर्पं खंडीकृत्य तत
क्रस्थाल्यां निधाय वह्नौ मस्तकेनारोप्य स्वगृहव्यापारव्याकुलत्वात्तमंधं सप्रश्रयमिदमाह आर्यपुत्राह मया तवा
भीष्टतमान्मत्स्यान्समानीय पचंती तिष्ठामि तद्यावदहं गृहव्यापारांतरं करोमि तावत्त्वं दर्वीं गृहीत्वा एतान्वा
लय सोपि तत् श्रुत्वा प्रहृष्टमनाः सृक्किणी परिलिहन्सत्वरमुत्थाय दर्वीं गृहीत्वा प्रचालयामास ततस्तस्य चालयतो
विषगर्भेण बाष्पेण संस्पृष्टे दृष्टिपटले शनैः शनैरपसरतु सोपि गुणमेव तत्... मानो विशेषान्नयनाभ्यां बाष्पग्रहणमक...

पं.तं.५ तेन ततः स्वच्छं दृष्ट्वा हृष्यमीयत्तवर्द्धितितावत्तस्या लीमध्ये कृष्णसर्पशकलानि केवलानि ततो व्यचिंतयत् अहो किमेतत् ममाग्रेम
९२ त्स्याभिज्ञं कथितमासीत् एतानि पुनः कृष्णसर्पशकलानि तत्तावज्ज्ञानाभिसम्यक् किंचित्तस्याग्रे हित्तेकिं वाले ह्यधायेव
उपक्रमो मंथरकस्य उत्तान्यस्य वा कस्यचित् एवं संचिंतयन् आकारं निगूहयन् अंधवत्कर्म करोति अत्रांतरे मंथर
कः हृष्टवदेव पश्यन् समागत्य निःशंकमालिंगनचुंबनादिभिः स्तनीं सपभोक्तुं चक्रमे अंधोपि सर्वमालोकयन् नापि किं
चिद्वक्तुमपश्यन्नपि क्रोधात्कः पूर्ववत् पश्यन् समीपं गत्वा मंथरकं चरणाभ्यामादाय शरीरबलसामर्थ्यात् भ्रामयित्वा कोप
त्रिस्तन्याः हृदयेन व्यताडयत् अथ कुब्जकशरीरप्रहारेण तस्यास्त्रिस्तनीयस्तनोंतः प्रविष्टः कुब्जदेहस्तनस्य
कौतुकः आगतस्ततः अतोहं ब्रवीमि अंधकः कुब्जकश्चैवेति इति द्वादशी कथा। सुवर्णसिद्धिराह भोः सत्यमेतदभि
हितम् त्वया दैवानुकूलतया सर्वत्र कल्याणं संपद्यते परं तथापि पुरुषेण दैवमंगीकृत्य नयो न त्याज्यो यच्चाल्ययाम
मवाक्यमकुर्वता त्यक्तः एवमुक्त्वा स सुवर्णसिद्धिस्तमनुज्ञाप्य स्वगृहं प्रतिनिवृत्तः अथैतत्कथानकं कथयित्वा
विष्णुशर्मणोक्तं अपरं किं कथयामि तदुच्यताम् राजपुत्रा ऊचुः आचार्य भवत्प्रसादाज्ज्ञानं प्रकारं राज
गंहातं न नकरवि नोभूता वयम् यथैव तथा नीतिम् अधिगताः विष्णुशर्मोवाच दर्पणानुप्रेक्षेतच्छास्त्रं ना
त्मनः सर्वशास्त्रं हितम् यो वेत्ति तस्य लोके किं नाम स्यात् दुःसाध्यम् एतच्छ्रुत्वा शास्त्रं राजसुता नेमिरे ९२

पंचतंत्र

1014

पञ्चतन्त्रम्

...तंत्रं ५ संबोध्य प्रणम्यासाभ्यंतरतश्च केलिविलासार्थे यात्रसूत्रान् एताः पितृस्नेहभावादथो तावान्सत्यतिलोपि योगोर्दिभागामतुलंका
१२ भवानुरूपविभवपर्यंतम्॥ ॥ इति विष्णुशर्मणा कृते पंचतंत्राख्ये नीतिशास्त्रे अपरीक्षितकारित्वं नाम पंचमं तंत्रम्
समाप्तोयं पंचतंत्राख्यो ग्रंथः ॐ श्रीयज्ञपुरुषार्पणमस्तु श्रीयज्ञपुरुषाय नमः शुभं भवतु ॐ श्रीः
शाके ... भूपयुतमार्गकृष्णे लिखद्भुतम् घोरातिघोरखेरखदेवकीनंदनोद्विजः श्रीः श्रीः श्रीगणेशाय नमः

पंचतंत्र ... ...

स्व	म	क्ष	ता	म	श्वा	ग	ति	त्र	म	क्ष	ज	इ	घि	त्वा	वि	च्छ	ज्ये	प	स्ट
कु·बे	लि·ग	श·इ	ई·व	वे·नो	कु·च	क·को	कु·है	इ·कु	म·मि	मो·र	टे·टा	कु·ब	चे·पा	कु·ने	लि·कु	न·नि	नो·ब	प·बो	भ·च
बो·ल	हे·लो	उ·र	वि·तु	क·लि	ड·भ	क·हि	ला·इ	इ·ज्ञा	कु·मि	द्दि·इ	प्र·वि	ला·ठ	न·भ	मा·त	लं·ले	कु·ने	वि·गु	भ·मि	ध·छ

उ	स्त्र	श्च	य	श	स्वे	छ	व
भे·पो	गु·जे	षि·हु	ग·शि	गो·श	से·बा	कु·प	दे·ग
न·शि	शो·घ	खे·खो	कु·ग	लि·कु	द·दि	न·जं	ब·वि

रत्नासुखिय लांध नेक ठिनता बासे लिंग ने प्र ... कर से कमा रा
उपाचितम्रूहकुरुत्वापरु कोकस्य ... निभोगभाजमनितान १
गायकी नो ... निश्री ... भवतीजन

४८४



पञ्चतन्त्रम्

पञ्चतन्त्रम्।

ॐ श्रीगणेशाय नमः ॥ ॥ मनवे वाचस्पतये शुक्राय पराशराय ससुताय चाणक्याय च विदुषे नमो नमो नीतिशास्त्रकर्तृभ्यः १

पंचतंत्र सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदं । तंत्रैः पंचभिरेतच्चकार सुमनोहरं शास्त्रं २ तद्यथानुश्रूयते अस्ति दा

१ क्षिणात्ये जनपदे महिलारोप्यं नाम नगरं तत्र सकलार्थिसार्थकल्पद्रुमः प्रवरनृपमुकुटमरीचिमंजरीचयचर्चितचरणयु

गलः सकलकलापारगतोऽमरशक्तिर्नाम राजा बभूव तस्य त्रयः पुत्राः परमदुर्मेधसो वसुशक्तिरुग्रशक्तिरनेकशक्तिश्चेति ना

मानो बभूवुः अथ राजा तान् शास्त्रविमुखानालोक्य सचिवानाहूय प्रोवाच । भो ज्ञातमेतद्भवद्भिः यन्ममैते पुत्राः शास्त्रवि

मुखा विवेकरहिताश्च । तदेतान्पश्यतो मे महदपि राज्यं न सौख्यमावहति अथवा साध्विदमुच्यते अजातमृतमूर्खेभ्यो मृता

२ सुतौ १ जातौ वरं यत सौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् । किं तया क्रियते धेन्वा या न सूते न दुग्धदा कोऽर्थः पुत्रेण जातेन यो न

विद्वान्न भक्तिमान् तदेतेषां यथा बुद्धिप्रकाशो भवति तथानुष्ठीयतां अत्र च मद्दत्तां वृत्तिं भुंजानानां पंडितानां पंचशती राम:

तिष्ठति ततो यथा मदीय मनोरथाः सिद्धिं यान्ति तथा क्रियतामिति तत्रैकः प्रोवाच ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ

द्वादशभिर्वर्षैर्व्याकरणं श्रूयते ततो धर्मशास्त्राणि मन्वादीनि अर्थशास्त्राणि चाणक्यादीनि कामशास्त्राणि वात्स्यायनादीनि एवं ततो धर्मार्थकामशास्त्राणि च
ज्ञायन्ते ततः प्रतिबोधनं भवति अथ तन्मध्यगतोऽपरः सुमति नामा प्राह देव अशाश्वतोऽयं जीवलोकः प्रभूतकालज्ञेयानि शब्दशास्त्राणि तत्संक्षेपमात्रं शास्त्रं किं
चिदेतेषां प्रबोधनार्थं भवति उक्तं च यतः अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः सारं ततो ग्राह्यमपास्य फल्गु हंसो यथा क्षीरमिवाम्बुमध्यात् त
दत्रास्ति विष्णुशर्मा नाम ब्राह्मणोऽनेकशास्त्रपारंगमश्छात्रसंसदि लब्धकीर्तिस्तस्मै समर्पयैतान् स नूनं तान् द्राक् प्रबुद्धान् करिष्यतीति स राजा तदाकर्ण्य
विष्णुशर्माणमाहूय प्रोवाच भो भगवन् मदनुग्रहार्थमेतानर्थशास्त्रं प्रति द्राग्यथानन्यसदृशान् विदधासि तथा कुरु अहं त्वां शासनशतेन नियोजयिष्यामि अथ
विष्णुशर्मा तं राजानमुवाच देव श्रूयतां मे तथ्यवचनं नाहं विद्याविक्रयं शासनशतेनापि करोमि पुनरेतांस्तव पुत्रान् मासषट्केन नीतिशास्त्रज्ञान् करोमि ततः
स्वनामत्यागं करोमि अथासौ राजा तदाकर्ण्य प्रहृष्टः कुमारान् सादरं मानपुरःसरं तस्मै समर्प्य परां निर्वृतिमाजगाम इत्येतां ब्राह्मणस्यासंभाव्यां प्र
तिज्ञां श्रुत्वा स सचिवो राजा परमविस्मयान्वितस्तस्मै सादरं कुमारान् समर्पितवान् अथासौ विष्णुशर्मापि तानादाय तदर्थं मित्रभेद मित्रप्राप्ति
काकोलूकीय लब्धप्रणाश अपरीक्षितकारिकाणि चेति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः तेऽपि तान्यधीत्य मासषट्केन यथोक्ताः संवृत्ताः

ततः प्रभृत्येतत्पंचतंत्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तं किं बहुना अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च न पराभवमा
प्नोति शक्रादपि कदापि सः कथामुखमेतत् अथातः प्रारभ्यते मित्रभेदं नाम प्रथमं तंत्रं यस्यायमादिमः श्लोकः वर्द्धमानो महान्स्नेहः सिंहगो
वृषयोर्वने पिशुनेनातिलुब्धेन जंबुकेन विनाशितः अथैतद्यथानुश्रूयते अस्ति दक्षिणात्ये जनपदे महिलारोप्यं नाम नगरं तत्र धर्मोपार्जि
तवृत्तिर्वर्द्धमानको नाम वणिक्पुत्रो बभूव तस्य कदाचिदियं चिंता समुत्पन्ना यत्प्रभूतेपि वित्ते सति अर्थोपायाश्चिंतनीयाः क
र्तव्याश्चेति यत उक्तं नहि तद्विद्यते किंचिद्यदर्थेन न सिद्ध्यति यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् यस्यार्थास्तस्य मित्रा
णि यस्यार्थास्तस्य बांधवाः यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पंडितः न सा विद्या न तच्छिल्पं न तद्दानं न सा कला अर्थार्थिभि
र्न तत्स्थैर्यं धनिनां यन्न गीयते इह लोके हि धनिनां परोपि स्वजनायते स्वजनोपि दरिद्राणां तत्क्षणाद्दुर्जनायते अर्थेभ्योपि हि वृद्धे
भ्यः संभृतेभ्यो यतस्ततः प्रवर्त्तंते क्रियाः सर्वाः पर्वतेभ्य इवापगाः पूज्यते यदपूज्योपि यदगम्योपि गम्यते वंद्यते यदवंद्योपि स प्रभाध रामः
नस्य च अशनादिंद्रियाणीव स्युः कार्याण्यखिलान्यपि एतस्मात्कारणाद्वित्तं सर्वसाधनमुच्यते अर्थार्थी जीवलोकोयं श्मशान
मपि सेवते त्यक्त्वा जनयितारं स्वं निःस्वं गच्छति दूरतः इति कामंदकिना उपाया॰ २

नांहसेवैषांमुपायः पापसंग्रहः धनार्थंशास्यतेह्येकस्तदन्यः संशयात्मकः॥ उक्तंच तत्रचवाणिज्यंसप्तविधं अर्थागमायस्यात् तद्यथा
गांधिकव्यवहारः निक्षेपप्रवेशः गोष्ठिककर्म परिचितग्राहकागमः मिथ्याक्रयकथनं कूटतुलामानं देशांतराद्भांडानयनं चेति
उक्तंच पण्यानांगांधिकंपण्यंकिमन्यैःकांचनादिभिः यत्रैकेनचयत्क्रीतंतच्छतेनप्रदीयते निक्षेपपतितेहर्म्येश्रेष्ठीस्तौतिस्वदेवतां
म् निक्षेपीम्रियतांतुभ्यंप्रदास्याम्युपयाचितम् अन्यच्च गोष्ठिककर्मनियुक्तःश्रेष्ठीतमांचिंतयत्सहृष्टः भूमीशोशान्द्यान्देवडव्यस्यलो
त्येन परिचितमभ्यागच्छंतंग्राहकमुत्कंठयाविलोक्यासौ हृष्यतितद्धनलुब्धोयद्वत्सुतेनजातेन अन्यच्च पूर्णापूर्णमानेनपरिचितजनं
वंचनंनयानित्यं मिथ्याक्रयस्यकथनंनिजधर्मोयंकिरातानाम् देशांतरभांडानयनमपिविचित्रतामेवाहेति उक्तंच यथास्याद्विगु
लं वित्तंक्रयंतेतेपि दूरतः तेर्थरथान्निवधूनिगिरौरवमहागजान् इत्येवंसंप्रधार्य्य मथुरागामीनि भांडानिआदायशुभायांतिथौ
गुरुजनानुज्ञातःसुरथाधिरूढः प्रस्थितः तस्यचमंगलवृषभौगृहोत्पन्नौनंदकसंजीवकनामानौधूर्वोढारौस्थितौ तयोरेकः
संजीवकाभिधानोयमुनाकच्छमवतीर्णःसन्पंकपूरमासाद्यगलितचरणोयुगभंगंकृत्वानिषसाद अथतंतदवस्थमालोक्यव
र्द्धमानः परंविषादमगमत् तदर्थंचस्नेहार्द्रहृदयः त्रिरात्रंप्रयाणभंगमकरोत् अथतंविषण्णमालोक्यसार्थिकैरभिहितं भो
श्रेष्ठिन् किमेवंवृषभस्यकृतेसिंहव्याघ्रसमाकुलेस्मिन्वनेबहुपायेसमस्तोपिसार्थः त्वयासंदेहेनियोजितः उक्तंच नस्वल्प
स्यकृतेभूरिनाशयेन्मतिमान्नरः एतदेवात्रपांडित्यंयत्स्वल्पाद्भूरिरक्षणम् अथासौतदवधार्यसंजीवकस्यरक्षापुरुषान्नि

तंत्र १ रक्षकोषसार्थं नीत्वा प्रस्थितः अथ रक्षपुरुषा अपि बहुपायं तद्वनं विदित्वा संजीवकं परित्यज्य पृष्ठतो गत्वा अन्येद्युस्तं सार्थवाहं
मिथ्योचुः स्वामिन् मृतोसौ संजीवकः अस्माभिस्तु सार्थवाहस्याभीष्ट इति मत्वा वह्निना संस्कृत इति तच्छ्रुत्वा सार्थवाहः कृत
ज्ञः शोकार्द्रहृदयस्तस्य और्ध्वदेहिकाः क्रिया वृषोत्सर्गादिकाः सर्वाश्चकार संजीवकोप्यायुःशेषतया यमुनाजलमिश्रैः शिशिर
तरवातैराप्यायितशरीरः कथंचिदप्युत्थाय यमुनातटमुपपेदे तत्र मरकतसदृशानि बालतृणाग्राणि भक्षयमाणः कतिपयै
रहोभिर्हरवृषभ इव पीनः ककुद्मान् बलवांश्च संवृत्तः प्रत्यहं वल्मीकशिखराग्राणि शृंगाभ्यां विदारयन् गर्जमानास्ते साधु चे
दमुच्यते अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति जीवत्यनाथोपि वने विसर्जितः कृतप्रयत्नोपि गृहे न जीवति
अथ कदाचित्पिंगलको नाम सिंहः सर्वमृगपरिवृतः पिपासाकुल उदकग्रहणार्थं यमुनातटमवतीर्णः संजीवकस्य तं गंभीरतरं शब्दं दूरा
पंच देवाशृणोत् तच्छ्रुत्वातीव व्याकुलितहृदयः ससाध्वसमाकारं प्रच्छाद्य वटतले चतुर्मण्डलावस्थानेनावस्थितः चतुर्मण्डलाव
स्थानं त्विदं सिंहः सिंहानुयायिनः काकरवाः किंवृत्ता इति अथ तस्य करटकदमनकनामानौ मंत्रिपुत्रौ भ्रष्टाधिकारौ सदानुया
यिनावास्तां तौ च परस्परं मंत्रयतः तत्र दमनकोब्रवीत् भद्र करटक तावदस्मत्स्वामी पिंगलक उदकग्रहणार्थं यमुनाकूलम तंत्र
वतीर्य स्थितः स किं निमित्तं पिपासाकुलोपि परावृत्य व्यूहरचनां कृत्वा दौर्मनस्येनाभिभूतो वटतले स्थितः करटक आ १
ह भद्र किमावयोरनेन व्यापारेण उक्तं च यतः अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति स एव निधनं याति कीलोत्पाटी

वानरः दमनकश्चाह कथमेतत् सोऽब्रवीत् अस्ति कस्मिंश्चिन्नगराभ्यासे केनापि वणिक्पुत्रेण तरुखंडमध्ये देवतायतनं कर्तुमारब्धं तत्र च ये कर्मक
राः स्थपत्यादयस्ते मध्याह्नवेलायामाहारार्थं प्रतिदिनं नगरमध्ये गच्छंति· अथ कदाचित्तत्रानुषंगिकं वानरयूथं इतश्चेतश्च परिभ्रमदागतं तत्रैकस्य
कस्यचिच्छिल्पिनोर्द्धस्फाटितो महाप्रमाणोंजनवृक्षदारुमयस्तंभः खदिरकीलकेन मध्यनिहितेन तिष्ठति· अत्रांतरे वानरास्ते तरुशिखरप्रासा
दशृंगदारुपर्यंतेषु यथेच्छया क्रीडितुमारब्धाः· एकश्च तेषां प्रत्यासन्नमृत्युश्चापल्यात्तस्मिन्नर्द्धस्फाटितस्तंभे उपविश्य पाणिभ्यां कीलकं यदृते
तत्रागेव निपादतः अतोहं ब्रवीमि अव्यापारेष्विति· करटकः आवयोस्तावद्भक्षितशेष आहारोस्त्येव तत्किमनेन व्यापारेण· दमनकः तत्किं
भवानाहारार्थी केवलमेव· तन्न युक्तमेतत्· उक्तं च· सुहृदामुपकारकारणाद्द्विषतां चाप्यपकारकारणात् नृपसंश्रय इष्यते बुधैर्जठरं को
न बिभर्ति केवलम्· किं च· यस्मिन्जीवति जीवंति बहवः स तु जीवतु वयांसि किं न कुर्वंति चंच्वा स्वोदरपूरणं यो नात्मजे न च गुरौ न च भृत्यवर्गे
दीने दयां न कुरुते न च बंधुवर्गे किं तस्य जीवितफलं हि मनुष्यलोके काकोपि जीवति चिरं च बलिं च भुंक्ते· यज्जीव्यते क्षणमपि प्रथितं मनुष्यै
र्विज्ञानशौर्यविभवार्यगुणैः समेतं तन्नाम जीवितफलं प्रवदंति तज्ज्ञाः काकोपि जीवति चिरं च बलिं च भुंक्ते· सुपूरा स्यात्कुनदिका सुपूरो
मूषिकांजलिः सुसंतुष्टः कापुरुषः स्वल्पकेनापि तुष्यति· किं च· किं तेन जातु जातेन मातुर्यौवनहारिणा आरोहति न यः स्वस्य वंशा
स्याग्रे ध्वजो यथा· तथा च· परिवर्तिनि संसारे मृतः को वा न जायते जातस्तु गण्यते सोत्र यः स्फुरेच्च श्रियाधिकः· किं च· जातस्य न
दीतीरे तस्यापि तृणस्य जन्मसाफल्यं यत्सलिलमज्जनाकुलजनहस्तावलंबनं भवति· तथा च· स्तिमितोन्नतसंचारा जन
संतापहारिणः जायंते विरला लोके जलदा इव सज्जनाः· निरतिशयं गरिमाणं तेन जनन्याः स्मरंति विद्वांसः· यं कमपि वहति

सुदर्शितसामर्थ्यः १ स: प्रधानोपि २



गर्भमहतामपि यो गुरुर्भवति अथ एकीकृतशक्तिः यत्कोपि जनमिह रक्षितुं लभते निवसन्नन्तर्दारुणि लंघ्यो वह्निर्न तु ज्वलितः करटको ब्रू
ह आवां तावदप्रधानौ तत्किमावयोरनेन व्यापारेण उक्तं च यतः अपृष्टो त्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः न केवलमसन्मानं लभते वीत
रस्त्रियाम् तथा च यवस्तु प्रयोजनं यो यो को लभते फलं स्वामी भवति वा तं न रागः शुक्लपटे यथा दमनकः मा मैवं वद अप्रधानः
प्रधानः स्यात्सेवते यदि पार्थिवम् प्रधानोप्यप्रधानः स्याद्यदि सेवाविवर्जितः यतः आसन्नमेव नृपतिर्भजते मनुष्यं विद्याविहीनमकु
लीनमसंस्कृतं वा प्रायेण भूमिपतयः प्रमदा लताश्च यत्पार्श्वतो भवति तत्परिवेष्टयन्ति तथा च कोपप्रसादवस्तूनि ये विचिन्वन्ति से
वकाः आरोहन्ति शनैः पश्चाद्धुन्वन्तमपि पार्थिवं विद्यावतां महेच्छानां शिल्पविक्रमशालिनां सेवावृत्तिविदां चैव नाश्रयः पार्थिवं वि
ना ये जात्यादिमहोत्साहा नरेन्द्रान्न व्रजन्ति च तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितं ये च प्राहुर्दुरात्मानो दुराराध्या महीभुजः प्रमा
दालस्यजाड्यानि ख्यापितानि निजानि तैः सर्पान्व्याघ्रान्गजान्सिंहान्दृष्ट्वोपायैर्वशीकृतान् राजेति कियती मात्रा धीमतामप्रमादि
नां राजानमेव संश्रित्य विद्वान्याति परां गतिं विना मलयमन्यत्र चंदनं न विरोहति धवलान्यातपत्राणि वाजिनश्च मनोरमाः सदा
मत्ताश्च मातंगाः प्रसन्ने सति भूपतौ करटकः अथ भवान्किं कर्तुमनाः दमनको ब्रवीत् अद्यास्मत्स्वामी पिंगलको भीतो भीतप
रिवारश्च वर्त्तते तदेनं गत्वा भयकारणं विज्ञाय संधिविग्रहयानासनसंश्रयद्वैधीभावानामेकतमेन संविधास्ये करटकः कथं वेत्ति भ
वान् यद्भयाविष्टोयं स्वामी सोब्रवीत् किमत्र ज्ञेयं यतः उदीरितोर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः

ज्ञानाति अनुक्तमप्यूहति पंडितो जनः परेंगितज्ञानफला हि बुद्धयः तथा च मनुः आकारैरिंगितैर्गत्या चेष्टया भाषणेन च नेत्रवक्त्रविकारैश्च लक्ष्यतेन्तर्गतं
मनः तदेनं भयाकुलं प्राप्य स्वबुद्धिप्रभावेनाभयप्रदानेन वशीकृत्य स्वनिजां साचिव्यपदवीं समासादयिष्यामि करटकः त्वमनभिज्ञो भवान्से
वाधर्मस्य तत्कथमेनं वशीकरिष्यसि दमनकः पथेदं गुरानजुपांडवानां विराटनगरप्रवेशकाले धौम्येन महर्षिणा कथितः सकलोप्यनुजीविध
र्मो विज्ञात इति• सुवर्णपुष्पितां पृथ्वीं विचिन्वंति त्रयो जनाः शूरश्च कृतविद्यश्च यश्च जानाति सेवितुं सा च सेवा क्रियाहिताख्येयं राज्ञो वा को विशेषतः
ज्ञो राज्ञो वा को विशेषतः आश्रयेत्पार्थिवं विद्वान् तद्द्वारेणैव नान्यथा यो न वेत्ति गुणान्यस्य न तं सेवेत पंडितः नहि तस्मात्फलं किंचित्
सुकृष्टादूषरादिव द्रव्यप्रकृतिहीनोपि सेव्यः सेव्यगुणान्वितः भवत्याजीवनं तस्मात्फलं कालांतरादपि अपि स्थाणुवदासीनः शु
ष्यन्परिगतः क्षुधा न त्वेवानात्मसंपन्नाद्वृत्तिमीहेत पंडितः सेवकः स्वामिनं द्वेष्टि कृपणं परुषाक्षरं आत्मानं किं न सद्वेष्टि सेव्यासेव्यं
न वेत्ति यः यमाश्रित्य न विश्राम क्षुधार्ता यांति सेवकाः सोर्कवन्नृपतिस्त्याज्यः सदा पुष्पफलोपि सन् राजमातरि देव्यां च कुमारे मुख्य
मंत्रिणि पुरोहिते प्रतीहारे च वर्तेत यथा नृपे यथा जीवेति प्रब्रुवन्प्रोक्तः कृत्याकृत्येष्वविचारकः करोति निर्विकल्पं यः स भवेद्राजवल्लभः द्यू
तं यो यमदूताभं हालां हालाहलोपमां पश्येद्दारान्वृथाकारान्स भवेद्राजवल्लभः अंतःपुरचरैः सार्द्धं यो न मंत्रं समाचरेत् न कलत्रैर्नरे
न्द्रस्य स भवेद्राजवल्लभः सन्नाहे विलासैर्नित्यमिष्टानामिष्टकर्मकृत् यो नरो नरनाथस्य स भवेद्राजवल्लभः प्रभुप्रसादजं वित्तं सुपात्रे
करोति २ यो नियोजयेत् वस्त्राद्यं च विदधात्यंगे स भवेद्राजवल्लभः युद्धकाले अग्रगः स्यात्सदा पृष्ठानुगः पुरे प्रभोर्द्वाराश्रितो हर्म्ये स भवेद्राजव
ल्लभः प्रोक्तः प्रत्युत्तरं नाह विरुद्धं प्रभुणा च यः न समीपे हसत्युच्चैः स भवेद्राजवल्लभः यो रणं शरणं यद्वन्मन्यते भयवर्जितः
अद्रुहानाद्वैयं कृतज्ञता १ मोचनं च बंधनालयवत् ४

पंतं अ १ प्रवासंस्पृशतावासंसमभेद्याप्रवक्ष्यामः करटकः अथभवांस्तत्रगत्वाकिंतावद्वक्ष्यति दमनकः उत्तरादुत्तरंवाक्यंवदतांसंप्रजायते सुवृष्टिगुण
संपन्नाद्वीजाद्वीजमिवापरं अपिच अपायसंदर्शनजांविपत्तिमुपायसंदर्शनजांचसिद्धिं मेधाविनोनीतिगुणप्रयुक्तांपुरःस्फुरंतीमिवदर्श
यंति एकेषांवाचिशुकवत्अन्येषांहृदिमूकवत् हृदिवाचितथान्येषांवल्गुवल्गंतिसूक्तयः नचाहमप्राप्तकालंवक्ष्ये आकर्णितंमयाः
अप्राप्तकालंवचनंबृहस्पतिरपिब्रुवन् लभतेबुद्ध्यवज्ञानमपमानंचपुष्कलं करटकः अस्थिरत्वात्पिंडराराध्याहि राजानः पर्वता
इवसर्वदा व्यालाकीर्णाःसुविषमाःकठिनादुःखसेविताः तथाच भोगिनःकंचुकाविष्टाःकुटिलाःक्रूरचेष्टिताः सुदुष्टामंत्रसाध्याश्चराजानःप
न्नगाइव स्वल्पमप्यपकुर्वंतियेप्यभीष्टामहीपतेः तेवन्हाविवदह्यंतेपतंगाःपापचेतसः दुरारोहंपदंराज्ञांसर्वलोकनमस्कृतं स्वल्पेनाप्यपकारे
णब्राह्मण्यमिवदुष्यति दुराराध्याश्रियोराज्ञांदुरापादुःपरिग्रहाः तिष्ठंत्यापइवाधारेचिरमात्मनिसंस्थिताः दमनकः सत्यमेतत् परंतु यस्य
यस्यहियोभावस्तेनतेनहितंनरः अनुप्रविश्यमेधावीक्षिप्रमात्मवशंनयेत् भर्तुश्चित्तानुवर्तित्वंसुवृत्तंचानुजीविनां राक्षसाश्चापि
गृह्यंतेनित्यंछंदानुवर्तिभिः इतिकामंदकिः सरुषिनृपेस्तुतिवचनंतदभिमतेप्रेमतद्विषिद्वेषः तद्दानस्यप्रशंसा अमंत्रतंत्रंवशीक
रणं करटकः यद्येवमभिमतंतर्हिशिवास्तेपंथानःसंतु यथाभिलषितमनुष्ठीयतामिति दमनकोपिकरटकंप्रणम्यपिंगलकाभिमु राम
खःप्रतस्थे आगच्छंतंदमनकमवलोक्यपिंगलकोद्वास्थमब्रवीत् यदपसार्यतांवेत्रलता अयमस्माकंचिरंतनोमंत्रिपुत्रःसमायातः ५
नत्थ्यवेत्रपतो द्वितीयमंडलमवतोप्यंभार्थवादीन भवतिति तथापविष्टे दमनकःपिंगलकंप्रणम्योपविष्टः सतुतस्यनखकुलिशालं
कृतंदक्षिणपाणिमुपरिदत्वामानपुरःसरमुवाच अपिशिवंभवतःकस्माच्चिराद्दृष्टोसि दमनकः नकिंचिद्देवपादानामस्माभिःप्र

कृपाणपाष्टिमता २ वंशपरंपरागतो २

योजनं तथापि ग्रामकालं वंचयन् यतः उत्तममध्यमाधमेषु सर्वेष्वपि प्राणिनां प्रयोजनम् उक्तंच दंतस्य निर्घर्षणकेन नित्यं क
र्णस्य कंडूयनकेन वापि तृणेन कार्यं भवतीश्वराणां किमंगवाक्पाणिवता नरेण कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते
धैर्यगुणाः प्रमार्ष्टुं श्रपदर्त्तुं १ अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव तथा वयं देवपादानामन्वयागता भृत्या
आपत्स्वपि पृष्ठानुगामिनो यद्यपि स्वमधिकारं न लभामहे तथापि देवपादानामेतद्युक्तं न भवति उक्तंच स्थानेष्वेव नि
योज्या भृत्या आभरणानि च नहि चूडामणिः पादे प्रभवामीति बध्यते यतः अनभिज्ञो गुणानां यो न भृत्यैः सोनुगम्य
ते धनाढ्योपि कुलीनोपि क्रमायातोपि भूपतिः उक्तंच बुद्धिमाननुरक्तोयमिहोभयमयं जनः इति भृत्यविचारज्ञो भृत्यै
रापूर्यते नृपः असमैः समीयमानः समैश्च परिहीयमानसत्कारः धुरि यो न युज्यमानस्त्रिभिरर्थपतिं त्यजति भृत्यः
यच्चाविवेकितया राजा भृत्यानुत्तमपदयोग्यान् हीनाधमस्थाने नियोजयति न ते च तत्रैव तिष्ठंति स भूपतेर्दोषो न ते
षां उक्तंच कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते न स विरौति न चापि स शोभते भवति योजयितु
न्यपर्यंतः २ र्वचनीयता यच्च स्वाम्येवं वदति चिराद्दृश्यसे तदपि श्रूयताम् सव्यदक्षिणयोर्यत्र विशेषो नोपलभ्यते कस्तत्र क्षणमप्या
र्यो विद्यमानगतिर्वसेत् वाजिवारणलोहानां काष्ठपाषाणवाससाम् नारीपुरुषतोयानामन्तरं महदन्तरम् को

समतांकुर्वन् ५

चमाशितमरोगकारोगो यथा वृद्धिः प्रवर्त्तन्ते न तेषां संनिधौ भृत्यो नाममात्रोऽपि तिष्ठति यत्र स्वामी निर्विशेषं समं भृत्येषु वर्त्तते तत्रोद्यमसमर्थानामुत्साहः परि
हीयते न विना पार्थिवो भृत्यैर्न भृत्याः पार्थिवं विना तेषां च व्यवहारोऽयं परस्परनिबंधनः भृत्यैर्विना स्वयं राजा लोकानुग्रहकार्यपि मयूखैरिव दीप्तांशु
स्तेजस्व्यपि न शोभते अरैः संधार्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्त्तते शिरसा विधृता नित्यं स्नेहेन पालिताः केशा
अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः राजा तुष्टोऽपि भृत्यानां मानमात्रं प्रयच्छति ते तु सन्मानमात्रेण प्राणैरप्युपकुर्वते एवं ज्ञात्वा नरेन्द्रेण भृत्याः
कार्या विचक्षणाः कुलीनाः शौर्यसंयुक्ताः शक्ता भक्ताः क्रमागताः यस्मिन्कृत्यं समावेश्य निर्विशंकेन चेतसा आस्यते सेवकः स स्यात्कल
त्रमिव चापरं यः कृत्वा सुकृतं राज्ञो दुष्करं हितमुत्तमम् लज्जया वक्ति नो किंचित्तेन राजा सहायवान् यो नाहूतः समभ्येति
द्वारे तिष्ठति सर्वदा पृष्टः सत्यं मितं ब्रूते स भृत्योऽर्हो महीभुजाम् न क्षुधा पीड्यते यस्तु निद्रया न कदाचन न च शीतात
पाद्यैश्च स भृत्योऽर्हो महीभुजां श्रुत्वा सांग्रामिकीं वार्त्तां भविष्यां स्वामिनं प्रति प्रसन्नास्यो भवेद्यस्तु स भृत्योऽर्हो
सीमावृद्धिं समायाति शुक्लपक्ष इवोडुराट् नियोगसंस्थिते यस्मिन्स भृत्योऽर्हो सीमा संकोचमायाति वह्नौ चर्म इवा
हितम् स्थिते यस्मिन्स तु त्याज्यो भृत्यो राज्यं समीहता यथा शृगालोऽयमिति मन्यमानेन ममोपरि स्वा
मिनावज्ञा क्रियते तदप्ययुक्तम् उक्तं च यतः कौशेयं कृमिजं सुवर्णमुपलाद्दूर्वापि गोरोमतः पंकात्ताम

श्रीराम

रसंवाश्रांकृतउद्वेरोरं दैवरंगोमयात् कास्पादग्निरदहेः फलात् दपि मरिगोपि नतो रोचना प्राकाशं स्वकर्मोदयेन गुणि
नोगदंति किं जन्मना तथा च मल्लिकामोहजातापि हंतव्यासापकारिणी उपप्रदानैर्मार्जारो हितकृत्प्रार्थ
तेन्यतः पूरं भिंगार्थकैर्नक्षेः प्रभूतैरपि संचितैः दारुच्छत्रं यथा नास्ति तथैवाहेः प्रयोजनम् किं भक्तेनासमर्थेन
किं शक्तेनापकारिणा भक्तं च शक्तं च मां विद्धि नावज्ञातुं त्वमर्हसि पिंगलकः भवत्वेवं तावदसमर्थः समर्थो वा चिरंतन
स्त्वं मंत्रिपुत्रः तद्विश्रब्धं ब्रूहि यत्किंचिद्वक्तुमनाः दमनकः देव विज्ञाप्यं किंचिदस्ति पिंगलकः तन्निवेदय स्वमभिप्रेतं
सोब्रवीत् अपि स्वल्पतरं कार्यं यज्ज्ञवेत्पृथिवीपतेः तन्न वाच्यं सभामध्ये प्रोवाचेदं बृहस्पतिः तदेकांते मद्विज्ञप्तिमव
धारयंतु देवपादाः यतः षट्कर्णो भिद्यते मंत्रश्चतुःकर्णः स्थिरीभवेत् तस्मात्सर्वप्रयत्नेन षट्कर्णं वर्जयेत्
सुधीः अथानंतरं पिंगलकाभिप्रायज्ञा व्याघ्रद्वीपिवृकपुरस्सराः सर्वेपि तद्वचः समाकर्ण्य संसदि तत्क्षणा
देव दूरीभूताः ततश्च दमनकः उदकग्रहणार्थं प्रवृत्तस्य स्वामिनः किमिहागत्यावस्थानम् पिंगलकः नाकिंचि
दपि सविलक्षस्मितम् सोब्रवीत् देव यद्येतन्नाख्येयं तत्तिष्ठतु उक्तं च दारेषु किंचित्स्वजनेषु किंचिद्गोप्यं वय

चतंत्र

स्वे भुसुते भुक्तिं विल् एतत्तं न वा युक्तमिदं विचिंत्य बहिः क्षिप्रश्चिन्महतो नुरोधात् ततः स त्वायं पिंगलकश्चिंतया
मास योग्योयं इत्यनेन तत्कथयामि अस्मात् मनोभिप्रायम् उक्तं च स्वामिनि गुणांतरज्ञे गुणावर्तिनि भृत्येनुवर्ति
नि कलत्रे मित्रे वानुपवर्त्यैनिवेद्य दुःखं सुखी भवंति भो दमनक अत्र शोषितस्यापि दूरा [redacted] महान्तम् सोत्र
वीत् स्वामिनि श्रुणोमि तत्किम् पिंगलकः भद्राह मस्माद्वनाद्गंतुमिच्छामि दमनकः कस्मात् पिंगल
कः वर्तते घासम् वने किंचिदपूर्वं सत्वं प्रविष्टं यस्यायं सुमहान् शब्दः श्रूयते तस्यानुसारेण च पराक्रमेण शब्द
भवितव्यमिति दमनकः यत्स्वामी शब्दमात्रादपि भयमुपगतः तदप्ययुक्तम् उक्तं च अंभसा भिद्यते से
तुस्तथा मंत्रो प्यरक्षितः पैशुन्याद्भिद्यते स्नेहो वाचा भिद्यते कातरः तन्नयुक्तं स्वामिनः पूर्वपुरुषोपार्जि राम
तं वनं त्यक्तुम् यतो भेरीवेणुमृदंगवीणापटहकाहलादिभेदेन शब्दा अनेक [redacted] भवंति तत् न केव
लात् [redacted] शब्दमात्रादेव भेतव्यं उक्तं च अत्युत्कटे च रौद्रे च शत्रौ प्राप्ते न हीयते धैर्यं यस्य महीना
थो न स याति पराभवम् दर्शितभयेपि धातरि धैर्यध्वंसो भवेन्न धीराणाम् शोषितसरसि निदाघे
नितरामेवोद्धतः सिंधुः तथा च यस्य न विपदि विषादः संपदि हर्षो रणे न भीरुत्वम् तं भुवनत्रयतिलं

कंजलपतिजननीस्तुतेविरलम् तथाच शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः जन्मनो मानहीनस्य तृणस्य च
समा गतिः अपिच अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति जतुजाभरणस्येव रूपेणापि हि तस्य किम् एवं ज्ञा
त्वा स्वामिना धैर्यावष्टंभः कार्यः न शब्दमात्राद्भेतव्यम् उक्तं च पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा अनुप्र
विश्य विज्ञातं यावच्चर्म च दारु च पिंगलकः कथमेतत् स चाह कश्चित् शृगालः क्षुत्क्षामकंठ इतश्चेतश्च गोमायुर्नाम
परिभ्रमन् वने सैन्यद्वयसंग्रामभूमिमपश्यत् तस्यां च दुंदुभेः पतितस्य वायुवशात् वीरु(लता)त्शाखाग्रैर्हन्य
हृदय मानस्य शब्दम् अशृणोत् अथ क्षुभितश्चिंतयामास अहो विनष्टोस्मि हन्तेति न यावन्नास्य प्रोच्चारितशब्द
स्य दृष्टिगोचरेण गच्छामि तावदन्यतो व्रजामीति अथवा नैतद्युज्यते सहसैव पितृपैतामहं वनं त्यक्तुं उक्तं च भये वा
यदि वा हर्षे संप्राप्ते यो विमर्शयेत् कृत्यं न कुरुते वेगात् न स संतापमाप्नुयात् तत्तावज्जानामि कस्यायं
शब्दः किमिति धैर्यमालंब्य विमर्शयन् यावन्मंदमंदं गच्छति तावद्दुंदुभिमपश्यत् स च तं परिज्ञाय
समीपं गत्वा स्वयमेव कौतुकादवादयत् भूयश्च हर्षादचिंतयत् अहो चिरादेतदस्माकं महद्भोजनमापति
तम् तन्नूनं प्रभूतमांसमेदोमज्जाभिः परिपूरितं भविष्यति ततः परुषचर्मावगुंठितं तत्कथमपि विदार्य
कठिन

पंचतंत्र १ एकदेशेन छिद्रं कृत्वा सह दमनकेन प्रविष्टः परं चर्म विदारयतो दंष्ट्राभंगः संजातः अथ निराशीभूतस्तत्र्पूर्वदेशे समवलोक्य शोकेनेन मम पठर
८ न हर्षमेवमया ज्ञातमिति ततो नष्टाहं मा त्रोडं त्वया पिंगलकः सोपष्वपायं मम सर्वोपि परिस्यद्भयव्याकुलितचित्तः पलायितुमिच्छति तत्क
यमहं धैर्यावष्टंभं करोमि सो ब्रवीत् स्वामिन्नेषो मम दोषः यतः स्वामिसदृशा एव भवंति भृत्याः उक्तं च अश्वः शस्त्रं शास्त्रं वीणा वाणी
नरश्च नारी च पुरुषविशेषं प्राप्य भवंति योग्या अयोग्याश्च तत्प्रसादं कृत्वा त्वं तावदत्रैव परिपालय यावदहमेतच्छब्दस्वरूपं ज्ञात्वा
गच्छामि ततः पश्चाद्यथोचितं कार्यमिति पिंगलक आह किं तत्र भवान् गंतुमुत्सहते स आह किं स्वाम्यादेशात्सद्भृत्यस्याकमपिकृत्या
[illegible]मस्ति उक्तं च स्वाम्यादेशात्सुभृत्यस्य न भीः संजायते क्वचित् प्रविशेन्मुखमाहेयं दुस्तरं वा महार्णवम् तथा च स्वाम्यादिष्टस्तु यो
भृत्यः समं विषममेव वा मन्यते न स संधार्यो भूभुजा भूतिमिच्छता पिंगलक आह भद्र यद्येवं तद्गच्छ शिवास्ते पंथानः संतु इति दमन
कोपि तं प्रणम्य संजीवकशब्दानुसारी प्रतस्थे अथ दमनके गते भयव्याकुलितमनाः पिंगलकश्चिंतयामास अहो न शोभनं कृतं मया
यत्तस्य विश्वासं गत्वा आत्माभिप्रायो निवेदितः कदाचिद्दमनकोयमुभयवेतनो भूत्वा ममोपरि दुष्टबुद्धिः स्यात् भ्रष्टाधिकारत्वात्
उक्तं च ये भवंति महीपस्य संमानितविमानिताः यतंते तस्य नाशाय कुलीना अपि सर्वदा तत्तावदस्य चिकीर्षितं वेत्तुमन्यत्स्थानांतरं गत्वा प्र
तिपालयामि कदाचिद्दमनकस्तमादाय मां व्यापादयितुमिच्छति उक्तं च न वध्यंते ह्यविश्वस्ता बलिभिर्दुर्बला अपि विश्वस्तास्त्वेव राम.
वध्यंते बलिनो दुर्बलैरपि महामतेरपि प्राज्ञो न विश्वासं व्रजेदयो निश्वासाच्चिद्दर्शोद्गात्रादतो गर्भो विदारितः एवं संप्रधार्य स्थानांतरं ८
गत्वा दमनकमवलोकयन्नेकाकी स्थितः दमनकोपि संजीवकसंकाशं गत्वा वृषभोयमिति परिज्ञाय हृष्टमना व्यचिंतयत् अहो शो

मनमाथनितमन्ये नैतस्य संधिविग्रहद्वारेण मम पिंगलकोवश्यो भविष्यतीति उक्तंच यतः नकौलिन्यान्नसौ
हार्दान्नधियो वाक्ये प्रवर्त्तते मंत्रिणां यावदाप्तं न व्यसनं शोक एव च सद्वैद्यापफलो राजा भोग्यो भवति मंत्रिणाम्
अत एव हि वांछंति मंत्रिणः सापदं नृपम् सुस्थानेछंति निरोगः कदाचित्सुचिकित्सकम् तथापद्रहितो रा
जा सचिवं नाभिकांक्षति एवं चिंतयन् पिंगलकाभिमुख एव प्रतस्थे पिंगलकोपि तमायांतं ~~[illegible]~~ तमुत्प्रेक्ष्य
स्वाकारं गूहमानो यथापूर्वं मर्मैवस्थितः दमनकोपि पिंगलकसकाशं गत्वा प्रणम्योपविष्टः पिंगलकः किं
दृष्टं भवता तस्सत्वं दमनकः दृष्टं स्वामिप्रसादात् पिंगलकः सत्यं दृष्टं दमनकः किं स्वामिपादानामग्रे
असत्यं विज्ञाप्यते उक्तंच अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम् देवानांच विनश्येत स द्रुतं सुमहानपि
पि सर्वदेवमयो राजा मनुना संप्रकीर्त्तितः तस्मात्तमेव सेवेत न व्यलीकेन कर्हिचित् सर्वदेवमयस्या
पि विशेषो भूपतेरयम् शुभाशुभफलं सद्यो नृपाद्देवाद्भवांतरे पिंगलक आह सत्यं दृष्टं भविष्यति भ
वतो न दीनोपरि महान्तः कुप्यन्ति इति न त्वं तेन निपातितः यतः तृणानि नोन्मूलयति प्रभंजनो मृ
दूनि नीचैः प्रणतानि सर्वतः स्वभाव एवोन्नतचेतसामयं महान्महत्स्वेव करोति विक्रमम् अपिच गंड
स्थलेषु मदवारिषु बद्धरागमत्तभ्रमद्भ्रमरपादतलाहतोपि कोपं न गच्छति नितांतबलोपि नागस्तुल्ये

पंचतंत्र १ बलेनबलवान्परिकोपमेति दमनकः असौ वै महाबलः वयं कृपणाः तथापि स्वामी यदि कथयति तत्त्वत्तेजसा अहं दासं अपि करोमि पिंगल
८ कः सोल्लासं किं भवान् शक्नोत्येवं विधं कर्तुं दमनकः किमसाध्यं बुद्धेरस्ति उक्तं च न तच्छस्त्रैर्न नागेंद्रैर्न हयैर्न पदातिभिः कार्यं संसिद्धि
मभ्येति यथा बुद्ध्या प्रसाधितम् पिंगलकः यद्येवं तर्हि अमात्यपदे आरोपितस्त्वं अद्यप्रभृति निग्रहानुग्रहादिकं त्वयैव कार्यमिति निश्च
यः तस्मात्सत्वरं गत्वा तथा कुरु यथा समङ्गृस्यतामिति अथ दमनको वाढमित्यभिधाय तं प्रणम्य संजीवकसमीपं सत्वरं ग
त्वा साक्षेपमिदमाह एह्येहि दुष्ट वृषभ स्वामी पिंगलकस्त्वामाकारयति किं निःशंको भूत्वा मुहुर्मुहुर्नर्दसि इत्येतत् तच्छ्रुत्वा संजीव
कोऽब्रवीत् भद्र कोऽयं पिंगलकः दमनकः किं स्वामिनं पिंगलकमपि न जानासि तत्क्षणं ज्ञास्यसि फलेन तावत् तिष्ठ भवान् नन्वयं सर्व
मृगपरिवृतः स्वामी पिंगलको वटतले तिष्ठति तच्छ्रुत्वा गतायुषमात्मानं मन्यमानः संजीवकः परं विषादमगमत् भद्र भवान्साधु
समाचारो वचनपटुश्च दृश्यते तद्यदि मामवश्यं तत्र नयसि तत्स्वामिनोऽभयप्रदानेन नात्मीयस्वामिना प्रसादः कारयितव्यः दमनकः भोः
सत्यमभिहितं भवता नीतिरेषा यतः लभ्यते भूमिपर्यन्तः समुद्रस्य गिरेरपि न कथंचिन्महीपस्य चित्तान्तः केनापि क्वचित् तत्त्वम
त्रैव तिष्ठ यावदहं तं समये दृष्ट्वा ततः पश्चात्त्वामानयामि इति तथानुष्ठिते दमनकः पिंगलकसकाशं गत्वा इदमाह स्वामिन्न तत्प्राकृ
तं सत्वं भगवतो महेश्वरस्य वाहनभूतो वृषभ इति मया पृष्टे इदमूचे यत् श्रीमहेश्वरेण परितुष्टेन कालिंदीपारे शष्पाग्राणि चारि गीरे
तुमादिष्टोऽस्मि किं बहुना मम प्रदत्तं क्रीडार्थं वनमिदं पिंगलकः सभयं ज्ञातं मयाधुना न देवताप्रसादं विना शष्पभोजिनो नीर रामः
जाकीर्णे वने एवं निःशंकाः नदंतो भ्रमंति ततस्त्वया किमभिहितं दमनकः स्वामिन्नेतदभिहितं यदेतद्वनं चंडिकावाहनभूत ८

स्यपिंगलकस्यविषयीभूतंतद्वानभ्यागतःप्रियोतिथिरस्तितस्यसकाशंगत्वाआनीतस्तेहनैकत्रस्थानपानविहरणक्रियादिभिरेकस्थानाश्र
यणकालेनयः तेनापिसर्वमेतत्प्रतिपन्नं उक्तंचैतेनसहर्षं स्वामिनःसकाशादभयदक्षिणादापयितव्येति तदत्रस्वामीप्रमाणं तच्छ्रुत्वा
पिंगलकःसाधुसुमतेसाधुमंत्रिश्रोत्रियसाधु मेममहृदयेनसहसंमंत्र्यभवतेदमभिहितं तद्दत्तामयातस्याभयदक्षिणा परंसोपिमद
र्थेभयदक्षिणांयाचयित्वाद्रुततरमानीयतामिति अथवासाध्विदमुच्यते अंतःसारैरकुटिलैरच्छिद्रैःसुपरीक्षितैः मंत्रिभिर्धार्यतेराज्यं
सुस्तंभैरिवमंदिरम् तथा मंत्रिणांभिन्नसंधानेभिषजांसांनिपातिके कर्मणिव्यज्यतेप्रज्ञास्वस्थेकोवानपंडितः दमनकोपितं
प्रणम्यसंजीवकसकाशंप्रस्थितःसहर्षमचिंतयत् प्रसादसंमुखोनःस्वामीवचनवशगश्चसंवृत्तः तन्नास्तिधन्यतरोमम उक्तंच अमृतंशिशिरेवह्नि
रमृतंप्रियदर्शनं अमृतंराजसन्मानममृतंक्षीरभोजनम् अथसंजीवकसकाशमागत्यसप्रश्रयमुवाच भोमित्रप्रार्थितोसौमयाभवदर्थंस्वामीअभय
प्रदानं तद्विश्रब्धंगम्यतामिति परंत्वयाराजप्रसादमासाद्यसमयधर्मेणवर्तितव्यं नगर्वमासाद्यस्वप्रभुतयाचेतिवाप्रतीयं अहमपितवसंकेतेनस
चिवपदवीमाश्रित्याद्भुतंराज्यलक्ष्मींभोक्ष्यामि एवंकृतेद्वयोरप्यावयोराजलक्ष्मीर्भोग्याभविष्यति यतः आखेटकस्यधर्मेणविभवाःस्युर्वशेनृणां
नृगणाःप्रेरयत्येकोहंत्यन्योवनजान्मृगान् तथाच योनपूजयेद्गर्वादुत्तमाधममध्यमान् नृपासन्नान्समान्योपिभ्रश्यतेदंतिलोयथा संजी
नांमर वकः कथमेतत् सोब्रवीत् अस्त्यत्रधरातलेवर्धमानंनगरं तत्रदंतिलोनामनानाभांडपतिःसकलपुरनायकःप्रतिवसतिस्म तेनपुरकार्यंनृपका
र्यंचकुर्वतातुष्टिंनीतास्तत्पुरवासिनोलोकानृपतिश्च किंबहुना एवंविधश्चतुरोनदृष्टोनश्रुतोवापि अथवासाध्विदमुक्तं उक्तंच

पंचतंत्र.१ नरपतिहितकर्ता द्वेष्यतां याति लोके जनपतिहितकर्ता त्यज्यते पार्थिवेंद्रैः इति महति विरोधे वर्त्तमाने समाने नृपतिजनपदानां दुर्लभः का-
१० र्यकर्ता अथैवं गच्छति काले वर्त्तमानस्य कदाचिद्विवाहः संजातः तत्र तेन नगरवासिनो राजसंबंधिलोकाश्च संमानपुरःसरमानी-
य वस्त्रादिभिः सत्कृताः ततो विवाहानंतरं राजा सांतःपुरः स्वगृहमानीयाभ्यर्चितः अथ तस्य नृपतेर्गृहसंमार्जनकर्ता गोरंभो नाम
राजसेवको गृहायातोपि तेनानुचितस्थाने उपविष्टो विज्ञाय अर्द्धचंद्रं दत्वा निःसारितः सोपि ततः प्रभृति निश्वसन्नपमानान्न रात्रावपि
अधिशेते कथं मया तस्य भांडपते राजप्रसादहानिः कर्त्तव्येति चिंतयन्नास्ते अथवा किमनेन वृथा शरीरशोषणेन न किंचिन्मया तस्या-
पकर्तुं शक्यमिति॰ अथवा साध्विदमुच्यते यो ह्यपकर्तुमशक्तः कुप्यति किमसौ सततस्या निर्लज्जः उत्पतितोपि हि चणकः शक्तः किं
भ्राष्ट्रकं भंक्तुं अथ कदाचित्प्रत्यूषे योगनिद्रां गतस्य राज्ञः शय्यांते मार्जनं कुर्वन्निदमाह अहो दंतिलस्य महद्दृप्तत्वं यद्राजमहिषी-
मालिंगति॰ तच्छ्रुत्वा राजा ससंभ्रममुत्थाय तमुवाच भो गोरंभ सत्यमेतद्यद्देवी दंतिलेनालिंगितेति गोरंभः देव रात्रिजा-
गरणे द्यूतासक्तस्यापि मे बलान्निद्रा समायाता तन्न वेद्मि किं मयाभिहितं राजा सेर्ष्यं स्वगतं एष तावदस्मद्गृहे अप्रतिहतगतिस्तथा
दंतिलोपि तत्कदाचिदनेन देवी समालिंग्यमाना दृष्टा भविष्यति तेनेदमभिहितं॰ उक्तं च यद्वांछति दिवा मर्त्यो वीक्षते वा करो-
ति च तत्स्वप्नेपि तदभ्यासाद्ब्रूते वाथ करोति च तथा च शुभं वा यदि वा पापं यन्नृणां हृदि संस्थितं सुगूढमपि तज्ज्ञेयं स्वप्नवा- रामः
क्यात्तथा मदात् अथवा स्त्रीणां विषये कोत्र संदेहः जल्पंति सार्द्धमन्येन पश्यंत्यन्यं सविभ्रमाः हृद्गतं चिंतयंत्यन्यं प्रियः को नाम १०
योषितां एकेन स्मितपाटलाधररुचो जल्पंत्यनल्पाक्षरं वीक्षंतेन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः दूरोदारचरित्र-

धिया अमत्रवोव्यार्यंतिवान्यंतेनैकेनेत्थंपरमार्थतोऽथवादिवसेऽमात्स्येनधामशक्या तथाच नाग्निस्तृप्यतिकाष्ठानांनापगानांमहोदधिः नांतकःसर्व
भूतानांनपुंसांवामलोचनाः रहोनास्तिक्षणोनास्तिनास्तिप्रार्थयितानरः तेननारदनारीणांसतीत्वमुपजायते योमोहान्मन्यतेमूढो
रक्तेयंममकामिनी सतस्यावशगोनित्यंभवेत्क्रीडाशकुंतवत् तासांवाक्यानिकृत्यानिस्वल्पानिसुगुरूण्यपि करोतियैःकृतैर्लोकेल
घुत्वंयातिसर्वतः स्त्रियंचयःप्रार्थयतेसंनिकर्षंचगच्छति ईषच्चकुरुतेसेवांतमेवेच्छंतियोषितः अनर्थित्वान्मनुष्याणांभयात्परि
जनस्यच मर्यादायाममर्यादाःस्त्रियस्तिष्ठंतिसर्वदा॰ नासांकश्चिदगम्योस्तिनासांचवयसिस्थितिः विरूपंरूपवंतंवापुमानित्ये
पुष्प वभुंजते रक्तोहिजायतेभोग्योनारीणांशाटिकायथा घृष्यतेयोदशालंबीनितंबेविनिवेशितः अलक्तकोयथारक्तोनिपीड्य
पुरुषस्तथा अबलाभिर्बलाद्रक्तःपादमूलेनिपात्यते एवंसराजावज्ञाविधिंविलप्यततःप्रभृतिदंतिलस्यप्रसादपराङ्मुखःसं
जातः किंबहुना तस्यराजद्वारेप्रवेशोपिनिषेधितः अथदंतिलःप्रसादपराङ्मुखंराजानमवलोक्यचिंतयामास कोर्थान्प्राप्य
नगर्वितोविषयिणःकस्यापदोस्तंगताःस्त्रीभिःकस्यनखंडितंभुविमनःकोनामराज्ञांप्रियः कःकालस्यनगोचरांतरगतःको
र्थीगतोगौरवंकोवादुर्जनवागुरासुपतितःक्षेमेणयातःपुमान् काकेशौचंद्यूतकारेषुसत्यंसर्पेक्षांतिःस्त्रीषुकामोपशांतिः क्ली
बेधैर्यंमद्यपेतत्त्वचिंताराजामित्रंकेनदृष्टंश्रुतंवा अपरंच मयाअस्यभूपतेरथवान्यस्यापिराजसंबंधिनःस्वप्नेपिनानिष्टंकृतं
तत्किमेतत्॰ एवंतंदंतिलंराजद्वारेविष्कंभितमवलोक्यसंमार्जनकर्तागोरंभोविहस्यद्वारपालानिदमूचे॰ भोभोद्वारपालाःरा
जप्रसादाधिष्ठितोयंदंतिलःस्वयंनिग्रहानुग्रहकर्ताच तदनेननिवारितेनयथाअहंतथायूयमप्यर्धचंद्रभाजिनोभवि
ष्यथ तच्छ्रुत्वादंतिलश्चिंतयामास॰ नूनमस्यचेष्टितमेतत् अथवासाध्विदमुच्यते अकुलीनोपिमूर्खोपिभूपा

पंचतंत्र ॥

लंयोत्रसेवते अपिसन्मानहीनोपिससर्वत्रापिपूज्यते अपिकापुरुषोभीरुःस्याच्चेन्नृपतिसेवकः तदाप्नोति

फलंलोकात्तस्याशनादपिनोगुरुणी एवंसदन्तिलप्पविलक्षाननंउद्वेगात्कृतप्रभावःस्वगृहंगत्वानिशायां

रवेगोरंभमाहूयवस्त्रयुगलेनसन्मान्यइदमुवाच भद्रमयातदात्वमनुचितस्थानेराजासनेउपविष्टोसीति

भणित्वापमानितःनरागात्त्वंनिःसारितःतत्क्षम्यतामिति सोपिस्वर्गराज्योपमंतद्वस्त्रयुगलमासाद्यप

रंपरितोषंगत्वातमुवाच भोश्रेष्ठिन्क्षांतंमयाते तदस्यकृतसन्मानस्यप्रत्युपभवुद्धिप्रभावराजप्रसादंच

एवमुक्त्वासपरितोषंनिःक्रांतः साधुचेदमुच्यते स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं अहोसु

सदृशीचेष्टातुलायष्टेःखलस्यच अथगोरंभकस्तत्रगत्वायोगनिद्रांगतस्यराज्ञःसम्मार्जनक्रियांकुर्वन्

को॰२ इदमाह अहोविवेकस्यभूपतेर्यःपुरीषोत्सर्गंकुर्वन् चिर्भिटीभक्षणंकुरुते तच्छ्रुत्वाराजासविस्मयंतमु रामः ॥

वभ्व रेगोरंभकिमप्रस्तुतंप्रलपसि गृहकर्मकृतत्वात् त्वांनव्यापादयामि किंत्वयाकदाप्येवंपूर्वं

व
विषंकर्मसमाचरन्दृष्टः सचाह देव द्यूतासक्त्या रात्रिजागरेणान सम्मार्ज्जनं कुर्वाणस्य मम वलान्निद्रा समायाता तया
विष्टेन किंचिज्जल्पितं तन्नाहं वेद्मि तत्प्रसादं करोतु स्वामी मे परवशस्येति एवं श्रुत्वा राजा चिंतितवान् यन्मया आ
जन्मपुरीषोत्सर्गं कुर्वता कदापि चिर्भिटिका न भक्षिता तद्यथायं व्यतिकरोऽसंभाव्यो ममानेन व्याहृतः तथास्
तिलस्यापि निश्चयः तन्मया न युक्तं कृतं यत्स वराको मया सन्मानेन वियोजितः न तादृक्पुरुषाणामेवं चेष्टितं
संभाव्यते तस्याऽस्वादेन राजकृत्यानि सर्वाण्यपि शिथिलितानि व्रजंति एवमनेकधा विमृश्य दंतिलमाहूय नि
जांगाभरणवस्त्रादिभिः संयोज्य स्वाधिकारे नियोजयामास अतोऽहं ब्रवीमि यो न पूजयते गर्वादिति संजी
वकः भद्र एवमेवैतद्यद्भवताभिहितम् तदेवं मया कर्त्तव्यमिति एवमभिहिते दमनकस्तमादाय पिंगलक
सकाशमगमत् आह च देव एष मया संजीवक आनीतो देवोऽधुना प्रमाणम् संजीवकोपि सादरं प्रणम्या
ग्रतः सविनयं स्थितः पिंगलकोपि तस्य पीनायतककुद्म[illegible]तो नखकुलिशालंकृतं दक्षिणपाणि

पंचतंत्र१ मुपरिदत्वा मानपुरःसरमुवाच अयि भवतः चिरं कृतस्नमस्निग्धजनेन वनेऽस्मिन् मायातोसि तेनाप्यालापः कथितः यथा एकाकिनो मम सह
९२ वियोगः संजातस्तथा सर्वं निवेदितं एतच्छ्रुत्वा पिंगलकः सादरतरं तमुवाच वयस्य न भेतव्यं यच्च मद्भुजपरिरक्षिते वने यथेच्छया पुनः
वर्त्तितव्यं अन्यच्च नित्यं मत्समीपवर्त्तिना भाव्यं एवमुक्त्वा सकलमृगपरिवृतो यमुनाकच्छमवतीर्य उदकं यथेच्छं पीत्वा स्वेच्छया
तदेव वनं प्रविष्टः ततश्च करटकदमनकाभ्यां निक्षिप्तराज्यभारः संजीवकेन सह सुभाषितगोष्ठीमनुभवन्नास्ते अथवा साध्विदमु
च्यते यतः यदृच्छयाप्युपनतं सकृत्सज्जनसंगतं भवत्यजरमत्यन्तं नाभ्यासक्रममीक्षते
संजीवकेनाप्यनेकशास्त्रावगाहनादुत्पन्नबुद्धिप्रागल्भ्येन स्वल्पैरेवाहोभिर्मूढमतिः पिंगलको धीमान् तथा कृतः यथा
आरण्यधर्माद्व्याघ्राम्याधर्मे विनियोजितः किंबहुना प्रत्यहं पिंगलकसंजीवकावेव केवलं रहसि मिथो मन्त्रयतः
शेषः सर्वोपि मृगजनो दूरीभूतस्तिष्ठति करटकदमनकावपि प्रवेशं न लभेते अन्यच्च सिंहपराक्रमाभावात् सर्वोपि
मृगजनः क्षुधाविष्टः कोदिशीकः संहतः उक्तंच फलहीनं नृपं भृत्याः कुलीनमपि चोन्नतं संत्यज्यान्यत्र गच्छन्ति
शुष्कं वृक्षमिवाण्डजाः तथाच अपि सन्मानसंयुक्ताः कुलीना भक्तितत्पराः वृत्तिभंगान्महीपालं त्यक्त्वा यान्ति सु राम:
सेवकाः अन्यच्च कालातिक्रमणं वृत्तेर्यो न कुर्वीत भूपतिः कदाचित्तं न मुंचंति भर्त्सिता अपि सेवकाः तथान्ये ९२
केवलं सेवका एव ईदृशं भवंति आसंसारं समस्तमेतदन्योन्यं पितापुत्रयोरपि सामादिभिरुपायैस्तिष्ठति न

यथा॰ रेखानामुपरि स्नायात्मातुराणां चिकित्सकाः वणिजो ग्राहकाणां मूर्खाणामपि पंडिताः प्रमादिनां तथा चौरा भिक्षुका
गृहमेधिनां॰ गणिकाः कामुकानां च तथा सर्वशिल्पिनः सामोदसाध्यैः पाशैः प्रतीक्षंते दिवानिशम् भुंजंते च यथाश
क्ति जलजान्यजलजो यथा अथवा साध्विदमुच्यते सर्पाणां च खलानां च परद्रव्यापहारिणां अभिप्राया न सिध्यंति तेने
दं वर्तते जगत् अत्तुं वांछति शांभवो गणपतेराखुं क्षुधार्तः फणी तं च क्रौंचरिपोः शिखी गिरिसुतासिंहोपि नागाननम्
इत्थं यत्र परिग्रहस्य घटना शंभोरपि स्याद्गृहे तत्रान्यस्य कथं न भावि जगतो यस्मात्स्वरूपं हि तत् ततः उत्सामकोप
रस्परं करटकदमनकौ मंत्रयेते तत्र दमनको ब्रूते भद्र तावदावां अप्रधानतां गतौ एष च पिंगलकः संजीवकानुरक्तः
स्वव्यापारपराङ्मुखः स्थितः सर्वोपि परिजनो गतः तत्किं क्रियते करटकः यद्यपि त्वदीय वचनं न करोति तथापि त्वा
त्मनो दोषपरिहाराय वाच्यः उक्तं च॰ अशृण्वन्नपि बोद्धव्यो मंत्रिभिः पृथिवीपतिः यथा स्वदोषनाशाय विदुरेणांबि
कासुतः तथा च मदोन्मत्तस्य भूपस्य कुंजरस्य च गच्छतः उन्मार्गं वाच्यतां यांति महामात्याः समीपगाः यत्त्वयैव शा
स्तुताभक्षः ष्पभोजी स्वामिनः सकाशमानीतः ततः स्वहस्तेनांगाराः कर्षिताः दमनक आह सत्यमेतन्ममायं दोषो न स्वामिनः उ
मेषयोर्युद्धेन क्तं च जंबुको हुडुयुद्धेन वयं चाषाढभूतिना दूतिका परकार्येण त्रयो दोषाः स्वयंकृताः करटक आह कथमेतत् संन्यासी
एकांते सोऽब्रवीत् अस्ति कस्मिंश्चिद्विविक्तप्रदेशे मठायतनं तत्र देवशर्मा नाम परिव्राजकः प्रतिवसति तस्य तै
र्नेकसाधुजनदत्तसूक्ष्मवस्त्रविक्रयवशात्कालेन महती वित्तमात्रा संजाता ततो न कस्यचिद्विश्वसिति न
क्तंदिवं कक्षांतरात्तां मात्रां न मुंचति अथवा साध्विदमुच्यते अर्थानामर्जने दुःखमर्जितानां च रक्षणे आये दुःखं

वाद्दकक्षाभ्यंतरात्

सविनयं॥

पं०तं० १ अथ भुवं धियार्योः कष्टसंश्रया॥ अथास्ति काउ भृतिर्नाम परविन्तापहारकस्तस्मर्थयात्रो तस्य कस्तान रमतां तस्यै प्रसावात्र्यचिंत दला
पत: कथं मया स्वद्रव्यमात्रा हर्तव्याति॰ तदद्द मा का कवं नो वेश्वास्य आत्रतो अनानि येन मा विश्वास्तः कथ्यां चाहं श्रो समेति उ
१३ कंव॰ नाविदग्धः प्रियं ब्रूयात् स्फुटं वक्ता न वंचकः॰ नि:स्पृहो नाधिकारी स्यान्नाकामी मंडनप्रियः॥ एवं निश्चित्य तस्या
तिकं अपकाम्य नमः शिवायेति प्रोच्चार्य्य साष्टांगं प्रणम्य सश्रयं यथु वाच भगवन्न सारः संसारोयं॰ अर्थाः पादरजः
समा गिरिनदीवेगोपमं यौवनं मानुष्यं जलविंदुलोलं स्वप्नं फेनोपमं जीवितं॰ धर्म्मं यो न करोति निश्चलमतिः स्वर्ग
र्ग लोकोद्घाटने पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते॰ गिरिनदीवेगोपमं यौवनं॰ तृणाग्निसमं जीवितं अभ्र
राशुच्छाया सदृशा भोगाः स्वप्नसदृशो मित्रपुत्रकलत्रभृत्यवर्गसंयोगः॰ एवं मया सम्यक् परिज्ञातं॰ तत्किं कु
र्वतो मे संसारसमुद्रोत्तरणं भविष्यति॰ न कृत्वा देववदतो सादरमाह॰ वत्स धन्योसि यत्प्रथमे वयसि एवंवि
रक्तभावः उक्तं च॰ एवं वयसि यः शान्तः स शान्त इति मे मतिः॰ धातुषु क्षीयमाणेषु शमः कस्य न जायते॰ आदो
चित्ते ततः काये सतां संपद्यते जरा॰ असतां तु पुनः काये नैव चित्ते कदाचन॰ यच्च मां संसारसागरोत्तारणोपायं पृच्छ
सि तच्छ्रूयतां॰ शूद्रो वा यदि वान्योपि चंडालोपि जटाधरः॰ दीक्षितः शिवमंत्रेण स भस्मांगी शिवो १२
भवेत्॰ षडक्षरेण मंत्रेण पुष्पमेकमपि स्वयं॰ लिंगस्य मूर्द्ध्नि यो दद्यान्न स भूयोपि जायते॰ तच्छ्रुत्वा

कादिषु॥

आषाढभूतिः पादौ गृहीत्वा सप्रश्रयमिदमाह भगवन्दीक्षया मामनुग्रहं कुरु॰ ततो देवशर्मोवत्सानुग्रहं ते करिष्यामि॰ परं रा
त्रौ त्वया मठमध्ये न प्रवेष्टव्यं॰ किं कारणं॰ यतो निःसंगता यतीनां प्रशस्यते॰ तथा चोक्तं॰ दुर्मंत्रान्नृपतिर्विनश्यति य
तिः संगात्सुतो लालनाद्विप्रोनध्ययनात्कुलं कुतनयात्स्नेहः प्रवासाश्रयात् मैत्री चाप्रणयात्समृद्धिरनयाच्छीलं खलो
पासनात् ह्रीर्मद्यादनवेक्षणादपि कृषिस्त्यागात्प्रमादाद्धनम्॰ ततस्त्वया व्रतग्रहणानंतरं मठद्वारे तृणकुटीरके शयि
तव्यं॰ स चाह॰ भगवन्भवदादेशः प्रमाणं॰ परत्रापि तेन मे प्रयोजनं॰ अथ कृतशयनसमयं देवशर्मा अनुग्रहं कृत्वा शा
स्त्रोक्तविधिना शिष्यतामनयत्॰ सोपि हस्तपादावमर्दनपरिचर्यादिना तं परितोषमनयत्॰ पुनस्तथापि मुनिः
कक्षांतरान्मात्रां न मुंचति॰ अथैवं गच्छति काले आषाढभूतिश्चिंतयामास॰ अहो नैष कथंचिदपि मे विश्वासमेति॰ तत्किं दिवा
शस्त्रेण निहन्मि किं वा विषं प्रयच्छामि किं वा पशुधर्मेण व्यापादयामि॰ इत्येवं चिंतयतस्तस्य देवशर्मणोपि शिष्यपुत्रः कश्चित्सरि
ग्रामान्निमंत्रणाय समायातः॰ आह च॰ भगवन्पवित्रारोपणकृते मम गृहमागम्यतामिति॰ तच्छ्रुत्वा देवशर्मा आषाढभू
तिना सह प्रहृष्टमनाः प्रस्थितः॰ अथैवं गच्छतोग्रे काचिन्नदी समायाता॰ तां दृष्ट्वा मात्रां कक्षांतरादवतार्य कंथामध्ये सु
गुप्तां निधाय स्नात्वा देवतार्चनं कृत्वा तदनंतरमाषाढभूतिमिदमाह भो आषाढभूते यावदहं पुरीषोत्सर्गं कृत्वा आ
गच्छामि तावदेषा कंथा योगेश्वरस्य सावधानेन रक्षणीया नस्पृष्टव्या वदत्तु कागतः आषाढभूतिरपि तस्मिन्नदर्शनीभू
ते मात्रामादाय सत्वरं प्रस्थितः देवशर्मापि छात्रगुणानुरंजितमनाः सुविश्वस्तो यावदुपविष्टस्तिष्ठति तावत्कन
कतामदहयूथमध्ये हुडुयुद्धमपश्यत् अथ रोषवशात् हुडुयुगलस्य दूरमपसरणं कृत्वा भूयोपि समेत्य

पादांकयुतमार्गं तत्काले गस्त्रापनं कृतं ५

शृगालः ५

पंचतंत्रं १ दृष्ट्वा मांसप्रहारतो महद्रुधिरं पतति तच्च जंबुकोऽपि जिह्वालौल्यात् रंगभूमिं प्रविश्यास्वादयति देवशर्मापि विलोकयन् चिंतयति। अहो मं
२८ दमतिरयं जंबुको यदि कथमपि आभ्यां संकटे पतिष्यति तन्नूनं मृत्युमेष्यतीति तर्कयामि· अत्रांतरे तथैव रक्तास्वादलौल्या
न्मध्यमविशत् तयोः शिरःसंपाते पतितो मृतश्च शृगालः। देवशर्मापि तं शोचमानो मात्रापहर्तारं पश्यन् शनैः शनैः प्रस्थितो यावद
धावत्तावदाषाढभूतिं न पश्यति स्म· ततश्चोत्सुकत्वात् शौचं विधाय यावत् कंथामालोकयति तावन्मात्रां न पश्यति· ततश्च हा
जाकितोलि मुषितोऽस्मीति जल्पन्मूर्छी भूतले निपपात। ततः क्षणाच्चेतनां लब्ध्वा भूयोपि समुत्थाय फूत्कर्तुमारब्धः। भो आषाढभूते मां वंच
यित्वा क्व गतोऽसि तद्देहि मे प्रतिवचनं एवं बहुविधं विलप्य तस्य पदपद्धतिमन्वेषयन् शनैः २ प्रस्थितः· अथैवं गच्छन् सायंसम
मद्यपः ये कंचिद्ग्राममाससाद अथ तस्माद्ग्रामात् कश्चित्कौलिकः सभार्यो मद्यपानकृते समीपवर्तिनि नगरे प्रस्थितः। देवशर्मापि
सूर्योढेनागतः तमालोक्य प्रोवाच भो भद्र वयं सूर्योढाः अतिथयस्तवांतिकं प्राप्ताः। न कमप्यत्र ग्रामे जानीमः। तद्गृह्यतामतिथिधर्मः। उक्तं च·
संप्राप्तो योऽतिथिः सायं सूर्योढो गृहमेधिनाम् पूजया तस्य देवत्वं लभंते गृहमेधिनः। तथा च तृणानि भूमिरुदकं वाक् चतुर्थी गृहस्था
च सूनृता सतामेतानि हर्म्येषु नोच्छिद्यंते कदाचन पाद्यशौचेन गावो देवा भोज्याद्यं तुष्यंत्यतिथेः स्वागतेनाग्नयस्तृप्ता आ यमः
सनेन शतक्रतुः कौलिकोपि तच्छ्रुत्वा भार्यामाह· प्रिये गच्छ त्वमतिथिमादाय गृहं प्रति पादशौचभोजनशयनादिभिः स
यथन्मुं २ त्कृत्य त्वं तत्रैव तिष्ठ अहं तव कृते प्रभूततमं मद्यमानयिष्ये एवमुक्त्वा प्रस्थितः। सापि भार्या पुंश्चली तमादाय प्रहसि १८
तवदना देवदत्तं ध्यायंती गृहं प्रतस्थे अथवा साध्विदमुच्यते दुर्द्दिवसे सितपक्षे कुसवारासु नगरवीथीषु पत्यौ

सूर्योढ आगतः ५ पथं

जीवनसंदेहे २ — यांशुलावंधकीवेश्या पसती पुंश्चली त्वरीरत्वमनः २
अनीसिते भर्तारि २

विदेशायाते पत्यं सुखं जघनचपलायाः तथाच पर्य्यंकेष्वास्तरणं पतिमनुकूलं मनोहरं शयनं तृणमिव लघु मन्यंते कामिन्यश्चौर्य्यर
तस्थाः तथाच केलिः प्रहरणिमक्षोश्रृंगारोस्मीनिवाटवः कटवः वेषकाः परितोषो नस्यादसमीहितेपत्यौ कुलपतनं जनग
र्हविबंधनमपि प्राणानां मसंदेहं अंगीकरोति तत्क्षणमेव जारपरपुरुषसंसक्ता अथ सा गृहं गत्वा दवेश्या मेलोपेतां स्तरणां अन्नां [illegible]
रवद्रांसमर्प्पैदमाह भो भगवत्या वदस्या मा दन्याग तास्वसर्वीसंभाव्यद्य तन्मागच्छामितावत्त्वया मद्गृहमप्रमत्तेन भाव्यं
एवमभिधाय श्रृंगारविधिं विधाय यावद्देवदत्तसुहृद्गृहं प्रव्रजतितावत्तस्य मुखं मर्दयित्वा [illegible] लकेशाः पदे २ स्खलन्नाहि
तमद्य मंडलस्त्याः पतिः संमुखः समायातः तं च दृष्ट्वाद्भुततरं व्याघुट्य स्फुटं गृहं प्रविश्य प्रसुप्ता [illegible] श्रृंगारा यथा पूर्वमभवत् कौ
गोपयन् — लिकोपि तां कृतागु तयश्रृंगारां पलायमानां विलोक्य प्राग्वत्कर्णपरंपरया तस्याः अपवादश्रवणात्क्षुभितहृदयः दुश्चा
कारं निगूहमानः सदैवास्ते ततश्च तत्तथाविधं चेष्टितमवलोक्य दृष्टप्रत्ययः क्रोधवशाद्गृहं प्रविश्य तामाह दुश्चारि — व्यभिचारिणि
णि क्व प्रस्थितासि सा प्राह अहं त्वत्सकाशादागता न कुत्रचिन्निर्गता तात्किमद्य मद्यवशादसंबद्धं वदसि अथवा साधु वद — अपकांत
मुच्यते वैकल्यं धरणीपातनमयथोचितजल्पनं सन्निपातस्य चिह्नानि मद्यं सर्वाणि दर्शयेत् कर कंदो वरत्यागस्ते
जोहानिः सरागता वारुणीसंगजावस्था भानुनाप्यनुभूयते सोपि तत्कुलत्वाश्रुति कूलवचनं वेषविपर्ययं चावलो
क्य तामाह हे पुंश्चलि चिरकालान्मयात्र कर्णं तावापवादः तदद्य स्वयं संजातः प्रत्ययः तदयथोचितानियद्दं करोमि तत्
निर्धाय लकुडप्रहारैस्तां जर्जरीकृतदेहां विधाय स्थूणया सह बंधनेन बद्ध्वा सोपि मदविह्वलान् [illegible] निद्रावशमगात्

मदिरापानिमादिकव वारुणी ३ — संदेहीमन १

पं.तं. १ अत्रांतरे तस्याः सखी नापिती कौलिकं निद्रावशगतं विज्ञाय तां गत्वा इदमाह सखि स देवदत्तस्तस्मिन्स्थाने त्वां प्रतीक्षते
१५ तत्शीघ्रं गम्यतामिति । सा चाह पश्य मे अवस्थां तत्कथं गच्छामि तद्गत्वा तं कामिनं वद अत्रावसरे न त्वया सह संगमः
सा प्राह सखि मा मैवं वद नायं कुलटाधर्मः उक्तं च विषमस्थस्वादुफलग्रहणव्यवसायनिश्चयो येषां उष्ट्राणामिव तेषां
मन्येहं शंसितं जन्म तथा च संदिग्धे परलोके जनापवादे च जगति बहुचित्रे स्वाधीने परं रमणे धन्यास्तारुण्यफल
भाजः अन्यच्च यदि भवति दैवयोगात्पुमान्विरूपोपि बंधकी रहसि न तु कृच्छ्रादपि भद्रं निजकांतं सा भजत्येवं सा प्राह
तदेवमस्त्विति तदनु सा नापिती तां स्वसखीं बंधनाद्विमोच्य तस्याः स्थाने यथापूर्वमात्मानं बध्वा तां देवदत्तसकाशं
संकेतस्थाने प्रेषितवती तथानुष्ठिते कौलिकः कस्मिंश्चित्क्षणे समुत्थाय किंचिद्गतकोपो विमदस्तामाह हे परुष
भाषवादिनि यदद्यप्रभृति गृहान्निष्क्रमणं न करोषि न च परुषं वदसि ततस्त्वां मोचयामि नापितीपि स्वरभेदभ
याद्यावन्न किंचिदूचे तावत्सोपि भूयोभूयस्तदेवाह अथ यावत्सा प्रत्युत्तरं न ददाति तावत्तेन कुपितेन तीक्ष्णं शस्त्र
मादाय तस्याश्छिन्ना नासिका आह च दुश्चारिणि तिष्ठेदानीं न त्वां भूयस्तोषयिष्यामीति जल्पन्पुनरपि निद्रावश
मगात् देवशर्मापि वित्तनाशात् क्षुत्क्षामकंठो नष्टनिद्रः स तत्सर्वं स्त्रीचरित्रमपश्यत् सापि कौलिकी यथेच्छया
देवदत्तेन सह सुरतसुखमनुभूय कस्मिंश्चित्क्षणे स्वगृहमागत्य नापितीमिदमाह अपि शिवं भवत्याः नो यामः
बंधाल्लाभिर्गता पापी तिष्ठति नापित्याह शिवं नासिकया विना दोषस्य शरीरस्य तद्द्रुततं मां मोचय यावन्नायं १५
मां पश्यति

पत्रपतियेनस्वगृहंगच्छामि॥ इतितथानुष्ठितेभूयोपिकौलिकउत्त्यानामाह॥ पुंश्चलिकिमद्यापिनवदसि॥ किंभूयोपिश्रुतोदुष्टतरंकर्णछेदा
दिनियहंकरोमि॥ अथसासकोपंसाधिक्षेपमिदंतमाह॥ धिङ्मूढकोमांमहासतींधर्षयितुंव्यंगयितुंवसमर्थः॥ ततःशृणवंतुसर्वेपिलोक
पालाः॥ आदित्यचंद्रावनलोनिलश्चद्यौर्भूमिरापोहृदयंयमश्च॥ अहश्चरात्रिश्चउभेचसंध्येधर्मोविजानातिनरस्यवृत्तं॥ सूर्यःसोमोयमः
कालोमहाभूतानिपंचच॥ एतेशुभाशुभस्येहकर्मणोनवसाक्षिणः॥ यद्यहिममसत्वमस्तिमनसापिपरपुरुषोनाभिलषितः॥ ततोदेवाभूयोपिमे
नासिकांतादृक्कुरूपामक्षतांकुर्वंतु॥ अथवायदिममचित्तेपरपुरुषस्यभ्रांतिरपिभवतितततोमांभस्मसान्नयंतु॥ एवमुक्त्वाभूयोपितमाह॥ भोदु
रात्मन्पश्यपश्यमेसतीत्वप्रभावेननाहंगवनासिकासंवृत्ता॥ अथासावुल्मुकमादायचावत्पश्यतितावत्तद्रूपांनासिकांभूतलेरक्तप्रवाहंचमस्तांन
मपश्यत्॥ अथसविस्मितमनास्तांबंधनादुन्मोच्यशय्यायामारोप्यचाटुशतैःपर्यतोषयत्॥ देवशर्मापितत्सर्वंदृष्ट्वाजातमालोक्यविस्मितमना
इदं[illegible]पाठनोक्तमाह॥ शंबरस्यचयामायायामायानमुचेरपि॥ बलेःकुंभीनसस्यापिसर्वास्तायोषितोविदुः॥ हसंतंप्रहसंत्येतारुदंतंप्ररुदंत्यपि॥
अप्रियंप्रियवाक्यैश्चगृह्णंतेकालयोगतः॥ उशनावेदयच्छास्त्रंयच्चवेदबृहस्पतिः॥ स्त्रीबुद्ध्यानविशिष्येततस्माद्रक्ष्याःकथंहिताः॥ अनृतंसत्य
मित्याहुःसत्यंचापितथानृतं॥ इतियास्ताःकथंधीरैःसंरक्ष्याःपुरुषैरिह॥ अन्यच्चाप्युक्तं॥ नातिप्रसंगःप्रमदासुकार्योनेच्छेद्बलंस्त्रीषुविव
र्धमानं॥ अतिप्रसक्तैःपुरुषैर्यतस्ताःक्रीडंतिकाकैरिवलूनपक्षैः॥ सुमुखेनवदंतिवल्गुना॥ प्रहरंत्येवशितेनचेतसा॥ मधुतिष्ठतिवाचियो

उग्रा च हृदयं तेयेन ददर्श यत्स्वल्पं तद्गतं भावः पर्वतस्य समार्गो विषमः स्त्रीणां न विज्ञायते चित्तं पुष्करपत्रवारितरलं विद्युद्रागं संसितं नारीणां [illegible] कुटिलतास्त्रिषु [illegible]

पं॰ तं॰ १ मितैर्मधुरस्तुत्वैः कमलैयत्पालिभिः मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलं॰ अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते॰ कार्कश्यं
१६ स्तनयोर्दृशोस्तरलताऽलीकं मुखे श्लाघ्यते कौटिल्यं कुचसंचये प्रवचने मान्द्यं त्रिके स्थूलता॰ भीरुत्वं हृदये सदैव कथितं मायाप्रयोगः प्रिये यासां
दोषगणो गुणो मृगदृशां ताः स्युर्नराणां प्रियाः॰ अपि च॰ अधोमुखेकदंष्ट्रेण जघनान्तरचारिणा॰ सर्वथाप्याचिकित्स्योऽन जगद्दष्टो भगाहिना॰ अधिक [illegible]
ग्रामः अपरं च॰ आवर्तः संशयानामविनयभवनं पत्तनं साहसानां दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां॰ दुर्ग्राह्यं यन्महद्भिर्नरव
के रवृषभैः सर्वमायाकरंडं स्त्रीयंत्रं येन लोके विषममृतमयं धर्मनाशाय सृष्टं॰ एता हसंति च रुदंति च वित्तहेतोर्विश्वासयंति च परं न च विश्व
संति॰ तस्मान्नरेण कुलशीलवता सदैव नार्यः श्मशानघटिका इव वर्जनीयाः॰ कुर्वंति तावत्प्रथमं प्रियाणि यावन्न जानंति नरं प्रसक्तं॰
ज्ञात्वा च तं मन्मथपाशबद्धं ग्रस्तामिषं मीनमिवोद्धरंति॰ किंच॰ समुद्रवीचीव चलस्वभावाः संध्याभ्ररेखेव मुहूर्तरागाः स्त्रियः कृतार्थाः
पुरुषं निरर्थकं निःपीडितालक्तकवत्त्यजंति॰ अनृतं साहसं माया मूर्खत्वमतिलोभता॰ अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः॰
संमोहयंति मदयंति विडंबयंति निर्भर्त्सयंति रमयंति विषादयंति॰ एताः प्रविश्य सदयं हृदयं नराणां किं नाम वामनयना न समा ग्राम
चरंति॰ अंतर्विषमया ह्येता बहिश्चैव मनोरमाः॰ गुंजाफलसमाकारा योषितः केन निर्मिताः॰ एवमनेकानि दूषणानि चिंतयतः स्वस्य १६
रिव्राजकस्य निशा क्लेशेणातिचक्राम॰ सा च दूतिकाह्यगत छिन्ननासिका स्वगृहं गत्वा चिंतयामास॰ किमिदानीं कर्तव्यं॰ क

[illegible]

२का १से २ दि... हैं ११से ...तक न हैं

यमेतन्महत्त्विडंबयितव्यं । अथ तस्या एवं चिंतयंत्या भर्त्ता कार्यवशाद्राजकुलेपर्युषितः प्रत्यूषे स्वगृहमनुपेत्य द्वारदेशस्थः पौरकृत्योत्सु
कतया तामाह शीघ्रमानीयतां क्षुरभांडं येन क्षौरकर्मकरणाय गच्छामि । ततः सापि छिन्ननासिका गृहमध्यस्थितैव कार्यकरणापेक्षया
क्षुरभांडात्क्षुरमेकमादाय तस्याभिमुखं प्रेषयामास । नापितोप्युत्सुकतया अभांडं क्षुरमालोक्य कुपितो तदभिमुखमेव तं क्षुरं प्राहिणो
त् । एतस्मिन्नंतरे सा दुष्टा ऊर्ध्वं बाहू विधाय फूत्कुर्वती गृहान्निश्चक्राम । पापेनानेन मम सदाचारवर्त्तिन्याः पश्य पतन्नासिकाछेदो विहि
तः तत्परित्रायतां । अत्रांतरे राजपुरुषा अभ्युपेत्य तं नापितं लकुडप्रहारैर्जर्जरीकृत्य दृढबंधनेन बध्वा तया छिन्ननासिकया सह धर्मा
धिकारिणस्थानं नीत्वा सभ्यानूचुः । शृण्वंतु भवंतः सभासदः । यदनेन नापितेनापराधं विना स्त्रीरत्नमेतद्व्यंगितं तदस्य यद्युज्यते
तत्क्रियतां । ततस्ते सभ्या ऊचुः । रे नापित किमर्थं त्वया यं स्त्री व्यंगिता । किमनया परपुरुषोभिलषितः उतस्वित्प्राणद्रोहः कृतः किंवा
चौर्यकर्माचरितं । तत्कथ्यतामस्या अपराधः । अथ नापितोपि प्रहारपीडितो वक्तुं न शशाक । अथ तं नापितं तूष्णींभूतं दृष्ट्वा पुनः स
भ्या ऊचुः । अहो सत्यमेतद्राजपुरुषाणां वचः । पापात्मायं । अनेनेयं निर्दोषा वराकी दूषिता । उक्तं च । भिन्नस्वरमुखवर्णः शंकि
तदृष्टिः समुत्पतिततेजाः । भवति हि पापं कृत्वा स्वकर्मसंत्रासितः पुरुषः । तथा च । आयातः स्खलितैः पादैर्मुखवैवर्ण्यसंयुतः ।
ललाटस्वेदभाग्भूरि गद्गदं भाषते वचः । अधोदृष्टिर्वदेत्कृत्वा पापं प्राप्तः सभां नरः । तस्माद्यत्नात्परीक्ष्यस्ते चिह्नैरेतैर्विचक्षणैः ।
अन्यच्च । प्रसन्नवदनो हृष्टः स्पष्टवाक्यः सरोषदृक् । सभायां वक्ति सामर्षं सावष्टंभो नरः शुचिः । तदयं दुष्टचरित्रलक्षणो
दृश्यते । स्त्रीधर्षणाद्वध्य इति । तच्छूलायामारोप्यतामिति । अथ वध्यस्थाने तं नीयमानमवलोक्य देवशर्मा तं धर्माधिकारि
णं गत्वा प्रोवाच । भो २ सभासद अन्यायेनैष वराको नापितो वध्यते साधुसमाचारोयं । तच्छ्रूयतां मे वाक्यं । जंबुको हुडुयु
सभासदः २

भगवन्

पं.तं. १ कृतं यथं वाग्बाद् भूतिना दूतिका पर[illegible] कार्येतान्त्रयो दोषाः स्वयं कृताः ॥ अथ ते सभ्याः प्रोचुः भोः कथमेतत् । ततश्च देवशर्मापि तेषां त्र
याणामपि वृत्तांतं सविस्तरमकथयत् । तदाकर्ण्य ते सुविस्मितवयसो नापितं विमोच्य मिथः प्रोचुः अहो अवध्यो ब्राह्मणो बालः स्त्री त
पस्वी च रोगभाक् विहिता व्यंगिनास्तेषामपराधे महत्यपि तदस्या नासिकाच्छेदः स्वकर्मणा संवृत्तः एतन्नियतेऽस्य कर्णच्छेदः कार्यः
तथानुष्ठिते देवशर्मापि वित्तनाशसमुद्भूतशोकरहितः पुनरपि तदेवस्वकीयं मठायतनमगात् । अतोहं ब्रवीमि जंबुको हुडुयुद्धे
ति । करटकः यद्येतोऽपि देवशर्मा तेनाषाढभूतिना कथं वंचितः दमनकः मुक्त्वा कस्यचिदस्य अस्तोप्यतं न गच्छति । कौलिको तंतुवायः
विष्णुरूपेण राजकन्यां निषेवते करटकः कथमेतत् । दमनकः कस्मिंश्चिदधिष्ठाने कौलिकरथकारौ मित्रे प्रतिवसतः स्म । तत्र
तावाजन्मतः प्रभृति सहचारिणौ वाल्ये परस्परमतीव स्नेहेन वर्तमानौ सर्वदा विहारिणौ कालं नयतः । अथ कदाचित्तत्रा
धिष्ठाने कस्मिंश्चिद्देवतायतने यात्रामहोत्सवः संप्रवृत्तः । तत्र च नटनर्तकचारणसंकुले नानादेशागतजनावृते तौ सहचारी
तंत्रम् ६ भ्रमन्तौ काचिद्राजकन्यां करेणुकारूढां सर्वलक्षणसनाथां कंचुकिवर्षधरपरिवारितां देवतादर्शनाय समायातां दृष्टवंतौ । रामः
अथासौ कौलिकस्तां दृष्ट्वा विषार्दित इव दुष्टग्रहगृहीत इव कामशरैर्हन्यमानः सहसा भूमौ निपपात । अथ तं तदवस्थमवलोक्य ७
रथकारस्तद्दुःखदुःखितः आप्तपुरुषैस्तं समुत्क्षिप्य स्वगृहमानाययत् । तत्र च विविधैः शीतोपचारैश्चिकित्सकोपदिष्टैर्मन्त्रवा
दिभिरुपचर्यमाणश्चिरात्कथंचित्सचेतनो बभूव । ततो रथकारेण पृष्टः भो मित्र किमेवं त्वमकस्माद्विचेतनो जातः । तत्कथ्यता
मात्मस्वरूपं । स आह । वयस्य यद्येवं तच्छृणु तद्रहस्यं येन सर्वामात्मवेदनां ते वदामि यदि त्वं मां सुहृदं मन्यसे तत्काष्ठप्रदा
नेन प्रसादः क्रियतां क्षम्यतां यच्च किंचित्प्रणयातिरेकादयुक्तं तत्त्वया मयानुष्ठितं । सोपि तदाकर्ण्य बाष्पव्याहतनयनः स
रागव्याकारमेकं नरकशतमहादुःखसंप्राप्तिहेतुर्मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य । कंदर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबंधं लो
कालाञ्चयन्नयं श्रेयःकुसुमवनं यौवनादन्यदस्ति । [illegible] [illegible]

सन्मार्गे तावदास्ते प्रभवति हि नरस्तावदेवेंद्रियाणां लज्जां तावद्विधत्ते विनयमपि समालंबते तावदेव भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्मा यावदेता
लीलावतीनां हृदि धृतिमुषो दृष्टिबाणाः पतंति संसारसारपर्यंतपदवी न दवीयसी अंतरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः कामिनीकायकांतारे कुचपर्वतदुर्गमे
मा संचर मनः पांथ तत्रास्ते स्मरतस्करः

रथकार उवाच वयस्य किं तद्दुःखकारणं न तद्दर्ये न प्रतीकारः क्रियते यदि शक्यते कर्तुं. उक्तं च यतः औषधानां सकलं ज्ञानानां बुद्धेश्च महात्मनां अ
साध्यं नास्ति लोकेत्र यद्ब्रह्माण्डस्य मध्यगं तदेषां चतुर्णां यदि साध्यं भविष्यति तदहं साधयिष्यामि कौलिकः वयस्य एतेषामन्येषामपि स
हस्रशः उपायानामसाध्यं तन्मम दुःखं तस्मान्मम मरणे मा कालक्षेपं कुरु. रथकार आह तथापि निवेदय येनाहमपि तदसाध्यं मत्वा वि
ह्नि(?)या सह वह्नौ प्रविशामि न क्षणमपि त्वद्वियोगं सहिष्ये एष मे निश्चयः । कौलिकः वयस्य योसौ राजकन्या करेणुकारूढा तत्रोत्सवे दृष्टा
कौपेन तस्याः दर्शनानंतरं भगवता मकरध्वजेन ममेयमवस्था विहिता । तन्न शक्नोमि तद्वेदनां सोढुं. रथकारोपि सस्मितमिदमाह । वयस्य य
द्येवं तर्हि सिद्धं नः प्रयोजनं. तदद्यैव तया सह संगमः क्रियतामिति. कौलिकः यत्र कन्यांतःपुरे वायुं मुक्त्वान्यस्य प्रवेशो नास्ति
तत्र रक्षापुरुषाधिष्ठिते कथं मम तया सह संगमः । तत्किं मामसत्यवचनेन विडंबयसि. रथकारः वयस्य पश्य मे बुद्धिप्रभावं एवमभिधाय विडंबयसि
तत्क्षणात् कीलसंचारिणं वैनतेयं सबाहुयुगलं वायुजं शदारुणा तथा च शंखचक्रगदापद्मान्वितं सकिरीटकौस्तुभमघटयत् त
तस्मिन् कौलिकं समारोप्य विष्णुचिह्नितं कृत्वा कीलसंचारणविज्ञानं च दर्शयित्वा प्रोवाच वयस्य अनेन विष्णुरूपेण गत्वा
कन्यांतःपुरे निशीथे राजकन्यां सप्तभूमिकाप्रासादप्रांतरगतां मुग्धस्वभावां तां वासुदेवं मन्यमानां स्वकीयमिथ्या
वक्रोक्तिभिः रंजयित्वा वात्स्यायनोक्तविधिना भज. कौलिकोपि तदाकर्ण्य वासुदेवरूपी रहसि तत्र गत्वा तामाह. रा
जपुत्रि सुप्ता किं वा जागर्षि. अहं तव कृते समुद्रात् सानुरागां लक्ष्मीं विहाय स्वयमेवागतः । तत् क्रियतां मया सह संगम इति. सा
पि गरुडारूढं चतुर्भुजं सायुधं कौस्तुभोपेतमवलोक्य सविस्मया शयनादुत्थाय प्रोवाच भगवन् अहं मानुषी कीटिका
अशुचिः । भगवान् त्रैलोक्यपावनो वंदनीयश्च तत्कथमेतद्युज्यते. कौलिकः सुभगे सत्यमभिहितं भवत्या. परं राधा

कामशास्त्रोक्तकारेण ४

पंचतंत्र· १ नाम मे भार्या गोकुलप्रसूता स्वर्गमासीत्सा त्वमवतीर्णेति ता मया वानः । इत्युक्ते साह · भगवन्यद्येवं तन्मे तातं प्रार्थय येन मामुपकल्पयतु
भ्यं मां अथ ऊचे कौलिकः सुभगे नाहं दर्शनपथं मानुषाणां गच्छामि किं पुनरालापकरणं त्वं गांधर्वविवाहेनात्मानं प्रयच्छ नो चेत्
१८ शापं दत्वा सान्वयं ते पितरं भस्मसात्करिष्यामि इत्येवमभिधाय गरुडादवतीर्य सव्ये पाणौ कृत्वा तां सभयां सलज्जां वेपमानां नी
त्वा यामिन्यामनयत ततश्च रात्रिशेषं यावद्वात्स्यायनोक्तविधिना निषेव्य प्रत्यूषे स्वगृहं ततो जगाम एवं तस्य तां नित्यं सेवमानस्य का
कीलाः लो याति · अथ कदाचित्कंचुकिनस्तस्या अधरोष्ठप्रवालखंडनं दृष्ट्वा मिथः प्रोचुः । अहो दृश्यतामस्या राजकन्यायाः गात्रोपभु
क्तावस्था राजद्वाराः संलक्ष्यते · तत्कथमयं सुरक्षितेऽप्यस्मिन्गृहे एवंविधो व्यवहारः तद्राज्ञो निवेदयामः · एवं निश्चित्य स
र्वे समेत्य राजानं प्रोचुः देव वयं न विद्मः परं सुरक्षितेऽपि कन्यांतःपुरे कश्चित्प्रविशति · तद्देवः प्रमाणमिति · तच्छ्रुत्वा राजा अती
राज्ञीं व व्याकुलितचित्तो देवीमिदमाह देवि ज्ञायतां किमेते कंचुकिनो वदंति · कस्य कृतांतः कुपितः येनैतदेवं क्रियते · देव्य
। पि तदाकर्ण्य व्याकुलीभूत्वा सत्वरं गत्वा तां खंडिताधरां नखविदारितशरीरां च दृष्ट्वा प्रोवाच आः पापे कुलकलंककारि
कि मे वंशशीलखंडनं कृतं कोऽयं त्वां तावल्लोकितस्त्वत्सकाशं समभ्येति · तत्कथ्यतामेवं कोपेनापि तस्यास्तच्छ्रुत्वा सापि अधोमु
खी तामग्रे सकलं विष्णुरूपकौलिकवृत्तांतं निवेदयामास · तच्छ्रुत्वा सापि प्रहसितवदना पुलकांकितसर्वांगा सत्वरं गत्वा राम: ३
भापन २ राजानमूचे देव दिष्ट्या वर्धसे नित्यमेव निशीथे भगवान्नारायणः कन्यकापार्श्वे समभ्येति · तेन गांधर्वविवाहेन सा विवाहि १८
ता तदद्य रात्रौ त्वया मया च वातायनगताभ्यां निशीथे द्रष्टव्यः · यतो न स मानुषैः सहालापं करोति तच्छ्रुत्वा हर्षितस्य रा
ज्ञस्तद्दिनं वर्षशतप्रायमिव कथंचिज्जगाम · ततस्तु रात्रौ निभृतो भूत्वा राज्ञीसहितो राजा वातायनस्थो गगनासक्त

गवाक्षस्थितो यावत्

अमृतप्लावितइव

दृष्टिपथेवतिष्ठतितावद्गरुडासनंशंखचक्रगदाहस्तंयथोक्तचिह्नांकितंव्योम्नोवतरंतमपश्यत् ततःसुधापूरप्लावितमिवात्मानंमन्यमानस्ता
मुवाच अयेनास्त्यन्योधन्यतरोमत्तःयन्मांतथ्यवत्प्रसूतिंनारायणोभजते तत्सिद्धाःसर्वेअस्माकंमनोरथाः अमात्प्रभावेनसर्वावसुमती
वशेभविष्यति एवंनित्यमेवसर्वैःसीमाधिपैःसहमर्यादातिक्रममकरोत् तेचतंमर्यादाव्यतिक्रमेणवर्तमानमालोक्यसर्वेसमेत्यतेनसह
विग्रहंचक्रुः अत्रांतरेसराजादेवीमुखेनतांदुहितरंप्रोवाच पुत्रित्वयिदुहितरिस्थितायांनारायणोभगवतिजामातरिस्थितेकिमेवं
युज्यतेयत्सर्वैःपार्थिवाःमयासहविग्रहंकुर्वंतितत्संबोध्योऽयंत्वयाभर्तायथाममशत्रून्व्यापादयति ततस्तयासकौलिकोरात्रौ
समायातःसविनयमभिहितः भगवन्त्वयिजामातरिस्थितेममतातोयत्शत्रुभिःपरिभूयतेतन्नयुक्तंतत्प्रसादंकृत्वासर्वा
मारय न्तान्व्यापादय कौलिकः कियन्मात्रास्त्वेतेतवपितुःशत्रवः तद्विश्वस्ताभव क्षणेनापिसुदर्शनचक्रेणसर्वान्तिलशःखंडयि
ष्यामि अथगच्छताकालेनसमस्तदेशःशत्रुभिर्व्याप्तोस्यकेवलंसराजाप्रकारशेषःकृतः तथापिवासुदेवरूपधरंकौलिकम
जाननराजानित्यमेवविशेषतःकर्पूरागरुकस्तूरिकादिपरिमलविशेषान्नानाप्रकारवस्त्रभक्ष्यपेयांश्चप्रेषयन्दुहितृमुखेनत
मुवाच भगवन्प्रभातेनूनंस्थानभंगोभविष्यति यतोयवसेंधनसंक्षयःसंजातः तथासर्वोपिजनःप्रहारैर्जर्जरितदेहःसंवृत्तोयोद्धु
मक्षमःप्रचुरोमृतश्च तदेवंज्ञात्वात्रकालेयदुचितंभवतितद्विधेयमिति ततश्श्रुत्वाकौलिकोप्यचिंतयत् यत्स्थानभंगेसं
जातेममानयासहवियोगोभविष्यति तस्माद्गरुडमारुह्यसायुधमात्मानंआकाशेदर्शयामि कदाचि[illegible]तांवासुदेवंम
न्यमानास्तेसाशंकाराज्ञोयोद्धृभिर्हन्यंते उक्तंच निर्विषेणापिसर्पेणकर्तव्यामहतीफटा विषंभवतुवामावाफटाटोपो
भयंकरः अथयदिमेस्थानार्थेउद्यतस्यमृत्युर्भवतितदपिसुंदरतरं उक्तंच गवामर्थेब्राह्मणार्थेस्वाम्यर्थेस्त्रीकृतेथवा स्था

पंचतंत्र.१ नार्थेयस्मान्नेत्राणांतस्सलोकाः सनातनाः एवं निश्चित्य स्वसेदं तत्र आवर्तनं न दापयित्वा तां जोवाच सुभगे समस्तैः शत्रुभिर्हतैः रन्नपानं वा
१८ छादयामि किं बहुना त्वयापि सह संगमं ततः करिष्यामि परं वा त्वयैवं वयामि जपिता यत् त्वया प्रभाते सर्वं सैन्येन सह कारीन्निपक्षस्य
योद्धव्यं मम हि वाकाशस्थितस्मात्तानि तेजसः करिष्यामि पश्चात्स्क श्वेन भवता हन्तव्याः । यदि पुनरहं स्वयमेव तान् सूदयामि ततस्तेषां
पापात्मनां वैकुंठीया गतिः स्यात् तस्मात्ते तथा कर्तव्यं । यथा पलायतो हन्यमानाः स्वर्गं न गच्छन्ति सापि तदाकर्ण्य पितुः समीपं ग
त्वा सर्वं कथितोतं न्यवेदयत् राजापि तस्या वाक्यं श्रद्दधानः प्रत्यूषे समुत्थाय स्वसैन्येन युद्धाय निष्क्रामत् कोलिकोपि मरणा
कृतनिश्चयश्चापपाणिर्गगनमार्गेण निर्गरुडारूढो युद्धाय प्रस्थितः । अत्रांतरे भगवता नारायणेन अतीतानागतवर्तमानवेदिना
स्मृतमात्रो वैनतेयः संप्राप्तो विहस्य प्रोक्तः भो गरुत्मन् जानासि त्वं यन्मम रूपेण कोलिको दारुमयगरुडे समारूढो राजक
न्यां कामयते सोऽब्रवीत् देव सर्वं ज्ञायते तच्चेष्टितं तत् किं कुर्मः सांप्रतं श्री भगवानुवाच अद्य कोलिको मरणे कृतनिश्चयः
कृतनियमो युद्धार्थं विनिर्गतः स नूनं प्रधानक्षत्रियशराहतो निधनं यास्यति तस्मिन् हते सर्वो जनो वदिष्यति यत्प्रभूतक्ष
त्रियैर्मिलित्वा वासुदेवो गरुडश्च निपातितः ततःपरं लोके आवयोः पूजां न करिष्यति ततस्त्वं द्रुततरं तत्र दारुमय
गरुडे संक्रमणं कुरु अहमपि कोलिकशरीरे आवेशं करिष्यामि येन स शत्रून् व्यापादयति ततश्च शत्रुवधाद् आवयोर्मा रामः
हात्म्यवृद्धिर्भवति अथ तथेति प्रतिपन्ने सति गरुडः श्रीभगवान्नारायणश्च तत्र शरीरे संक्रमणं करोति ततो भगवन्मा १८
हात्म्येन गगनस्थः स कोलिकः शंखचक्रगदाचापचिह्नितः लीलयैव सर्वानपि प्रधानक्षत्रियान्निस्तेजसश्च

कोलीहतान्

तन्नगरवासिनं

कार ततस्तेनराज्ञाश्वेमेन्यपरिहृतेनजितानिहताश्चतेसर्वेपिशत्रवः ज्ञातश्चलोकमध्येप्रवादः यथा मेनविष्णुजामातृप्रभावेनसर्वेशत्रवोनि
हताइति कालिकोपितान्दृष्ट्वाप्रमुदितमनागगनादवतीर्णः सन् यावद्राजामात्यपौरलोकास्तन्नगरवास्तव्यं कौलिकंपश्यन्ति त
तः पृष्ठः किमेतदितिततः सोपिमूलादारभ्यसर्वंप्राकृतंतांन्यवेदयत् ततश्चकौलिकसाहसानुरंजितमनसाराज्ञाबुद्धधादद्यासज
नसारसमासाराज्ञकन्यासफलजनप्रत्यक्षंविवाहविधिनातस्मैसमर्पिता देशाश्चप्रदत्तः कौलिकोपितयासार्द्धं पंचप्रकारंजीवलो
कसारंविषयसुखमनुभवन् कालंनिनाय अतस्त्वमुच्यते सुप्रयुक्तस्यदंभस्येति करटकः अथवाविधव्यापारेकोकिकार्य्यमावा
भ्यां ह्रदृशीभवे दमनकः एवंविधोपिस्मन्येमनभोपिभ्रस्तुरंतंभविष्यति येनराज्ञः मंत्रीयकंविश्लेषयिष्यामि उक्तंवश्चास
हाभारते एकंहन्यान्नवाहन्यादिषुर्मुक्तोधनुष्मता बुद्धिर्बुद्धिमतोत्सृष्टाहन्याद्राष्ट्रंसराजकं करटकः यद्यपितवबुद्धिप्र
भावोपितथापिदृष्टनायकातौवियोजयतुंसमर्थएव दमनकः भ्रातः असमर्थोपिसमर्थएव उक्तंच उपायेनहियत्कु
र्यान्नतच्छक्यंपराक्रमैः काक्याकनकसूत्रेण कृष्णसर्पोनिपातितः करटकः कथमेतत् दमनकः कथयामि कस्मिंश्चित्
बटवृक्षे प्रदेशेमहतितरौवायसदंपतीप्रतिवसतिस्म अथतयोः प्रसवकालेवृक्षविवरान्निःक्रम्यकृष्णसर्पः सदैवतदपत्यानिभक्षयतिस्म
तस्तौनिर्वेदादन्यवृक्षमूलनिवासिनं प्रियसुहृदंशृगालं गत्वाऊचतुः भद्रकिमेवंविधेसजातेआवयोः कर्तव्यंभवतीति एवंता
त वदुष्टात्मा कृष्णसर्पोवृक्षविवरान्निर्गत्यावयोर्बालकान्भक्षयत्येवंतत्कथ्यतांतद्रक्षार्थंकश्चिदुपायः यस्यक्षेत्रेनदीतीरे
भार्य्याचपरसंगता गृहेसर्पश्चयोयत्रकथंस्यात्तस्यनिर्वृतिः अन्यच्च अस्माकमपितत्रस्थितानांप्रतिदिनंप्राणसंशा
वेरागपातक

पंचतंत्र १ यः प्राह। नात्र विषये विषादः कार्यः न च स्वल्पबुद्धिना भयमंतरेणावध्यः स्यात् उक्तं च उपायेन जयो यादृग्रिपोस्तादृङ्न हेति
२० भिः उपायज्ञोल्पकायोपि न शूरैः परिभूयते तथा च भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान् अतिलौल्याद्बकः कै
श्चिन्मृतः कर्कटकग्रहात् तावूचतुः कथमेतत् सोब्रवीत् अस्ति कस्मिंश्चिद्वनोद्देशे नानाजलचरसनाथं सरः तत्र च कृताश्रयो
बकः एको वृद्धभावमुपागतो मत्स्यान्व्यापादयितुमसमर्थः ततश्च क्षुत्क्षामकंठः सरस्तीरमुपविष्टो मुक्ताफलप्रकरसदृशै
रश्रुप्रवाहैर्धरातलमभिषिंचन्नरुरोद एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिद
मूचे। माम किमद्य त्वया आहारवृत्तिर्नानुष्ठीयते केवलमश्रुपूर्णनेत्राभ्यां सनिश्वासेन स्थीयते स आह। वत्स सत्य
मत्स्यानां आते मुपलक्षितं भवता। मया हि मत्स्यादनं प्रति परमवैराग्यतया सांप्रतं प्रायोपवेशनं कृतं तेनाहं समीपगतानपि मत्स्यान्न भ
क्षयामि। तच्छ्रुत्वा कुलीरकः किं तद्वैराग्यकारणं। स प्राह। वत्साहमस्मिन्सरसि जातो वृद्धिं गतश्च। तन्मयैतच्छ्रुतं यद्द्वा
दशवार्षिक्यनावृष्टिः संपद्यते। कुलीरकः कस्मात्तच्छ्रुतं। बकः दैवज्ञमुखात् यतः शनैश्चरो रोहिणीशकटं भित्वा
भौमं शुक्रं च प्रयास्यति उक्तं च वराहमिहिरेण यदि रोहिण्याः शकटं भिनत्ति रविनंदनो गगनचारी द्वादश शनैः
वर्षाणि तदा नहि वर्षति वासवो भूमौ तथा च प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं किल धीः भस्मास्थिशकलकीर्णा व
सुधा कापालिकव्रतं धत्ते तथा च रोहिणीशकटमर्कनंदनश्चेद्भिनत्ति रुधिरोथवा शशी किं वदामि तदनिष्टसागरे जग २०
द्यायमुपैति संक्षयम् तदेतत्सरः स्वल्पतोयं वर्तते शीघ्रं शोषमुपयास्यति अस्मिन्शुष्के यैः सहाहं वृद्धिंगतः सदैव क्रीडित
रोहिणीसंबंधिते २ मंगलः २ जिल्वागति ४ सर्वतो जगदेव संक्षय २

नोदनं करोमि २

श्च ते सर्वे तोयाभावान्नाशं यास्यंति तत्तेषां वियोगं द्रष्टुमहमसमर्थः तेनैतत्प्रायोपवेशनं कृतं सांप्रतं सर्वेषां स्वल्पजलाशयानां जलचरा
गुरुजलाशयेषु स्वस्वजनैर्नीयंते केचिन्मकरगोधाशिशुमारजलहस्तिप्रभृतयश्च स्वयमेव गच्छंति अत्र पुनः सरसि ये जलचरास्ते निश्चिंताः
संति तेनाहं विशेषाद्रोदिमि यद्बीजशेषमात्रमप्यत्र नोद्धरिष्यति ततः स तदाकर्ण्य अन्येषामपि जलचराणां तत्तस्य वचनं निवेदयामा
स अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयस्तमभ्येत्य पप्रच्छुः माम अस्ति कश्चिदुपायो येनास्माकं रक्षा भवति बक आ
ह अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं पद्मिनीखंडमंडितं सरः यच्चतुर्विंशत्यापि वर्षाणामवृष्ट्या न शोषमेति
तद्यदि मम पृष्ठिं कश्चिदारोहति तदहं तत्र नयामि अथ ते विश्वासमापन्नास्तात मातुल भ्रातः इति ब्रुवाणा अहं पूर्वमहं पूर्वमिति
समंतात्परितस्थुः सोपि दुष्टाशयः क्रमेण तानात्मपृष्ठिमारोप्य जलाशयस्य नातिदूरां शिलां समासाद्य तस्यामास्फाल्य स्वे
च्छया भक्षयित्वा भूयोपि जलाशयं समासाद्य स जलचराणां मिथ्यावार्तासंदेशकैर्मनांसि रंजयन्नित्यमेवाहारवृत्तिमकरोत्
अन्यस्मिन्दिने स कुलीरकेनोक्तः माम मया सह ते प्रथमः स्नेहसंभाषः संजातः तत्किं मां परित्यज्य अन्यान्नयसि तस्मादद्य मे
प्राणत्राणं कुरु तदाकर्ण्य सोपि दुष्टाशयश्चिंतितवान् निर्विण्णोहं मत्स्यमांसादनेन तदद्यैनं कुलीरकं व्यंजनस्थाने

मातुल २

यस्यां शिलायां मत्स्यभक्षयितेतां ... नसमर्थो भवति

२९ करोमि इत्युक्त्वा तं पृष्ठमारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः। कुलीरकोऽपि दूरादेवास्थिपर्वतं शिलाश्रयमवलोक्य मत्स्यास्थीनीति परिज्ञा-
य तमपृच्छत्। माम कियद्दूरे जलाशयः। त्वं मदीयभारेणातिश्रान्तस्तत्कथय। सोऽपि मन्दधीर्जलचरोऽयमिति मत्वा स्थले न प्रभवतीति स-
स्मितमाह। कुलीरक कुतोऽन्यो जलाशयः। मम प्राणयात्रेयं। तस्मात्स्मर्यतामात्मनोऽभीष्टदेवता। त्वामप्यस्यां शिलायां प्रक्षिप्य भक्ष-
यिष्यामीत्युक्तवति तस्मिन् कुलीरकेणास्य वदनदंशेन मृणालनालधवलायां मृदुग्रीवायां गृहीतो मृतश्च। अथ स
तां बकग्रीवां समादाय शनैः शनैस्तज्जलाशयमाससाद। ततः सर्वैरेव जलचरैः पृष्टः। भोः कुलीरक किं निवृत्तस्त्वं। किं कुशलं कारणं किं विलंबति
गत: हसि। स मातुलोऽपि नायातः। तत्किं विचारयसि वयं सर्वे सोत्सुकाः कृतक्षणास्तिष्ठामः। एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच। मूर्खाः सर्वे
जलचरास्तेन मिथ्यावादिना वंचयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मयायुःशेषतया तस्य विश्वासघातकस्याभिप्रा-
यं ज्ञात्वा ग्रीवेयमानीता। तदलं संभ्रमेण। अधुना सर्वजलचराणां क्षेमं भविष्यति। अतोऽहं ब्रवीमि। भक्षयित्वा बहून्मत्स्यानिति। वाय-
सः भद्र तत्कथय कथं स दुष्टसर्पो वधमुपैष्यति। शृगालः। गच्छतु भवान्कंचिन्नगरं राजाधिष्ठानं। तत्र कस्यापि धनिनो राजामात्या-
देः प्रमादिनः कनकसूत्रं हारं वा गृहीत्वा तत्र कोटरे प्रक्षिप येन सर्पस्तद्ग्रहणेन वध्यते। अथ तत्क्षणात्काकः काकी च तदाकर्ण्य
आत्मेच्छया उत्पतितौ। ततश्च काको वा किंचित्सरः प्राप्य यावत्पश्यति तावत्तन्मध्ये कस्यापि राज्ञोऽन्तःपुरं जलासन्नं न्यस्तकनकसू- राज
त्रं मुक्ताहारवस्त्राभरणं जलक्रीडां कुरुते। अथ सा वायसी कनकसूत्रमेकमादाय स्वगृहाभिमुखं प्रतस्थे। ततश्च कंचुकि-
नो वर्षवराश्च तन्नीयमानमुपलक्ष्य गृहीतलगुडाः सत्वरमनुययुः। काक्यपि सर्पकोटरे तत्कनकसूत्रं प्रक्षिप्य सुदूरमवस्थि- २१

नत्वशोवमल्वनं४ निर्दुद्रेः पराक्रमवाकृत्स्नात

ता॰ अथ यावद्बालपुरुषः तं वृक्षमारुह्य तत्कोटरमवलोकयति तावत्तत्र कृष्णसर्पः प्रसारितभोगस्तिष्ठति ततस्तं लकुडप्रहारेण हत्वा कन
कसूत्रमादाय यथाभिलषितं स्थानं गताः। वायसदंपती अपि ततः परं सुखेन वसतः। अतोहं ब्रवीमि उपायेनेति। दमनकः।
तन्न किंचिदिह बुद्धिमतामसाध्यमपि। उक्तं च। यस्य बुद्धिर्बलं तस्य नाबुद्धेस्तु कुतो बलम्। वने सिंहो मदोन्मत्तः शशकेन विना
निपातितः शितः। करटकः कथमेतत्। स आह। कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म। अथासौ वीर्यातिरेकान्नित्यमेवाने
कान्मृगशशकादीन्व्यापादयन्नोपरराम। अथान्येद्युस्तद्वनजाः सर्वे सारंगवराहमहिषशशकादयो मिलित्वा तमभ्युपेत्य प्रो
चुः। स्वामिन् किमनेन सकलमृगवधेन नित्यमेव यतस्तवैकेनापि मृगेण तृप्तिर्भवति तत्क्रियतामस्माभिः सह समयधर्मः। अ
द्यप्रभृति तवात्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्ष्यार्थं समेष्यति। एवं कृते तवापि प्राणयात्रा क्लेशं विनापि भवि
ष्यति। अस्माकं च पुनः सर्वोच्छेदनं न स्यात्। तदेष राजधर्मोनुष्ठीयतां। उक्तं च। शनैः शनैश्च यो राज्यमुपभुंक्ते यथाबलम्
रसायनमिव प्राज्ञः स पुष्टिं परमां व्रजेत्। विधिना मंत्रयुक्तेन रूक्षापि मथितापि च। प्रयच्छति फलं भूमिररणीव हुताशनं।
स्यस म् प्रजानां पालनं सस्यं स्वर्गकोशस्य वर्द्धनम्। पीडनं धर्मनाशाय पापायायशसे स्थितं। गोपालेन प्रजाधेनोर्वित्तं दुग्धं
शनैः शनैः। पालनात्पोषणाद्ग्राह्यं न्याय्यां वृत्तिं समाचरेत्। अजामिव प्रजां मोहाद्यो हन्यात्पृथिवीपतिः। तस्यैका जाय
ते तृप्तिर्न द्वितीया कदाचन। फलार्थी नृपतिर्लोकान्पालयेद्यत्नमास्थितः। दानमानादितोयेन मालाकारोंकुरानिव। न
पदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि। अंतरस्थैर्गुणैः सर्वैर्लक्ष्यते नैव केनचित्। यथा गौर्दुह्यते काले पाल्यते च तथा
प्रजाः। सिंच्यते चीयते चैव लता पुष्पफलप्रदा। यथा बीजांकुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः। फलप्रदो भवेत्काले तद्वल्लो
[illegible] [illegible]

कः प्ररक्षितः ॥ हिरण्यधान्यरत्नानि यानानि विविधानि च । तथान्यदपि यत्किंचित्प्रजाभ्यः स्यान्महीपतेः ॥ लोकानुग्रहकर्तारः प्रव
र्द्धंते नरेश्वराः ॥ लोकानां संक्षयाच्चैव क्षयं यांति न संशयः । अथ तेषां तदाकर्ण्य भासुरक आह । अहो सत्यमभिहितं भवद्भिः परं यदि मत्रा
प्युपविष्टस्यात्र नित्यमेव नैकः श्वापदः समागमिष्यति तन्नूनं सर्वानपि वो भक्षयिष्यामि अथ ते तथैव प्रतिज्ञाय निर्वृतिभाजस्तत्रैव
वने निर्भयाः पर्यटंति । एकश्च प्रतिदिनं क्रमेणायाति वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्या
हारार्थं मध्याह्नसमये उपतिष्ठति अथ कदाचित् जातिक्रमात् शशकस्य वारकः कदापि समायातः । स समस्तमृगैः प्रेषितो निच्छ
न्नपि मंदं मंदं गत्वा तस्य वधोपायं चिंतयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता कूपः संदृष्टः । याव
त्कूपोपरि याति तावत्कूपमध्ये आत्मनः प्रतिबिंबं ददर्श तेन हृदये चिंतितं । यद्भव्य उपायोस्ति अहं भासुरकं प्रकोप्य स्व
बुद्ध्या अस्मिन्कूपे पातयिष्यामि । अथासौ दिनशेषे भासुरकसमीपे प्राप्तः सिंहोपि वेलातिक्रमेण क्षुत्क्षामकंठः कोपाविष्टः
सृक्किणी परिलेलिहन्व्यचिंतयत् । अहो प्रातराहाराय निःसत्त्वं वनं मया कर्तव्यमेवं चिंतयतस्तस्य शशको मंदं मंदं गत्वा प्रणा
म्य तस्याग्रे स्थितः । अथ तं प्रज्वलितो भासुरको भर्त्सयन्नाह रे शशकाधम एकस्तावत्त्वं लघुः प्राप्तोऽपरं वेलातिक्रमेण ।
तदस्मादपराधात्त्वां निपात्य प्रातः सकलान्यपि मृगकुलान्युच्छेदयिष्यामि अथ शशकः सविनयं प्रोवाच । स्वामिन्ना

अयस्कां२ स्यापयित्वा५

पराक्षोभमनर्थं सत्वानां तन्मूयतां कारणं। सिंहः सत्वरं निवेदय यावत् दंष्ट्रांतर्गतो न भवोसीति शशकः। स मस्तं मृगेरद्य स्वामिन्
जातिक्रमेणाम मलघुतरस्य प्रस्तावं विज्ञाय ततोहं पंचशशकैः ४ समं प्रेषितः। ततश्चाहमागच्छन् अंतराले महता केनचिद् परसिंहे
कथितः न विवराग्निर्गत्याभिहितः रे क्व प्रस्थिता यूयं। अभीष्टदेवतां स्मरत। ततो मयाभिहितं। वयं स्वामिनो भासुरकस्य सिंहस्य समीपे
आहारार्थं समयधर्मेण गच्छामः। ततस्तेनाभिहितं। यद्येवं तर्हि मदीयमिदं वचनं मया सह समयधर्मेण सर्वैः श्वापदैर्वर्तितव्यं। प्रतिहाय
चौरत्वपी स भासुरकः। अथ यदि सोत्र राजा ततो विश्वासस्थाने चतुरः शशकान् अत्र धृत्वा तमाहूय द्रुततरमागच्छ येन द्वयोर्मध्या
द्यः कश्चिद् विक्रमेण सर्वानेतान् भक्षयिष्यतीति। ततोहं तेनादिष्टः स्वामिसकाशमागतः। एतद् वेलाव्यतिक्रमकारणं। तदत्र
त्र स्वामी प्रमाणं। तत् श्रुत्वा भासुरकः। भद्र यद्येवं तर्हि सत्वरं दर्शय मे तं चौरं येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि।
उक्तं च। भूमिर्मित्रं हिरण्यं च विग्रहस्य फलत्रयं॥ नास्त्येकमपि यद्येषां न तं कुर्यात् कथंचन॥ यत्र न स्यात् फलं भूरि
पराभवमथापि वा। न तत्र मतिमान् युद्धं स्वयमुत्पाद्य चाचरेत्। शशकः। स्वामिन् सत्यमिदं। स्वभूमिहेतोः परिभवात् युध्यं
ते क्षत्रियाः। परं स दुर्गाश्रयः। दुर्गान्निःक्रम्य वयं तेन विष्कंभिताः। ततो दुर्गगतो दुःसाध्यो भवति रिपुः। उक्तं च। न गजानां सहस्रेण
न च लक्षेण वाजिनां। यत्कार्यं सिध्यते राज्ञां दुर्गेणैकेन विग्रहे। शतमेकोपि संधत्ते प्राकारस्थो धनुर्धरः। तस्माद् दुर्गं प्रशंसं

छन्नाः२ व्यापादित१

पंच. १ तिनीतिशास्त्रविचक्षणाः ॥ पुरा गुरोः समादेशाद्धिरण्यकशिपोर्भयात् ॥ शक्रेण विहितं दुर्गं प्रभावाद्विश्वकर्मणः ॥ तेनापि च वरो
२३ दत्तो यस्य दुर्गं स भूपतिः ॥ विजयी स्यात्ततो भूम्यां दुर्गाणि स्युः सहस्रशः ॥ दंष्ट्राविरहितो नागो मदहीनो यथा गजः ॥ सर्वेषां जायते व
श्यो दुर्गहीनस्तथा नृपः ॥ तच्छ्रुत्वा भासुरक आह भद्र दुर्गस्थमपि दर्शय येन तं वीरसिंहं व्यापादयामि । उक्तं च । जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत् ॥
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ तथा च । उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ॥ समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥ वर्द्धमानं
उपेक्षितः क्षीणबलोऽपि शत्रुः प्रमाददोषात्पुरुषैर्मदान्धैः । साध्योऽपि भूत्वा प्रथमं ततोऽसावसाध्यतां व्याधिरिव प्रयाति । तथा
च । आत्मनः शक्तिमुद्वीक्ष्य मानोत्साहं च यो व्रजेत् । शत्रून्हन्यात्स एकोऽपि क्षत्रियो भार्गवो यथा । शशक आह । अस्त्येतत्तथापि
तस्य सामर्थ्यमविदित्वा न गन्तव्यम् । उक्तं च । अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः । गच्छन्नभिमुखो वह्नौ नाशं याति
पतङ्गवत् । यो बलात्प्रोन्नतं याति निहन्तुं सबलोऽप्यरिम् । विमदः स निवर्तेत शीर्णदन्तो गजो यथा । भासुरक आह । यद्येवं तथा
पि त्वं दर्शय तं वीरसिंहं येन व्यापादयामि । शशक आह । यद्येवं तर्हि आगच्छतु स्वामी । एवमुक्त्वा अग्रे व्यवस्थितः । ततश्चागच्छता
यः कूपो दृष्टोऽभूत्तमेव कूपमासाद्य भासुरकमाह । स्वामिन् कस्ते प्रतापं सोढुं समर्थः । त्वां दृष्ट्वा दूरतोऽपि चौरसिंहः प्रविष्टः स्व
दुर्गं तदागच्छ यथा दर्शयामीति । भासुरक आह । दर्शय दुर्गम् । तदनु दर्शितस्तेन कूपः । ततः सोऽपि मूर्खः सिंहः कूपमध्ये आत्मप्रति
बिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच । ततः प्रतिशब्देन कूपमध्याद्द्विगुणतरो नादः समुत्थितः । तेनापि तं शत्रुं मत्वा आ
त्मानं तस्योपरि प्रक्षिप्य प्राणान्परित्यक्तः । शशकोऽपि हृष्टमनाः सर्वमृगानानन्द्य तैः सह प्रशस्यमानो यथासुखं तत्र व
ने निवसति स्म । अतोऽहं ब्रवीमि बुद्धिर्यस्य बलं तस्य । तद्यदि भवान्कथयति तत्तत्रैव गत्वा तयोः स्वबुद्धिप्रभावेन मैत्री २३

भेदं करोमि करटकः भद्र यद्येवं तर्हि शिवास्ते पंथानः संतु यथाभिप्रेतमनुष्ठीयतां अथ दमनकः संजीवकवियुक्तं पिंगलकमवलोक्य तत्रांत
रे प्रणम्याग्रे समुपविष्टः पिंगलकोपि तमाह भो कस्मात् चिरात् दृष्टोसि दमनकः न किंचिद्देवपादानामस्माभिः प्रयोजनं तेन नागच्छाम
स्तथापि राजप्रयोजननाशमवलोक्य दह्यमानहृदयः स्वयमेवाभ्यागतो वक्तुं उक्तं च शुभं वा यदि वा पापं द्वेष्यं वा य
दि वा प्रियं अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् अथ तस्य साभिप्रायं तद्वचनमाकर्ण्य पिंगलक आह किं वक्तुमना भवान् तत्
कथ्यतां यत्कथनीयमस्ति स प्राह देव अयं संजीवको युष्मत्पादानामुपरि द्रोहबुद्धिरिति विश्वासगतस्य मम विजने इदमाह दमन
क दृष्टास्य पिंगलकस्य सारासारता तदहमेनं हत्वा सकलमपि मृगाधिपत्यं त्वत्साचिव्यसमन्वितं करिष्यामि पिंगलकोपि तद्
वज्रसारप्रहारसदृशं दारुणं तद्वचः समाकर्ण्य मोहमुपागतो न किंचिदूचे दमनकोपि तस्य तमाकारमालोक्य चिंतितवान् अयं ताव
त् संजीवके बद्धरागस्तन्नूनमनेन मंत्रिणा राजा विनाशमवाप्स्यतीति उक्तं च एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा
तं मोहात्तं श्रयते मदः स च मदालस्येन निर्भिद्यते निर्भिन्नस्य पदं करोति हृदये तस्य स्वतंत्रस्पृहा स्वातंत्र्यस्पृहया ततः स राज्ञः प्राणानथवा म
बा प्राणानभिद्रुह्यति किमत्र युक्तमिति पिंगलकोपि चेतनां समासाद्य कथमपि तमाह दमनक संजीवकस्तावत् प्राण स्ता ४
समो भृत्यः स कथं ममोपरि द्रोहबुद्धिं करोति दमनकः देव भृत्याभृत्यव्यवस्था नैकांतिकमिति उक्तं च न सोस्ति पुरुषो राज्ञां यो न का
मयते श्रियम् अशक्ता एव सर्वत्र नरेंद्रं पर्युपासते पिंगलकः भद्र तथापि मम तस्योपरि चित्तवृत्तिर्न विकृतिं याति अथ
वा साधु इदमुच्यते अनेकदोषदुष्टोपि कायः कस्य न वल्लभः कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः दमनकः अत

भेद मास ५ अप्रियाणि १

भूमिपतं २

लक्ष्मीपात्रं १

पंच. १ एवायंदोषः । उक्तंच यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः अकुलीनः कुलीनो वा स श्रियो भाजनं नरः अपरंच केन गुणवि
२७ शेषेण स्वामी संजीवकं निकटान्नापि न कटे धारयति । अथ देव यद्येवं चिंतयसि महाकायोयमनेन न शक्नोमि व्यापादयितुमिति । तदस्मात्कसिद्धमिति । य
तलाभदः तोयं शस्यभोजी । देवपादाश्च नौदात्रं वो मांसाशिनस्तद्रिपुसाधनं अस्य सहाय्येन न भवति । तस्मादेव दूषयित्वा हन्यतामिति । पिंगलकः उक्तो
भवति यः पूर्वं गुणवानिति संसदि तस्य दोषो न वक्तव्यः प्रतिज्ञाभंगभीरुणा । अन्यच्च । मयास्य तव वचनेनाभयप्रदानं दत्तं तत्कथं स्वयमे
व्यापादयामि । सर्वथा संजीवकोयं सुहृदस्माकं न तं प्रति काचिन्मन्युरिति । उक्तंच । इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयं विषवृ
अनुष्टुभं क्षोपि संवर्द्ध्य स्वयं छेत्तुमसांप्रतं आदौ न वा प्रणयिनां प्रणयो विधेयो दत्तोथवा प्रतिदिनं परिपोषणीयः उत्क्षिप्य यत्क्षिपति तत्प्रकरो
ति लज्जां भूमौ स्थितस्य पतनाद्भयमेव नास्ति । तथा च । उपकारिषु यः साधुः साधुत्वे तस्य को गुणः अपकारिषु यः साधुः स साधुः सद्भिर
च्यते । तद्द्रोहबुद्धेरपि मयास्याविरुद्धं नाचरणीयं । दमनकः स्वामिन्नैष धर्मो यद्द्रोहबुद्धिरपि क्षम्यते । उक्तं च । तुल्यार्थं तुल्यसामर्थ्यं म
उत्तान्सुत्रं र्मज्ञं व्यवसायिनं अर्द्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते । अपरं त्वयास्य सखित्वात्सर्वोपि राजधर्मः परित्यक्तः । राजधर्माभावात्सर्वो
पि परिजनो विरक्तिं गतः । यतः संजीवकः शष्पभोजी भवान्मांसादस्तव प्रकृतयश्च । तं चाव्यवसायपराः कुतस्ता मांसाशिनं तत्कृते,
तास्त्वां त्यक्त्वा यास्यंति तेनापि त्वं विनष्ट एव । अस्य संगत्यात्तु न त्वेन कदाचिदाखेटकं नाति र्भविष्यति । उक्तंच । यादृशैः सेव्यते भृत्यैर्यो
दृशांश्चोपसेवते कदाचिन्नात्र संदेहस्तादृक्भवति पूरुषः । तथा च । संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते मुक्ताकारतया
शुक्ति तदेव नलिनीपत्रस्थितं राजते स्वातौ सागरशुक्तिपतितं तज्जायते मौक्तिकं प्रायेणाधममध्यमोत्तमगुणाः संवासतो जायते । तथा च
असतां संगदोषेण साधवो यांति विक्रियां दुर्योधनप्रसंगेन भीष्मो गोहरणे गतः । अत एव संतो नीचसंगं वर्जयंति । उक्तंच । न ह्यविज्ञात
शीलस्य प्रदातव्यः प्रतिश्रयः मत्कुणस्य तु दोषेण हता मंदविसर्पिणी । पिंगलकः कथमेतत् । सोब्रवीत् । अस्ति कस्यचिन्महीपते

मत्कुण १ एकामंदगामिनी १ अशागहांहिल १

विराटगृहगर्भ

मनोरमं शयनस्थानं तत्र च तत्[...]र पट्टयुगलमध्ये संस्थिता मंदविसर्पिणी नाम यूका प्रतिवसति स्म । सा च तस्य महीपते रक्तमास्वादयं
ती सुखेन कालं नयमाना तिष्ठति । अन्येद्युश्च तत्र शयने क्वचिद्भ्राम्यन् डिंडिभो नाम मत्कुणः समायातः ॥ अथ तं दृष्ट्वा सा विषण्णवद
ना प्रोवाच । भो अग्निमुख कुतस्त्वमत्रानुचितस्थाने समायातः ॥ तद्यावन्न कश्चिद्वेत्ति तावच्छीघ्रं गम्यतामिति । स आह । भगवति गृहा
गतस्यासाधोरपि नैतद्युज्यते वक्तुं । तथा च । एह्यागच्छ समाविशासनमिदं कस्माच्चिराद्दृश्यसे का वार्त्ता अतिदुर्बलोसि हि भवान् प्रीतो
स्मि ते दर्शनात् । एवं नीचजनेपि युज्यते गृहं प्राप्ते सतां सर्वदा धर्म्योयं गृहमेधिनां निगदितः स्मार्त्तैर्लघुः स्वर्गदः । अपरं मयानेके
मानुषाणामनेकविधानि रुधिराण्यास्वादितानि । आहारदोषात्कटुकषायतिक्ताम्लरसास्वादानि । न च मया कदाचित्मधुररक्तं समा
स्वादितं । तद्यदि त्वं प्रसादं करोषि तदस्य नृपतेर्विविधव्यंजनान्नपानचोष्यलेह्यस्वाद्याहारवशीदस्य शरीरे यन्मिष्टं रक्तं संजातं तदास्वा
दस्य दनेन सौख्यं संपादयामि जिह्वाया इति । उक्तं च । रंकस्य नृपतेर्वापि जिह्वासौख्यं समं स्मृतं । तन्मात्रं च स्मृतं सारं तदर्थं यतते जनः । यद्ये
वं न भवेल्लोके कर्म जिह्वाप्रतुष्टिदं । तन्न भृत्यो भवेत्कश्चित्कस्यचिद्वशगोथवा । यदसत्यं वदेन्मर्त्यो यद्वासेव्यं च सेवते । यद्गच्छति विदे
शं च तत्सर्वमुदरार्थतः । तन्मया गृहाभ्यागतेन बुभुक्षया पीड्यमानेनापि त्वत्सकाशात्भोजनं लभ्यं तन्न त्वयैकाकिन्यास्य भूपते रक्तं भोजनी

रसंरहितानिःसारं यन्मन्यते तच्चशोभं· यथादृष्टज्ञभीके· याज्ञिकामात्रेणाआस्वाद्यानि भिन्नते तन्नेह्यं· यथारसान्नाशा· यदंतैरखादं
अभुज्यते तत्र्यखाद्यं· यथा मोदकादि· ८

कर्तुं प्रवृत्ता ततश्च सा मंदविसर्पिणी प्राह । भो मत्कुण अस्य नृपतेर्निद्रावशंगतस्याहं रक्तमास्वादयामि । पुनस्त्वमग्निमुख चपलस्तथा । त
यदि रक्तपानं मया सह करोषि तत्तिष्ठ अभीष्टं तेन रक्तमास्वादय । सोऽब्रवीत् । भगवति एवं करिष्यामि । यावत्त्वं नास्वादयसि प्रथ
मं नृपरक्तं तावन्मम देवगुरुकृतः शपथः स्यात् यदि तदास्वादयामि । एवं तयोः परस्परं वदतोः स राजा तच्छयनमासाद्य प्रसुप्तः । अ
थासौ मत्कुणो जिह्वालौल्यात्प्रकृष्टौत्सुक्यात् जाग्रतमपि तं महीपतिमदशत् । अथवा साध्विदमुच्यते । स्वभावो नोपदेशेन शक्य
ते कर्तुमन्यथा । सुतप्तमपि पानीयं पुनर्गच्छति शीततां । यदि स्याच्छीतलो वह्निः शीतांशुर्दहनात्मकः । न स्वभावोऽत्र मर्त्यानां श
क्यते कर्तुमन्यथा । अथासौ महीपतिः सूच्यग्रविद्ध इव तच्छयनं त्यक्त्वा तत्क्षणादेवोत्थितः । अहो ज्ञायतामत्र प्रच्छादनपटे म
त्कुणो यूका वा नूनं तिष्ठति येनाहं दष्ट इति । अथ ये कंचुकिनस्तत्र स्थितास्ते सत्वरं प्रच्छादनपटं गृहीत्वा सूक्ष्मदृष्ट्या वीक्षां चक्रुः ।
अत्रांतरे स मत्कुणश्चापल्यात् खट्वांतं प्रविष्टः सा मंदविसर्पिण्यपि वस्त्रसंध्यंतर्गता दृष्ट्वा व्यापादिता च । अतोऽहं ब्रवीमि न ह्यविज्ञा
तशीलस्येति । एवं ज्ञात्वा त्वयैष वध्यो नो चेत्त्वां दुष्टबुद्धिः व्यापादयिष्यति उक्तं च त्यक्ताश्चाभ्यंतरा येन बाह्याश्चाभ्यं
तरीकृताः । स एव मृत्युमाप्नोति यथा राजा ककुद्द्रुमः पिंगलकः कथमेतत् सोऽब्रवीत् अस्ति कश्चिद्वने देशे चंड
बाह्याश्चाभ्यंतरीकृताः २

रामः
२४

नीलवर्णः

रवोनामशृगालःसकदाचित्क्षुधाविष्टोजिह्वालौल्यान्नगरमध्येप्रविष्टः।अथतंसारमेयाविलोक्यसर्वतःशब्दायमानाःपरिधाव्यतीक्ष्णदं धावनंकृत्वा
ष्ट्राभिर्भक्षयितुमारब्धाः सोपितैर्भक्ष्यमाणःप्राणभयात्प्रत्यासन्नरजकगृहंप्रविष्टः तत्रनीलीरसपूर्णंमहद्भांडमासीत्।तत्रसारमे
यैराक्रांतोभांडमध्येपतितः।अथयावन्निःक्रांतस्तावन्नीलीवर्णःसंजातः।तत्रापरसारमेयाःतंशृगालमविशेषमजानंतोयथेष्टदिशंज
ग्मुः।चंडरवोपिदूरतरंप्रदेशमासाद्यकाननाभिमुखंप्रतस्थे।नचनीलवर्णेनकदाचिन्निजवर्णंत्यजति उक्तंच वज्रलेपस्यमूर्खस्य
नारीणांकर्कटस्यच।एकोग्रहस्तुमीनानांनीलीमद्यपयोस्तथा॥अथतंगरलकंठसमप्रभमपूर्वंसत्वमवलोक्यसर्वेसिंहव्याघ्रद्वी
पिवृकप्रभृतयोरण्यनिवासिनोभयव्याकुलाःसमंतात्पलायनक्रियांकुर्वंति कथयंतिच नज्ञायतेस्यकीदृक्चेष्टितं पौरुषंच
तद्दूरतरंगच्छामः उक्तंच नयस्यचेष्टितंविद्यान्नकुलंनपराक्रमं नतस्यविश्वसेत्प्राज्ञोयदीच्छेच्छ्रियमात्मनः।चंडरवोपि
भयव्याकुलितान्विज्ञायइदमाह।भोभोश्वापदाःकिंयूयंमांदृष्ट्वैवसंत्रस्ताव्रजथ तन्नभेतव्यं२ अहंब्रह्मणाद्यस्वयमेवसृष्ट्वा
अभिहितः।यत्श्वापदानांकश्चिद्राजानास्तितत्त्वंमयाद्यसर्वश्वापदप्रभुत्वेभिषिक्तः॥ततोगत्वाक्षितितलेतान्सर्वान्प्र
पालयेति ततोहमत्रागतः।तन्ममछत्रछायायांसर्वैरेवश्वापदैर्वर्तितव्यं अहंककुद्रुमोनामराजाश्वापदानांसंजातइति।
तच्छ्रुत्वाश्वापदाःसिंहव्याघ्रपुरःसराःस्वामिन्प्रभोसमादिशेतिवदंतस्तंपरिवव्रुः॥ अथतेनसिंहस्यामात्यपदवीप्रदत्ता।

पंच० १ भाग्यस्य वशाद्यपालकत्वं । [illegible] पिनस्तां [illegible] धिकारः । [illegible] रपालत्वं । येषामीया: श्रृगालास्ते: स [illegible] भिन करोति । य
[illegible] सेवीयिभि: सारिता: । एवं तस्य राज्यं कुर्वतो [illegible] वर्तमानस्य [illegible] न व्यापादयतस्य रतः [illegible] सोपि [illegible] धर्मेणा
२६ सर्वे घातानि [illegible] प्रयच्छति । एवं [illegible] काले तेन कदाचिद् [illegible] श्रृगाला: [illegible]
[illegible] नस्तारस्वरं [illegible] मारब्ध: । अथ ते [illegible] स्वरम् [illegible]
[illegible] हित [illegible] भनन: [illegible] मिति । सोपि तदा [illegible]
[illegible] । [illegible] पिंगलकस्त [illegible]
[illegible] यदद्य [illegible] तेन निश्चय: कृत: [illegible] पिंगलकं वधिष्यामीति । [illegible]
[illegible] लोकय [illegible]
[illegible] संजीवको [illegible]
[illegible]
[illegible] दमनक: [illegible]
[illegible] सेवके [illegible]
[illegible]
[illegible]
[illegible] प्रवासी नित्य सेवक: [illegible]
[illegible]

सेवकस्यपापयतेधर्म इति
सतापजनेनलब्धेन २ मरणं २
तस्माद्दुःखमाप
श्रीमत्तान १ मूर्खेण

स्पंदंते महाद्रोहिणः पापधर्माणः। क्षीणतपादिकष्टं निस्तरंति ये नि सेवकाः धनायतानि वा स्वानि मदि धर्माय मच्यते ष्टदुना सि सुहृत् तेन सुहृद्भेना
नमतीयमा किं हि रिणा। मोदकं नापि कं ते न विपर्यये धर्मस्य च वयो। संजीवकः। अथ मया वा किं कर्तुमुचितं। स चाह। मित्र सचिवानां स्वामिनो मंत्रभेदं
कर्तुं न युज्यते। उक्तं च। यो मंत्रं स्वामिनो भिंद्यात् साचिव्ये नियोजितः। स हत्वा नृपकार्यं तत् स्वयं च नरकं व्रजेत्। येन यस्य कृतो भेदः
सचिवेन महीपतेः। तेन शस्त्रं वधस्तस्य कृत इत्याह नारदः। तथापि मया त्वत्स्नेहपाशबद्धेन मंत्रभेदः कार्यः। यतस्त्वं मम व-
चनेनात्र राजकुले विश्वस्तः प्रविष्टः। उक्तं च। विश्रंभाद्यस्य यो मृत्युमवाप्नोति कथंचन। तस्य हत्या तमेवाहुः मनुराह
मनुः। तत्तवायं पिंगलकोऽस्मासु दुष्टबुद्धिः। कथितं चाद्यानेन मम चतुष्कर्णतया प्रभाते संजीवकं हत्वा समस्तमृगपरिवारं चिरात् तृप्तिं
नेष्यामि। ततः स मयोक्तः। स्वामिन् न युक्तमिदं यन्मित्रद्रोहेण जीवनं क्रियते। उक्तं च। अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुध्यति। तद
र्हेण विचीर्णेन न कथंचित् सुहृद्द्रुहः। ततस्तेनाहं सामर्षेणोक्तः। भो दुष्टबुद्धे संजीवकस्तावत् शष्पभोजी वयं मांसाशिनः तदस्माकं
स्वाभाविकं वैरमिति कथं रिपुरुपेक्ष्यते। तस्मात् सामादिभिरुपायैर्हन्यते। न च हते तस्मिन् दोषः स्यात्। उक्तं च। दत्वापि कन्यकां वै-
री निहंतव्यो विपश्चिता। अन्योपायैरशक्यो यो हते दोषो न विद्यते। कृत्वा कृत्यं न मन्येत क्षत्रियो युधि सर्वदा। प्रसुप्तो द्रोणपुत्रेण धृष्टद्युम्नः पुरा यथा। कृत्याकृत्यं न मन्ये-
त क्षत्रियो युद्धसंयुतः। तदहं तस्य तं निश्चयं ज्ञात्वा तव सकाशमुपागतः। सांप्रतं मे नास्ति विश्वासघातकदोषः। यथा ज्ञातं भान
मूर्छां कुरुष्वेति। अथ संजीवकस्तद्वज्रपातदारुणं वचनं श्रुत्वा मोहमुपागतः। अथ चेतनां लब्ध्वा सवैराग्यमिदमाह। भोः साधिदमु-
च्यते। दुर्जनगम्या नार्यः प्रायेणास्नेहवान् भवति राजा। कृपणानुसारि च धनं मेघो गिरिदुर्गवर्षी च। अहं हि संमतो राज्ञो
य एवं मन्यते कुधीः। बलीवर्दः स विज्ञेयो विषाणपरिवर्जितः। वरं वनं वरं भैक्ष्यं वरं भारोपजीवनम्। वरं व्याधिर्मनुष्याणां
नाधिकारेण संपदः। तदयुक्तं मया कृतं यदनेन सह मैत्री विहिता। उक्तं च। ययोरेव समं वित्तं ययोरेव समं कुलं तयोर्मैत्री

पंचतं ३७ वाहस्वनजुगुप्सितवपुष्टया: । तथा च । मृगा [illegible] संगम [illegible] गोभिस्त्व [illegible] रोगैः । मूर्खश्च [illegible] धियः [illegible] भि: समा
नशील व्यसनेषु सख्यम् ॥ तद्यदि गत्वा तं प्रसादयामि तथा न प्रसादयाम्यति । उक्तं च । निमित्तमुद्दिश्य [illegible] प्रकुप्यति ध्रुवं स तस्या
पगमे प्रसीदति । अकारणद्वेषपरा हि यो [illegible] कथं न रोसो परितोषमेति [illegible] साधु [illegible] भक्ता [illegible] परिहित [illegible] परस्
[illegible] सेवा संव्यवहार [illegible] तानामपि [illegible] तिस्स्वकृतैः [illegible] तस्मादपि [illegible] वा च
निपतेः सेवा [illegible] । तथा च [illegible] रूप [illegible] यालि
[illegible] नृपतिमनसां नैकभावाश्रयाणां सेवाधर्मः परमगहनो योगिनामप्यगम्यः । तत्परि [illegible] । [illegible] प्रसादमस्य
[illegible] सभी पवित्रैर [illegible] पिंगलकः [illegible] पितः । तेनायं [illegible] पिहृ [illegible] वदति । उक्तं च [illegible]
दमनकः । [illegible] सपत्नी [illegible] सपत्नी [illegible] तेऽपि [illegible] कुर्वन्ति [illegible] तव [illegible]
[illegible] तदा [illegible] दमनकः । भो मित्र [illegible] पितोऽपि [illegible]
[illegible] वनेऽस्मिन् [illegible] प्रसादयामि [illegible] दमनकः । भो [illegible] नयता [illegible] नामपि [illegible] कार्यार्थे [illegible]
[illegible] । वद वः पंडिताः [illegible] सर्वे [illegible] विवेकः [illegible] कार्यं [illegible] दमनकः । [illegible]
[illegible] अस्ति कस्मिंश्चित् [illegible] नाम सिंहः प्रतिवसति स्म [illegible] यो [illegible]
[illegible] कथं [illegible] नाम [illegible] मिदं [illegible] ३८
[illegible] ततस्ते [illegible] स्वामिन [illegible] नानाजीवविघात [illegible] भोजयेस्त [illegible] दिनेदिने [illegible]

[illegible] दमनक [illegible]

[illegible] अर्थ [illegible] कथा [illegible]

३७

भानयाति· अपि किंकृतोऽपि भयं यस्यते १ शे॰फाट २

स्तेहमागतं हन्मि उक्तं च। दस्त्वा भयमपि प्राप्तं विश्वस्तमकुतोभयम्। यो हन्यात्तस्य पापस्य फलं ब्राह्मणघातकम्। तदभयप्रदानं दत्त्वा मत्सकाशमा
नीयतां। येनास्यागमनकारणं पृच्छामि। अथासौ सर्वैरपि विश्वास्याभयप्रदानं दत्त्वा मत्सकाशमानीतः प्रणम्योपविष्टश्च। ततस्तस्य पृच्छतः सो
ऽात्मवृत्तांतः स्वार्थभ्रष्टसमुद्भवो निवेदितः। ततः सिंहेनोक्तं। भोः कथनक मा त्वं ग्रामं दत्वा भूयोऽपि भाराद्वहनकष्टभागी भूयाः। तदत्रैवार
ण्ये निर्विशंको मरकतसदृशानि शष्पाग्राणि भक्षयन्मया सहैव वस। सोऽपि तथेत्युक्त्वा तेषां मध्ये विचरन्नकुतोभयमिति सुखं नास्ते·
अथान्येद्युर्मदोत्कटस्य महागजेनारण्यचारिणा सह युद्धं संजातं तेन तस्य दन्तैर्वक्षसि सर्वांगेषु प्रहारः कृतमभवत्। अथ क्षीणोऽसौ सामर्थ्यान्न कुत्रचित्पद
मपि चलितुं शक्नोति ते सर्वे काकादयोऽप्यप्रभुत्वेन क्षुधाविष्टाः परं दुःखं भेजुः अथ तान्सिंहः प्राह भोः अन्विष्यतां कुत्रचित्किंचित्स
त्त्वं येनाहमेतामपि दशां प्राप्तस्तं हत्वा युष्मद्भोजनं संपादयामि अथ ते चत्वारोऽपि भ्रमितुमारब्धाः यावन्न किंचित्सत्त्वं पश्यन्ति तावद्वा
यसशृगालौ परस्परं मंत्रयतः शृगालः भो वायस किं प्रभूतभ्रांतेन अयमस्माकं प्रभोः कथनको विश्वस्तस्तिष्ठति तदेनं हत्वा
प्राणयात्रां कुर्मः वायसः युक्तमुक्तं भवता परं स्वामिना तस्याभयप्रदानं दत्तमास्ते न वध्योऽयमिति शृगालः भो वायस अहं स्वा
मिनं विज्ञाप्य तथा करिष्ये यथा स्वामी वधं करिष्यति तत्तिष्ठत यूयमत्रैव यावदहं गृहं गत्वा प्रभोराज्ञां गृहीत्वा चागच्छामि एवम
भिधाय सत्वरं सिंहमुद्दिश्य प्रस्थितः अथ सिंहमासाद्येदमाह स्वामिन्समस्तं वनं भ्रांत्वा वयमागताः न किंचित्सत्त्वमासादि
तं तत्किं कुर्मो वयं संप्रति बुभुक्षया पदमपि चलितुं न शक्नुमः देवोऽपि पथ्याशी वर्तते तद्यदि देवादेशो भवति तदा कथनके

बुभुक्षया अधिकारेनेत राजाज्ञा

स्वा
भ्रांतेन स्म
भव·२

२८ कपिशितेनाद्यपथ्यक्रिया क्रियेत अथ सिंहस्तस्य तद्दारुणं वचनमाकर्ण्य सकोपमिदमाह धिक् पापाधम यद्येवं भूयोपि वदसि तत्
तत्स्वांतत्क्षणेन वधिष्यामि यतो मयास्याभयं दत्तं तत्कथं व्यापादयामि उक्तंच नगोप्रदानं नमहीप्रदानं नचान्नदानं हि तथा
प्रधानं यथा वदंतीह महाप्रधानं सर्वप्रदानेष्वभयप्रदानं तच्छ्रुत्वा शृगालः अहो स्वामिन् यद्यभयप्रदानं दत्वा वधः क्रिय
ते तदेष दोषो भवति पुनर्यदि स एव देवपादानां भक्त्या आत्मनो जीवितव्यं प्रयच्छति तन्न दोषः ततो यदि स स्वयमेवात्मानं वधा
य नियोजयति तद्वध्यो न्यथास्माकं मध्यादेकतमो वध्य इति यतो देवपादाः पथ्याशिनः क्षुन्निरोधादंत्यां दशां यास्यंति तत्कि
मेतैः प्राणैरस्माकं ये स्वाम्यर्थे न यास्यंति अपरं पश्चादप्यस्माभिर्वह्निप्रवेशः कार्यः यदि स्वामिपादानां किंचिदनिष्टं भविष्य
ति उक्तंच यस्मिन्कुले यः पुरुषः प्रधानः स सर्वयत्नैः परिरक्षणीयः तस्मिन्विनष्टे कुलसारभूते न नाभिभंगे ह्यरका वहंति॥
तदाकर्ण्य मदोत्कटः यद्येवं तत्कुरुध्वं यदभिरुचितं तच्छ्रुत्वा सत्वरं गत्वा तेनाह भोः स्वामिन् महती अवस्था वर्तते तत्किं प
र्यटनेन तेन विना कोऽस्मान् रक्षयिष्यति तदस्य क्षुत्प्रकोपात्परलोकं प्रस्थितस्य स्वामिनः शरीरदानं कुर्मः येन स्वामिप्र
सादस्यानृण्यं गच्छामः उक्तंच आपदं प्राप्नुयात्स्वामी यस्य भृत्यस्य पश्यतः प्राणेषु विद्यमानेषु स भृत्यो नरकं
व्रजेत्

२८

इति श्रुत्वा ते सर्वे वाष्पपूरितदृशो मदोत्कटं प्रणम्योपविष्टाः॥ तान्दृष्ट्वा मदोत्कटः॥ भो दृष्टं प्राप्तं वा किंचित्सत्वं अथ तेषां मध्यात्काकः
प्रोवाच स्वामिन्वयं तावत्सर्वत्र पर्य्यटिताः परं न किंचित्सत्वं प्राप्तं दृष्टं वा तदद्य मां भक्षयित्वा प्राणान्धारयतु स्वामी येन देवस्याप्या
यनं भवति मम पुनः स्वर्गप्राप्तिरिति उक्तंच स्वाम्यर्थे यस्त्यजेत्प्राणान् भृत्यो भक्तिसमन्वितः स परं पदमाप्नोति जरामरण
वर्जितं शृगालस्तमाह भोः स्वल्पकायो भवान् भवद्भक्षणात्स्वामिनस्तावत्प्राणयात्रा न भवति अपरो दोषश्च तावत्समुत्प
द्यते उक्तंच काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्ल्लभं भक्षिते नापि किं तेन तृप्तिर्येन न जायते तद्दर्शिता भवता स्वामिभक्ति
र्गतिश्चानृण्यं भर्तृपिंडस्य प्राप्तश्चोभयलोके साधुवादश्च तदपसराग्रतो ऽहं स्वामिनं विज्ञापयामि तथानुष्ठिते शृगालः
सादरं प्रणम्योपविष्टः स्वामिन्मां भक्षयित्वा अद्य प्राणयात्रां कृत्वा मम उभयलोकप्राप्तिं कुरु उक्तंच स्वाम्यायत्ताः
सदा प्राणा भृत्यानामर्ज्जिता धनैः यतस्ततो न दोषोऽस्ति तेषां ग्रहणसंभवः अथ तच्छ्रुत्वा द्वीप्याह भो साधूक्तं भवता पुन
र्भवानपि स्वल्पकायः स्वजातिश्च नखायुधत्वादभक्ष्य एव उक्तंच नाभक्ष्यं भक्षयेत्प्राज्ञः प्राणैः कंठगतैरपि विशेषात्तद
पि स्तोकं लोकद्वयविनाशकं तद्दर्शितं त्वयात्मनः कौलीन्यं अथवा साधु चेदमुच्यते एतदर्थं कुलीनानां नृपाः कुर्वंति सं
ग्रहं आदिमध्यावसानेषु न ते गच्छंति विक्रियां तदपसाराग्रतो येनाहं स्वामिनं विज्ञापयामि तथानुष्ठिते द्वीपी प्रणम्य

मदोत्कटमुवाच स्वामिन्क्रियतामद्य मम प्राणैः प्राणयात्रा दीयतामक्षयो वासः स्वर्गे मम विस्तार्य्यतां क्षितितले प्रभूतं यशः तन्नात्र वि
स्मयः कार्यः उक्तं च मृतानां स्वामिनः कार्ये भृत्यानामनुवर्त्तिनां भवेत्स्वर्गेऽक्षयो वासः कीर्त्तिश्च धरणीतले तच्छ्रुत्वा क्रथन
कश्चिंतयामास एतैस्तावत्सर्वैरपि शोभनवाक्यान्युक्तानि परं न चैकोपि स्वामिना विनाशितः तदहमपि प्राप्तकालं विज्ञापयामि वि
वेकथया स्वामिनं संभाषयामि येन मद्वचनमेते त्रयोपि समर्थयंति इति निश्चित्य प्रोवाच भो युक्तमुक्तं भवता परं भवानपि नखायुध
त्वात्कथं भवंतं स्वामी भक्षयति उक्तं च मनसापि स्वजात्यानां योनिष्टानि प्रचिंतयेत् भवंति तस्य तान्येव इह लोके परत्र च तदपसराग्र
तो येनाहं स्वामिनं विज्ञापयामि तथानुष्ठिते क्रथनकोऽग्रे स्थित्वा प्रणम्योवाच स्वामिन्नैते भक्ष्यास्तव तन्मम प्राणैः प्राणयात्रा विधी
यतां येन मम उभयलोकप्राप्तिर्भवति उक्तं च न यज्वानोपि गच्छंति तां गतिं नैव योगिनः यां यांति प्रोज्झितप्राणाः स्वाम्यर्थे सेव
कोत्तमाः एवमभिहिते ताभ्यां शृगालचित्रकाभ्यां विदारितोभयकुक्षिः क्रथनकः प्राणानत्याक्षीत् ततश्च तैः क्षुद्रपंडितैः सर्वैर्भक्षि
तः अतोहं ब्रवीमि बहवः पंडिताः क्षुद्राः इति संजीवकः नेदं [illegible] परिवारोयं राजा मया संपरिकल्पितः उक्तं च अशुद्धप्रकृतौ राज्ञि
जनता नानुरज्यते यथा गृध्रसमासन्नः कलहंसः समाचरन् तथा च गृध्राकारोपि सेव्यः स्यात् हंसाकारैः सभासदैः हंसाकारोपि
संत्याज्यो गृध्राकारैः स तैर्नृपः तन्नूनं ममोपरि केनचिद्दुर्जनेनायं प्रकोपितस्तेनैवं वदति अथवा न भवत्येतत् उक्तं च कर्णे सम
विशेषभग्नस्य किंचिन्न करोति वालिखितो लोकः श्वपाकतामपि यत्ते पिबति सुरां नरकपालेन अथवा साध्विदमुच्यते पादाहतोपि २८

पंच. तं. गगनेंड्डीनापि अर्कघोतितदूरमन्यआकांक्ष्यस्थानमन्विष्यतां तच्छ्रुत्वाविहस्यटिट्टिभआह भद्रेनयुक्तमुक्तंभवत्या किमात्मासमुद्रो
३० येनममडंडानिपहरिष्यति त्वंनिःसंदेहातिष्ठस्थानेत्रैवगर्भंमुंच उक्तंच यःपराभवसंत्रस्तःस्वस्थानंसंत्यजेन्नरः तेनचेत्पुत्रिणीजातातद्वंध्या
केनकथ्यते तदाकर्ण्यसमुद्रश्चिंतयामास अहोगर्वःपक्षिकीटस्यास्य अथवासाध्विदमुच्यते उत्क्षिप्यटिट्टिभःपादावास्तेभंगभ
यादिवः स्वचित्तकल्पितोगर्वःकस्यनात्रोपजायते तन्मयास्यप्रमाणंकुतूहलादपिद्रष्टव्यं किंममैषअंडापहारेकृतेकरिष्यति
इतिचिंतयित्वास्थितः अथप्रसवानंतरंप्राणयात्रार्थंगतायाटिट्टिभ्याःसमुद्रोवेलाव्याजेनांडान्यपजहार अथायातासाटि
ट्टिभीप्रसवस्थानंशून्यमवलोक्यप्रलपंतीटिट्टिभमवदत् भोमूर्खकथितमासीन्मयातेयत्समुद्रवेलयामंडानांविनाशोभविष्य
तितद्दूरतरंव्रजामः परंमूढतयाहंकारमाश्रितोममवचनंनकरोषि अथवासाध्विदमुच्यते सुहृदांहितकामानांनकरोतीहयोवचः
सकूर्मइवदुर्बुद्धिःकाष्ठाद्भ्रष्टोविनश्यति टिट्टिभआह कथमेतत् साब्रवीत् अस्तिकस्मिंश्चिज्जलाशयेकंबुग्रीवोनामकच्छप
स्तस्यसंकटविकटनाम्नीमित्रेहंससजातीयेपरमस्नेहमाश्रिते ततस्तौहंसौसरस्तीरमासाद्यतेनसहानेकदेवर्षिमहर्षीणां
कथाःकृत्वास्तमयवेलायांस्वनीडसंश्रयंकुरुतः अथगच्छतिकालेअनावृष्टिवशात्सरःशनैःशनैःशोषमगमत् ततस्तद्दुःख
दुःखितौतावूचतुः भोमित्रजंबालशेषमेतत्सरःसंजातंतत्कथंभवान्भविष्यतीतिव्याकुलत्वंनोहृदिवर्तते तच्छ्रुत्वाकंबुग्री
वः भोसांप्रतंनास्माकंजीवितव्यंजलाभावात्तथाप्युपायश्चिंत्यतामिति उक्तंच त्याज्यंनधैर्यंविधुरेपिकालेधैर्यात्कदा राम:
चित्स्थितिमाप्नुयात्सः यथासमुद्रेपिचपोतभंगेसांयात्रिकोवांछतितर्तुमेव अपरंच मित्रार्थेबांधवार्थेचबुद्धिमान्यततेत
सदा जातास्वापत्सुयत्नेनजगादेदंवचोमनुः तदानीयतांकाचिद्दृढरज्जुर्लघुकाष्ठंवा अन्विष्यतांप्रभूतजलसनाथ ३०

१८ दंडस्य कोहतोपि यं दंष्ट्रया स्पृशति लोके लहंतिसर्पः कोप्येत स्वापि पशुर्नो त्वम अनुलधर्मा कतोपरं स्फुरति हंति परं स मूलं। तदेवं गते किं कृतं भ
वतिमे। [illegible] महाराजा आत्म छा भिदमनक आह भिन्नभि अनवतेद शांत सामनं युज्यते नेवंविधस्य कु स्वामिनः सेवा विधया नृपा बाल तरारप्य व
लिमस्य कार्याकार्य मज्ञानतः उक्तं च प्रतिपक्षस्य परित्यागो विधीयते। मंत्री वकः। अस्मिंस्तत्त रक्तमिति कुपिते गंमे नरा वैन नेयान्य उगता
नामपि निर्हीतं भवति उक्तं च महतायापराध्यत दूरस्थोस्मीति नाश्वसेत दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसकं तं दुष्कुस्वकांना स्वदांम
श्रयस्वारं उक्तं च नता नृतीर्थे तपसा वृक्षोकीन्न वैगौषधेन दानशतैः स्तोत्रैः बलेन यावत् योनि स्वेतु धीरः प्राणान्स [illegible] स्पात्तेन
शीलाः मतैः संप्राप्यतेस्वर्गा श्रीवृद्धिः कीर्तिरुत्तमा तनुजाबपि परराणां मुखावलोः सुद्धेऽ नो नम्भात्र ह्रासो स्वदेवधस्कालाविधिना
तद्विपत्तं सर्वं ने यत्तेर्भ स्मुद्दे हिं तो। नृविहितैः संप्राप्यते यत्फलं सत्तो बाधम वासहेशमा नियते श्रो डायणा द्रोः कृतैः धर्मसत्कल
मौ हृवं विनिहतैः संप्राप्यते तत्क्षणात् तदाकर्ण दमनक श्चिंतयामास दुष्टाबुकूत निश्चयोयं दुष्टपतेदुरात्मा नदपादिकदाचिं भीक्षासंग
गाम्यां स्वामिन् प्रहरिष्यति तन्महाननर्थः संपत्स्यते तेने नंमपि दुष्टाः प्रबोध्य तथा करोमि यथा देशांतर गमनं करोति अथ एवं भी
मित्र सम्यग भिहितं भवता परं किंतु कः स्वामिनं प्रयाः संग्रामः उक्तं च बलवंतं रिपुं दृष्ट्वा किलात्मानं प्रगोपयेत् बलवद्भिः कर्तव्या
रवं दूपकाशिता अत्र च शौर्यं बलमाधिश्राय वरमारभतं तुयः सपराभवमाप्नोति समुद्र इव टिट्टिभादिव संजीवकः कथमेतत् दमनक
पक्षकोस्मिं दक्षिणसमुद्रतीरे टिट्टिभदंपती वसतः। तत्र गच्छति काले टिट्टिभी सगर्भा जाता आसन्न प्रसवा सती [illegible]
सतीसामान्यं भर्तारमुवाच भो कांत अस्मत्प्रसव स्थानं मार्गय यत्र निर्विघ्नं प्रसवं करोमि ततः स प्राह भद्रे [illegible]
[illegible]

थं सरः। येन मया तस्मिन्काष्ठमध्यप्रदेशे दंतैर्गृहीते सति युवां कोटिभागयोस्तत्काष्ठं स्वमित्राभ्यां संधृतं सत् धनलोपेन न मतं। तावूचतुः भो मित्र त्वं करिष्या
वः परं भवता मौनेन भाव्यं नो चेत्तव काष्ठात्पातो भविष्यति। तथानुष्ठिते गच्छता च कूर्मो वेगाधोभागव्यवस्थितं कंचित्पुरमालोकितं। तत्र
ये पौरास्तैर्न तथानीयमानं विलोक्य सविस्मयमिदमूचुः। अहो चक्राकारं किमपि पक्षिभ्यां नीयते पश्यत पश्यत। अथ तेषां कोलाहलमाकर्ण्य
कंबुग्रीव आह। भो किमेष कोलाहलः। कर्तुमारब्धः इत्यर्धोक्ते पपात। पौरैः खंडशः कृतः। अतोऽहं ब्रवीमि सुहृदां हितकामानामिति।
तथा च। अनागतविधाता च प्रत्युत्पन्नमतिस्तथा। द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति। टिट्टिभ आह। कथमेतत्। साब्रवीत्। कस्मिंश्चि
स्मिंश्चिज्जलाशये अनागतविधाता प्रत्युत्पन्नमतिर्यद्भविष्यश्चेति त्रयो मत्स्याः। अथ कदाचित्तं जलाशयं दृष्ट्वा गच्छद्भिर्मत्स्यजीविभि
रभिहितं। यदहो बहुमत्स्योऽयं ह्रदः कदाचिदपि नास्माभिरन्वेषितः। तदद्याहारवृत्तिः संजाता संध्यासमयश्च संवृत्तः। ततः प्रभातेऽत्रागंतव्य
मिति निश्चयः। अतस्तेषां तत्कुलिशपातोपमं वचः समाकर्ण्य अनागतविधाता सर्वान्मत्स्यानाहूय इदमूचे। अहो श्रुतं भवद्भिर्यन्मत्स्य
जीविभिरभिहितं। तद्रात्रावपि गम्यतां किंचिन्निकटं सरः। उक्तं च। अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनं। संश्रितव्योऽथवा दुर्गो नान्या
तेषां गतिर्भवेत्। तन्नूनं प्रभातसमये मत्स्यजीविनोऽत्र समागम्य मत्स्यसंक्षयं करिष्यन्ति। एतन्मम मनसि वर्तते। तन्न युक्तं सांप्रतं क्षणमप्य
त्रावस्थातुं। उक्तं च। विद्यमाना गतिर्येषामन्यत्रापि सुखावहा। ते न पश्यन्ति विद्वांसो देशभंगं कुलक्षयं। तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह।
अहो सत्यमभिहितं भवता ममाप्यभीष्टमेतत्। तदन्यत्र गम्यतामिति। उक्तं च। परदेशभयाद्भीता बहुमाया नपुंसकाः। स्वदेशे निधनं यां
५५ ति काकाः कापुरुषा मृगाः। यस्यास्ति सर्वत्र गतिः स कस्मात्स्वदेशरागेण हि याति नाशं। तातस्य कूपोऽयमिति ब्रुवाणाः क्षारं जलं कापुरु
षाः पिबंति। अथ तत्समाकर्ण्य प्रोच्चैर्विहस्य यद्भविष्यः प्राह। अहो न भवद्भ्यां मंत्रितं सम्यगेतदिति। यतः किं वाङ्मात्रेणापि तेषां पि
तृपैतामहं कमेतत्सरस्त्यक्तुं युज्यते। तद्यद्यस्यायुःक्षयोऽस्ति तदन्यत्र गतानामपि मृत्युर्भविष्यत्येव। उक्तं च। अरक्षितं तिष्ठति

पं॰तं॰ देवराक्षितं समरसितं देवहतं विनश्यति ॥ अवत्यनाथो पि विवर्धते वने विसर्जितः कृतप्रयत्नो पि गृहे न जीवति ॥ तदहं त्वयास्वामिभक्तत्वात्वयतस्तीतिभीतितत्का
यें ॥ अथ तस्य तं निश्चयं ज्ञात्वा अनागतविधाता प्रभूतजलनिर्गमः स्रोतोभिः कोन्तो सह परिजनेन ॥ अथ प्रभाते तैर्मत्स्यजीविभिर्जालैस्तत्र प्रत्युत्पन्नमतिर्मा
२१ प्रत्युत्पन्नमतिःसह जलाशयोनिर्मत्स्यतां नीतः ॥ अतो हं ब्रवीमि अनागतविधाता च इति ॥ टिट्टिभः ॥ भो किं मां यद्भविष्य इति संभावयसि ॥
तत्पश्य मे बुद्धिप्रभावं ॥ यावदेव दुष्टसमुद्रं शोषयामि ॥ टिट्टिभी ॥ अहो कस्ते समुद्रेण सह विग्रहस्तन्न युक्तमस्योपरि कोपं कर्तुं ॥ उक्तं च यतः ॥ पुं
सामसमर्थो नामुपद्रवायात्मनो भवेत्कोपः ॥ पिठरं क्वथदतिमात्रं निजपार्श्वानेव दहतितरां तथा च ॥ अविदित्वात्मनः शक्तिं परस्य च समुत्सुकः
गच्छन्नभिमुखो वह्नौ नाशं याति पतंगवत् ॥ टिट्टिभः ॥ प्रिये मामैवं वद ॥ यतः उत्साहशक्तियुक्तानां स्वल्पा अपि गुरुं जयंति विक्रमेण ॥ उक्तं च ॥
विशेषात्परिपूर्णस्य याति शत्रोरमर्षणः ॥ आभिमुख्यं शशांकस्य यथाद्यापि विधुंतुदः ॥ तथा च ॥ प्रमाणादधिकस्यापि गंडश्यामदच्यु
तः ॥ पदं मूर्ध्नि समाधत्ते केसरी मत्तदंतिनः ॥ तथा च ॥ बालस्यापि रवेः पादाः पतंत्युपरि भूभृतां ॥ तेजसा सह जातानां वयः क्वोपयुज्यते ॥
तदनया चंच्वास्य सकलं तोयं शुष्कस्थलतां नयामि ॥ टिट्टिभी ॥ भो कांत यत्र जाह्नवी नवशतानि नद्य सहस्राणि गृहीत्वा नित्यमेव प्रविशति तथा सिंधु
श्च तत्कथं त्वमष्टादशनदीशतैः पूर्यमाणं तं विप्रुषवाहिन्या चंच्वा शोषयिष्यसि तत्किमश्रद्धेयेनोक्तेन ॥ टिट्टिभः ॥ प्रिये ॥ अनिर्वेदः श्रि
यो मूलं चंचुर्मे लोहसंनिभा ॥ अहोरात्राणि दीर्घाणि समुद्रः किं न शुष्यति ॥ दुरधिगमः परभागो यावत्पुरुषेण पौरुषं न कृतं ॥ जय रामः
ति तुलामाधिरूढो भास्वानपि जलदपटलानि ॥ टिट्टिभी ॥ यदि त्वया अवश्यं समुद्रेण सह विग्रहानुष्ठानं कर्तव्यं तदन्यानपि विहगानाहूय सु
हृज्जनसहितः एवं समाचर ॥ उक्तं च ॥ बहूनामप्यसाराणां समवायो हि दुर्जयः ॥ तृणैरावेष्ट्यते रज्जुर्यया नागोपि बध्यते ॥ तथा च ॥ च २१
टकाकाष्ठकूटेन मक्षिकादर्दुरैस्तथा ॥ महाजनविरोधेन कुंजरः प्रलयं गतः ॥ टिट्टिभः ॥ कथमेतत् ॥ साब्रवीत् ॥ कस्मिंश्चि

द्वौ हंसौ वा कर्पूरतिलकतरु कृतीनेलयौ प्रतिवसतः। अथ गच्छता कालेन न संततिरभवत्। अन्यस्मिन्नहनि श्रमतो गजः कश्चित्तं तमालतरुं संध
मौर्तेः छायार्थी समाश्रितः। ततो मदोत्कटस्तेन तस्य शाखां वा चटिका श्रिता पुष्कराग्रेणाकृष्य बभंज। तस्याभिगानचटिकाण्डानि पतितानि। अथ सु
शोकतया चटिका चटकौ कथमपि प्राणैर्वियोजिता। अथ सा डिंभगाभिभूता प्रलापान् कुर्वाणा न कथंचिदतिष्ठत्। अथांतरे तस्याः प्रलाप
प्रलापान् श्रुत्वा काष्ठकूटो नाम पक्षी तस्याः परमसुहृत् दुःखदुःखिताभ्येत्य तामुवाच। भगवति किं वृथा प्रलापेन। उक्तं च। नष्टं मृत
मतिक्रांतं नानुशोचंति पंडिताः। पंडितानां च मूर्खाणां विशेषोऽयं ततः स्मृतः॥ तथा च। अशोच्यानीह भूतानि यो मूढस्तानि शोचति। स दुः
खं लभते दुःखं द्वावनर्थौ निषेवते॥ अन्यच्च। श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः। अतो न रोदितव्यं हा क्रियाः कार्याः स्वशक्ति
तः। चटिका अस्त्येतत्परं दुष्टगजेन मम दारुणो संतानक्षयः कृतः। तद्यदि मम त्वं सत्यः सुहृत्तदस्य गजापसदस्य कोऽपि वधोपायश्चिंत्यतां। य
स्यानुष्ठानेन मे संततिविनाशदुःखमपसरति। उक्तं च। आपदि येनोपकृतं येन च हसितं दशासु विषमासु। उपकृत्य तयोरुभयोस्तु पुरु
षं मन्ये। काष्ठकूटो भवति सत्यमभिहितं भवत्या। उक्तं च। स सुहृद्व्यसने यः स्यात्स पुत्रो यस्तु भक्तिमान्। स भृत्यो यो विधे
यज्ञः सा भार्या यत्र निर्वृतिः। तत्पश्य मे बुद्धिप्रभावं परं ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति। तामाहूयागच्छामि येन स दु
रात्मा दुष्टगजो हन्यते। अथासौ चटिकया सह मक्षिकां समासाद्य प्रोवाच। भद्रे ममेष्टेयं चटिका केनापि दुष्टेन पराभूता तोऽस्फोटनं
तत्तस्य वधोपायमनुतिष्ठेति। उक्तं च पुनः। प्रत्युपकाराय मित्राणां क्रियते प्रियं। यत्पुनर्मित्रमित्रस्य कार्यं मित्रैर्न किं कृतं। मक्षि
काप्याह। सखे कः संदेहः। स सुहृद्व्यसने यः स्यादन्यजात्युद्भवोऽपि सन्। वृद्धौ सर्वोऽपि मित्रं स्यात्सर्वेषामेव देहिनां। सत्यमेतत्परं ममापि सुहृद्भूतो
मेघनादो नाम मंडूकस्तिष्ठति तमप्याहूय यथोचितं कुर्मः। उक्तं च। हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः। कथंचिन्न विकल्पंते विद्व
द्भिश्चिंतिता नयाः। [illegible] मेघनादो नाम मंडूको दूरा[illegible]

पंच. तं. ततस्य कुपितस्य. तन्मदीयो मंत्रः कर्त्तव्यः ।। मक्षिके त्वं गत्वा मध्याह्ने समये तस्य मदोत्कटस्य गजस्य कर्णे बीणारवसद्दशं शब्दं कुरु येन श्रवण
३२ सुखलालसो निमीलितनयनो भवति. ततश्च काष्ठकूटचंच्वा स्फोटितनयनो ऽंधीभूतस्तृषार्त्तो मम गर्त्ततटाश्रितस्य सपरिकरस्य श
ब्दं श्रुत्वा जलाशयं समभ्येति. ततो गर्त्तमासाद्य पतिष्यति पंचत्वं यास्यतीत्येवं समवायं कृत्वा मेथ वैरसाधनं भविष्यति. अथ तथानुष्ठिते समत्त
गजो मक्षिकागेयश्रवणसुखान्निमीलितनयनः पश्चात्काष्ठकूटहृतचक्षुर्मध्याह्ने भ्राम्यन्मंडूकशब्दानुसारी गच्छन्महतीं गर्त्तमासाद्य प
तितो मृतश्च. अतोहं ब्रवीमि वटिका काष्ठकूटेनेति. टिट्टिभ आह. भद्रे एवं भवतु सुहृद्वर्गसमुदायेन समुद्रं शोषयिष्यामि । इति निश्चित्य बकसा
रसमयूरादीन्समाहूय प्रोवाच. भोः पराभूतोहं समुद्रेणांडापहरणेन तच्चिंत्यतामस्य शोषणोपायः. अथ ते संमंत्र्य प्रोचुः. अशक्ता वय
समुद्रशोषणे तत्किं वृथा प्रलापेन. उक्तं च. अबलः प्रोन्नतं शत्रुं यो याति मदमोहितः. युद्धार्थं स निवर्त्तेत शीर्णदंतो यथा गजः. तदस्माकं स्वामी वैन
तेयोस्ति तत्तस्मै सर्वमेतत्परिभवस्थानं निवेद्यतां येन स्वजातिपरिभवकुपितो वैरानृण्यं गच्छति. अथवात्रावलेपं करिष्यति तथापि नास्ति नो
दुःखं. उक्तं च. सुहृदि निरंतरचित्ते गुणवति भृत्येनुवर्त्तिनि कलत्रे. स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखी भवति. तद्यामो वैनतेयसका
शं यतोसावस्माकं स्वामी. तथानुष्ठिते सर्वे ते पक्षिणो विषण्णवदना बाष्पपूरितदृशः फूत्कर्तुमारब्धाः करुणस्वरेण वैनतेयसकाशमुपेत्य
अहो अब्रह्मण्यमब्रह्मण्यं. अधुना सदाचारस्य टिट्टिभस्य भवता नाथेन सता समुद्रेणांडान्यपहृतानि तत्प्रनष्टमधुना पक्षिकुलं. अ राम:
न्येपि स्वेच्छया समुद्रेण व्यापादयिष्यंते. उक्तं च. एकस्य कर्म संवीक्ष्य करोत्यन्योपि गर्हितं. गतानुगतिको लोको न लोकः पारमार्थिकः । ३२
तथा च. चाटतस्करदुर्वृत्तैस्तथा साहसिकादिभिः. पीड्यमानाः प्रजा रक्ष्याः कूटछद्मादिभिस्तथा. प्रजानां धर्मषड्भागो राज्ञो भवति
रक्षितुः ४ अधर्मादपि षड्भागो जायते यो न रक्षति. प्रजापीडनसंतापात्समुद्भूतो हुताशनः. राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनि

वर्त्तते॥ राजा बंधुरबंधूनां राजा चक्षुरचक्षुषां राजा पिता च माता च सर्वेषां न्यायवर्त्तिनां फलार्थी पार्थिवो लोकान्पालयेद्यत्नमास्थितः दानमा
श्लो २ नादिनो येन मालाकारोंकुरानिव॥ यथा बीजांकुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः हिरण्यधान्यर
त्नानि यानानि विविधानि च तथान्यदपि यत्किंचित्प्रजाभ्यः स्यान्नृपस्य तत् अथैवं गरुडः समाकर्ण्य तद्दुःखदुःखितः कोपाविष्टश्चि
अचिंतयत्॥ अहो समस्तमुक्तमेतैः पक्षिभिस्तद्द्रुतं गत्वा तत्समुद्रं शोषयामि॥ एवं चिंतयतस्तस्य विष्णुदूतः समागत्याह॥ भो गरुत्मन् भगव
ता नारायणेनाहं तव पार्श्वे प्रेषितः देवकार्येण श्रीभगवानमरावत्यां यास्यति तत्शीघ्रमागम्यतां॥ तच्छ्रुत्वा गरुडः साभिमानं आ
ह॥ भो दूत किं मया कुभृत्येन भगवान्करिष्यति तज्ज्ञात्वा तद्वद यदन्यो भृत्यो वाहनायास्मत्स्थाने क्रियतां मदीयो नमस्कारो वाच्यो भ
गवतः॥ उक्तं च॥ यो न वेत्ति गुणान्यस्य न तं सेवेत पंडितः नाहि तस्मात्फलं किंचित्सुकृष्टादूषरादिव॥ दूतः भो वैनतेय कदाचिदपि भ
गवंतं प्रति त्वया नैतद्वाच्यमभिहितं॥ कथं तत्कथय किं ते भगवता अपमानं कृतं॥ गरुडः भगवदाश्रयभूतेन समुद्रेणास्मद्दिट्टिभांडा
न्यपहृतानि तथापि निग्रहं न करोति तदहं भगवतो न भृत्य एष निश्चयस्त्वया वाच्यः॥ तद्दूत त्वया भगवतः समीपं
तव्यं॥ अथ दूतमुखेन वैनतेयं प्रणयकुपितं विज्ञाय भगवांश्चिंतयामास॥ अहो स्थाने कोपो वैनतेयस्य तत्स्वयमेव गत्वा सम्मा
न्य पुरःसरं तमानयामि॥ उक्तं च॥ भक्तं शक्तं कुलीनं च न भृत्यमपमानयेत् पुत्रवल्लालयन्नित्यं य इच्छेच्छ्रियमात्मनः॥ अन्यच्च॥
राजा तुष्टोऽपि भृत्यानामानमात्रं प्रयच्छति ते तु सन्मानमात्रेण प्राणैरप्युपकुर्वते॥ इत्येवं संप्रधार्य रुक्मपुरे वैनतेयसकाशं सत्व
रमागतः॥ वैनतेयोऽपि गृहागतं भगवंतमवलोक्य त्रपाधोमुखः प्रणम्योवाच॥ भगवन् त्वदाश्रयोन्मत्तेन समुद्रेण मम भृत्यस्यां
डान्यपहृत्य मम अपमानस्थानं कृतं परं भगवल्लज्जयाहं तिष्ठामि नो चेत्तं स्थलतां नयामि इति॥ यतः स्वामिभयात्कुलेऽपि
प्रहारो न दीयते॥ उक्तं च॥ येन स्याल्लघुता वापि पीडा चित्ते प्रभोर्भवेत् प्राणत्यागेऽपि तत्कुर्यान्न कर्म कुलसेवकः। तच्छ्रुत्वा

पंच तं. भगवानाह: भो देवेनतेयस्स समभिहितं भक्ता. उक्तं च. कृत्वापराधं सोदंड: स्वामिनो आयनेन्द्रत: तेन लज्जापितोस्यात्थानभत्पस्सयं यापुन:
३३ तदागच्छयेनांडानि सद्य प्रदास्यामि टिट्टिभस्सभावयामः श्रमरावनो वगच्छाम: तथानुष्ठितेसमुद्रो भगवता निर्भर्त्स्य आगतं ब्रह्मसंधा
याभिहित: भो दुरात्मन् टिट्टिभांडानि तोयेतस्य लत्ता नयामि. तत: समुद्रेण समभयेन टिट्टिभांडानि निःसृतानि: टिट्टिभेना
पिनागो येसमर्पितानि. अतोहं ब्रवीमि शत्रोर्बलमविज्ञाय इति. तस्मात् पुरुषेणोद्यमो न त्याज्य: तदाकर्ण्य संजीवक स्तमेव भूयो
पिपत्रच्छ. भोमित्र कथं ज्ञेयोमवासौ दुष्टबुद्धिरिति. इयन्तं कालं यावदुत्तरोत्तर स्नेहेन प्रसादेन चाहं दृष्ट: न कदाचित्तद्विकृतिर्दृ
ष्टा. तत्कथ्यतां येनाहमात्मरक्षार्थं तद्वधाय यतते. दमनक: भद्र किमत्र ज्ञेयं. एषतेप्रत्यय: यदिरक्तनेत्रस्त्रिशिखां भ्रुकुटिं दधान:
सृक्किणी परिलेलिहन् त्वां दृष्ट्वा भवति तद्दुष्टबुद्धिरन्यथा सुप्रसाद इति. तदापृच्छ्य त्वां स्वभवनं गच्छामि त्वया च यथा यं मंत्रभेदो
न भवति तथा कार्यं. यदि निशामुखं प्राप्य शक्नोषि तत्प्रदेशत्याग: कार्य: यत: त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ग्रामं
जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्. आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि आत्मानं सततं रक्षेद्दारैरपि धनैरपि बलवता
श्रीराम: भिभूतस्यान्यदेशगमनं तदनुप्रवेशो वा नीति: तद्देशत्याग: कार्य: अथवात्मा सामभेद दान दंडैरपि रक्षणीय: उक्तं च अ
पि पुत्रकलत्रैर्वा प्राणान्रक्षेत पंडित: विद्यमानैर्यतस्तै: स्यात्सर्वं भूयोपि देहिनां. तथा च येन केनाप्युपायेन शुभेनाप्यशुभेन
वा उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् यो मायां कुरुते मूढ: प्राणत्यागे धनादिके तस्य प्राणा: प्रणश्यन्ति तैर्नष्टैर्नष्टमेव राम:
तत् एवमभिधाय दमनक: करटकसकाशमगात् करटकोपि तमायान्तं दृष्ट्वा प्रोवाच: भद्र किं कृतं तत्र भवता. दमनक: म ३३
या तावन्नीतिबीजानि वपनं कृतं परतो दैवायत्तं. उक्तं च यत: पराङ्मुखेपि दैवेत्र कृत्यं कार्यं विपश्चिता आत्मदोष
शिव

विनाशायत्वचित्तलभनाय च तथा च उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवं हि दैवमिति कापुरुषा वदंति दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृ
ते यदि न सिध्यति कोत्र दोषः करटकः तत्कथय कीदृक् त्वया नीतिबीजं निर्वापितं· सो ब्रवीत् मया तावन्योन्यं मिथ्यासंकल्पनाद्दू
स्तथा विहितौ यथा भूयोपि मंत्रयंतावेकस्थानस्थितौ न पश्यसि· करटकः अहो न युक्तं भवता विहितं· तत्परस्परं तौ स्नेहार्द्रहृ
दयौ सुखाश्रयौ कोपसागरे प्रक्षिप्तौ· उक्तं च· अविरुद्धं सुखस्थं यो दुःखमार्गे नियोजयेत्· जन्मजन्मांतरे दुःखी स नरः स्यादसंशयं अ
परं यच्च भेदमात्रेण पितृहृष्टस्तदप्ययुक्तं· यतः सर्वोपि जनो विरूपकरणे समर्थो भवति नोपकर्तुं उक्तं च घातयितुमेव नीचः पर
कार्यं वेत्ति न प्रसादयितुं पातयितुमेव शक्तिर्नाखोरुद्धर्तुमन्नपटः दमनकः अनभिज्ञो भवान्नीतिशास्त्रस्य तेनैतद्ब्रवीषि·
उक्तं च यतः जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् महाबलोपि तेनैव वृद्धिं प्राप्य स हन्यते तच्छत्रुभूतो यमस्माकं मंत्रिप
दहरणात्· उक्तं च पितृपैतामहं स्थानं यो यस्यात्र जिहीर्षति स तस्य सहजः शत्रुरुच्छेद्योपि प्रियेस्थितः तन्मया स उदा
सीनतया समानीतो भयप्रदानेन यावत्तावदहमपि तेन साचिव्यात्प्रच्यावितः अथवा साध्विदमुच्यते दद्यात्साधुर्यदि निज
पदे दुर्जनाय प्रवेशं तन्नाशाय प्रभवति ततो वांछमानः स्वयं सः तस्माद्देया विपुलमतिभिर्नावकाशोधमानां जारोपि स्या
द्गृहपतिरिति श्रूयते वाक्यतोत्र तेन मयास्यापि वधोपाय एष विरच्यते देशत्यागाय मरणाय वा भविष्यति· ततस्त्वामृते को
न्यो न ज्ञास्यति तद्युक्तमेतत्स्वार्थो यथानुष्ठितं· उक्तं च यतः निस्त्रिंशं हृदयं कृत्वा वाणी चेक्षुरसोपमां दुःखं तत्र न कर्तव्यं
हन्यात्तत्रापकारिणं· अपरं मृतोप्यस्माकं भोज्यो भविष्यति· तदेकं तावद्वैरसाधनता भविष्यति· अपरं साचिव्यं भ
विष्यति· तृप्तिश्चेति· तद्गुणत्रयमस्मिन्नुपरिस्थिते कस्मान्मां दूषयसि त्वं जाड्यभावात्· उक्तं च· परस्परपीडनं कुर्व

पंचतंत्र १ यैर्विद्वांश्च पंडितः । मूढबुद्धिर्न लब्ध्वैतद्वने चतुरको यथा ॥ करटक आह कथमेतत् । सोऽब्रवीत् । अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः । तस्य चतुरक-
२४ क्रव्यमुखनामानौ द्वौ शृगालोलूकौ भृत्यभूतौ सदानुगतौ तत्रैव वने निवसतः । अथान्यदिने सिंहेन कदाचिदासन्नप्रसवा प्रसववेदनया पीडिता स्व-
यूथाद्भ्रष्टा उष्ट्री उपविष्टा कस्मिंश्चिद्वनोद्देशे समासादिता । अथ तां व्यापाद्य यावदुदरं स्फोटयति तावज्जीवन् लघुदासेरकशिशुर्निष्क्रान्तः ।
सिंहोऽपि दासेरक्याः पिशितेन परां तृप्तिमुपागतः परं स्नेहात्तं दासेरकं गृहमानीयेदमुवाच । भद्र न तेऽस्ति मृत्योर्भयं मत्तो नान्यस्मादपि ततस्त्वं
यथेच्छयात्र वने भ्रम्यतामिति । यतस्ते शंकुसदृशौ कर्णौ अतः शंकुकर्णो नाम भविष्यसि । एवमनुष्ठिते चत्वारोऽपि ते एकस्थानविहारिणः
परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति । शंकुकर्णोऽपि यौवनपदवीमारूढः क्षणमपि न तं सिंहं मुञ्चति । अथ कदाचिद्वज्र-
मन्त दंष्ट्रस्य केनापि वन्येन गजेन सह युद्धमभवत् । तेन मदवीर्यात्स दन्तप्रहारैस्तथा क्षतशरीरो विहितो यथा कथंचिन्न देवाद्व्या-
पादितः । ततश्च प्रहारजर्जरितदेहो यत्र संचलितुं न शक्नोति तत क्षुत्क्षामस्तानुवाच । भो भवन्तः अन्विष्यतां किंचित्सत्त्वं येनाह-
नायुक्ता मेवंस्थितोऽपि तद्व्यापाद्यात्मनो युष्माकं च क्षुत्प्रणाशं करोमि । तच्छ्रुत्वा ते त्रयोऽपि वने संध्याकालं यावद्भ्रान्ताः परं न किंचित्सत्त्वमासादि-
तं । अथ चतुरकश्चिन्तयामास । यदि शंकुकर्णोऽयं व्यापाद्यते ततः सर्वेषां कतिचिद्दिनानि तृप्तिर्भवति परं नैनं स्वामी मित्र-
त्वात्समाश्रितत्वाच्च विनाशयिष्यति । अथ बुद्धिप्रभावेन स्वामिनं प्रतिबोध्य तथा करिष्यामि यथा व्यापादयिष्यति । उक्तं च । अवध्यं वा-
थवागम्यमकृत्यं नास्ति किंचन । लोके बुद्धिमतां बुद्धेस्तस्मात्तां विनियोजयेत् ॥ एवं विचिन्त्य शंकुकर्णमिदमाह । भो शंकुकर्ण स्वामी तावत्प-
थ्यं विना क्षुधया पीड्यते स्वाम्यभावादस्माकमपि ध्रुवं विनाश एव । तदहं किंचित्स्वाम्यर्थे वदिष्यामि तच्छ्रूयतां । शंकुकर्ण आह ।
भो शीघ्रं निवेदय येन ते वचनं शीघ्रं निर्विकल्पं करोमि । अपरं स्वामिनो हिते कृते मया सुकृतशतं कृतं भवति । अथ चतुरक आह । भो भद्र राम:
आत्मशरीरं द्विगुणलाभेन प्रयच्छ येन ते द्विगुणं शरीरं भवति स्वामिनः पुनः प्राणयात्रा भवति । तदाकर्ण्य शंकुकर्ण आह । भद्र यद्ये- २४

वं तन्मदीयं प्रयोजनमेतत्तदुच्यतां स्वाम्यर्थः क्रियतामिति॰ परमत्र धर्मः प्रतिभूः इति निश्चित्य ते सर्वे सिंहसकाशमाजग्मुः॰ ततश्चतुरकः देव न किंचित्सत्वं
प्राप्तं॰ भगवानादित्योऽप्यस्तंगतः॰ तद्यदि स्वामी द्विगुणं शरीरं प्रयच्छति ततः शंकुकर्णो द्विगुणं स्वशरीरं प्रयच्छति धर्मं प्रतिभुवि॰ सिंहः भो
यद्येवं तत्सुंदरतरं भवतु अस्याप्यर्थे धर्मः प्रतिभूः क्रियतामिति॰ अथ सिंहोक्तवचनानंतरं वृकशृगालाभ्यां विदारितोभयकुक्षिः शंकुकर्णः पंचत्व
मुपागतः॰ अथ वज्रदंष्ट्रश्चतुरकमाह॰ भो चतुरक यावदहं नदीं गत्वा स्नानं देवतार्चनविधिं कृत्वा आगच्छामि तावत्त्वयात्राप्रमत्तेन भाव्यमित्युक्त्वा नदीं गतः॰
अथ तस्मिन्गते चतुरकश्चिंतयामास॰ कथं ममैकाकिनो भोज्योऽयमुष्ट्रो भविष्यतीति विचिंत्य क्रव्यमुखमाह॰ भो क्रव्यमुख क्षुधालुस्त्वं तावद्या
वदसौ स्वामी नागच्छति तावत्त्वमस्योष्ट्रस्य मांसं भक्षय॰ अहं त्वां स्वामिनो निर्दोषं प्रतिपादयिष्यामि॰ सोऽपि तच्छ्रुत्वा यावत्किंचिन्मांसमास्वादयति
तावच्चतुरकेनोक्तं॰ भो क्रव्यमुख समागच्छति स्वामी॰ तत्त्यक्त्वैनं दूरे तिष्ठ येनास्य भक्षणं न विकल्पयति॰ तथानुष्ठिते सिंहः समायातो यावदु
ष्ट्रं पश्यति तावद्रिक्तीकृतहृदयो दासेरकः॰ ततो भ्रुकुटिं कृत्वा परुषतरमाह॰ अहो केनायमुष्ट्र उच्छिष्टतां नीतः॰ येन तमपि व्यापादयामि॰
एवमभिहिते क्रव्यमुखश्चतुरकमुखमवलोकयति किल तद्वद किंचिद्येन मम शांतिर्भवति॰ एवमभिहितश्चतुरको विहस्याब्रवीत् भो मामम
नादृत्य पिशितं भक्षयित्वाधुना मन्मुखमवलोकयसि॰ तदास्वादयास्य दुर्नयतरोः फलमिति॰ तदाकर्ण्य क्रव्यमुखो जीवनाशभयाद्दूरदेशं
गतः॰ एतस्मिन्नंतरे तेन मार्गेण दासेरकसार्थो भाराक्रांतः समायातः॰ तस्याग्रेसरोष्ट्रस्य कंठे महती घंटा बद्धा॰ तस्याः शब्दं दूरतो
पि समाकर्ण्य सिंहो जंबुकमाह॰ भद्र ज्ञायतां किमेष रौद्रः शब्दः श्रूयतेऽश्रुतपूर्वः॰ तच्छ्रुत्वा चतुरकः किंचिद्वनांतरं सत्वरमभ्युपेत्य प्रोवा
च॰ स्वामिन्गम्यतां त्वरया यदि शक्नोषि गंतुं॰ सोऽब्रवीत्॰ भद्र किमेवं व्याकुलोऽसि दर्शय तत्कथय किमेतदिति॰ चतुरकः स्वामिन्नेष धर्मराज
स्त्वदुपरि कुपितः यदनेनाकाले दासेरकोऽयं मदीयो व्यापादितः॰ यत्सहस्रगुणमुष्ट्रमस्य सका
शाद्गृहीष्यामीति निश्चित्य बृहन्मानम्॰ तदग्रेसरोष्ट्रग्रीवायां घंटां बद्ध्वा वध्यदासेरकस्य संबंधिनोऽपि पितृपितामहा

नादाय धैर्येण निर्यातेनार्थमायाता एवं सिंहोपि तस्य श्रुत्वा सर्वतो दूरादेवावलोकयन्नतम् छुंपरित्यप्रसाराभयात्प्रनष्टः यत्तु न कोपि द्वितीयो नेत्र तस्योत्सम्पमांसं
भक्षयामास अतोहं ब्रवीमि परस्यपीडनं कुर्वन्निति अथ दमनके गते संजीवकश्चिंतयामास अहो किमेतन्मया कृतं यत्शष्पादोपि मांसाशिनस्तस्यानुगः सं
वृत्तः अथवा साध्विदमुच्यते अगम्यान्यः पुमान्याति असेव्यांश्च निषेवते स मृत्युमुपगृह्णाति निर्गमभ्यन्तरीयथा तत्किं करोमि क्व गच्छामि कथं मे शान्तिर्भविष्यति अ
थवा तमेव पिंगलकं गच्छामि कदाचिच्छरणागतं मां रक्षति प्राणैर्न वियोजयति मत उक्तं च धर्मार्थं यततामपीह विपदो दैवाद्यदि स्युः क्वचित्तत्तासामुपशान्तये
सुमतिभिः कार्यो विशेषान्नयः लोके ख्यातिमुपागतात्र सकले लोकोक्तिरेषा यतो दग्धानां किल वह्निना हितकरः सेकोपि तस्योद्भवः तथा च लोके यथा तनुभ
तां निजकर्मपाके नित्यं समाश्रितवती सुहितां कृपारां एवं अर्जुनं श्रमम् अथ प्राप्य शुभां निष्कामं मम द्याधितं द्भवति नात्र विचारहेतुः अपरं च अन्यत्र गतस्यापि मे कस
चित् दुष्टसत्वस्य मांसाशिनः सकाशान्मृत्युर्भविष्यति तद्वरं सिंहात् उक्तं च महान्तं प्राप्य मर्त्यापि वधं प्राप्नोति शोभनम् दन्तभंगोपि नागानां श्लाघ्यो गिरिविदारणे
तथा च महतोपि क्षयं लब्ध्वा श्लाघ्यां नीचोपि गच्छति दानार्थी मधुपो यद्वत् गजकर्णसमाहतः एवं निश्चित्य स खलितगतिर्मंदं मंदं गत्वा सिंहाश्रयमपठत् अहो साधु
इदमुच्यते अंतर्लीनभुजंगमं गृहमिव व्याकुलं वा वनं ग्राहाकीर्णमिवाभिरामकमलच्छायासनाथं सरः नानादुष्टजनैरसत्यवचनासक्तैरनार्यैर्वृतं दुःखेन प्रति
गम्यते प्रचलितैः राज्ञां गृहं वार्द्धिवत् एवं पठन् दमनकोक्ताकारं पिंगलकं दृष्ट्वा प्रचकितः मंदं तनुशरीरो दूरतः प्रणामं विनाप्युपविष्टः पिंगलकोपि तथाविध
धं तं विलोक्य दमनकवाक्यं श्रद्दधानः कोपात्तस्योपरि पपात अथ संजीवकः खरनखरविकर्तितपृष्ठः शृंगाभ्यां तदुदरमुल्लिख्य कथमपि तस्माद्वियुक्तः
शृंगाभ्यां तं हन्तुमिच्छन् युद्धायावस्थितः अथ द्वावपि तौ पुष्पितपलाशप्रतिमौ परस्परं वधकांक्षिणौ दृष्ट्वा करटको दमनकमाह भो मूढ मनेन नयावि
रोधं वितन्वता त्वया न साधु कृतं न च त्वं मंत्रगतिं वेत्सि उक्तं च नीतिविद्भिः कार्याण्युत्तमदंडसाहसफलान्यायाससाध्यानि ये बुद्ध्या संशमयंति नी
तिकुशलाः साम्नैव ते मंत्रिणः निःसाराल्पफलानि ये त्वविधिना वांछंति दंडोद्यमैस्तेषां दुर्नयचेष्टितैर्नरपतेरारोप्यते श्रीस्तुलां तद्यदि

स्वाम्यभिघातो भविष्यति नन्विदं लक्षणीयमंत्र कुतश्चिज्ज्ञायते अथवा संजीवको न वध्यते तथाप्यभयं यतः आगतां देहैतस्य वधः तन्मूर्ख कथं त्वं मंत्रिपदम

भिलषसि सामसिद्धिं न वेत्सि तत्र वृथा मनोरथोऽयं दंडरुचेः उक्तं च सामादिर्दंडपर्यंतो नयः प्रोक्तः स्वयंभुवा तेषां दंडस्तु पापीयान् तं पश्चा

द्विनियोजयेत् साम्नैव यत्र सिद्धिर्न तत्र दंडो बुधेन विनियोज्यः पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन तथा च आदौ सामप्रयोक्तव्यं

पुरुषेण विजानता सामसाध्यानि कार्याणि विक्रियां यान्ति न क्वचित् न यं द्वेषानलो बध्यान सूर्येण न वह्निना साम्नैव विलयं याति विद्वे

षिप्रभवं तमः तथा यत्त्वं मंत्रिपदमभिलषसि तदप्ययुक्तं यतस्त्वं मंत्रगतिं न वेत्सि यतः पंचविधो मंत्रः स च कर्मणामारंभोपायः पुरु

षद्रव्यसंपत् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति सोऽयं स्वाम्यमात्ययोरेकतमस्य किंवा द्वाभ्यामपि विनिपातः समुपस्थिते

तदस्य कश्चिद्बुद्धिरस्ति तद्विचिंत्यतां विनिपातप्रतीकारः उक्तं च मंत्रिणां भिन्नसंधाने भिषजां सान्निपातिके कर्मणि व्यज्यते प्रज्ञा स्वस्थे

को वा न पंडितः तन्मूर्ख नैतत्कर्तुं समर्थस्त्वं उक्तं च घातयितुमेव नीचः परकार्यं वेत्ति न प्रसाधयितुं पातयितुमेव शक्तिर्नाखोरुद्धर्तुम

न्नपटं अथवा न ते दोषोऽयं स्वामिनो दोषः यतस्तव वाक्यं श्रद्दधाति उक्तं च नराधिपा नीचजनानुवर्तिनो बुधोपदिष्टेन न यान्ति ये पथा विशं

न्ति ते दुर्गममार्गनिर्गमं समस्तसंबाधमनर्थपंजरं तद्यदि त्वमस्य मंत्री भविष्यसि तदान्योऽप्यस्य समीपे साधुजनो न समेष्यति उक्तं च

यथा यथास्याः कुचयोः समुन्नतिस्तथा तथालोचनमेति० तथा च काकः कोकिलकूजितं० तथा च मालिन्यं नरकेशव० अपि च

असाधुः साधुर्वा० तथा चोक्तं गुणालयोऽप्यसन्मंत्री नृपतिर्नाधिगम्यते प्रसन्नस्वादुसलिलो दुष्टग्राहो यथा ह्रदः तथा चाशिष्ट

पंचतं.१ तदि तस्य स्वामिनोपि नाशो भविष्यति॥ उक्तं च विद्गस्वादुकथैर्मूर्खैर्न्यायासितकाकुकैः येऽस्मंते नृपालेषांसमंतोस्थिवः स्त्रियो नास्तिम् स्वर्वोपदेशेन केव
२६ लं दैवेन गुणाः मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च द्विषतां संप्रयोगेन पंडितोप्यवसीदति॥ उक्तं च नानाम्यं नमते दारु नाश्मानि स्यात् क्षुरक्रिया॥
सूचीमुखं विजानीहि नाशिष्यायोपदिश्यते॥ दमनकः कथमेतत् सोऽब्रवीत् अस्ति कस्मिंश्चित् पर्वतैकदेशे वानरयूथं तत्र च कदाचित् हेमंतसमये सौ
म्यवातसंस्पर्शवेपमानकलेवरं तुषारवर्षोद्वेगहतं न धारानिपातसमाहतं न कथंचिच्छान्तिमगमत्॥ अथ कैश्चिद्वानरैर्वह्निकणसदृशानि गुंजाफलानि वि
चित्य वह्निवांछया फूत्कुर्वद्भिः समंतात् स्थितं॥ अथ सूचीमुखो नाम पक्षी तेषां तं वृथायासमवलोक्य प्रोवाच भो भवंतः सर्वे दृष्टमानैते वह्नि
कणाः वह्निकणसदृशानि गुंजाफलानि एतानि तत्किं वृथाश्रमेण नैतस्मात् शीतरक्षा भविष्यति तदन्विष्यतां कश्चिन्निर्वातो वनप्रदेशो गुहा वा गि
रिकंदरं वा अद्यापि साटोपा मेघा दृश्यन्ते अथ तेषामेकतमो वृद्धवानरस्तमुवाच भो किमनेन तव व्यापारेण तद्गम्यतां उक्तं च मुहुर्विघ्नितकर्मा
णं द्यूतकारं पराजितं नालापयेद्विवेकज्ञो यश्च ... आत्मनः॥ तथा च आखेटिकं वृथाक्लेशं मूर्खं व्यसनसंस्थितं समालापेन योजयन् स
गच्छति पराभवं सोपि तमनादृत्य भूयोपि वानराननवरतमाह अथ यावदसौ न कथंचिद्व्यलपन्विरमति तावदेकेन वानरेण व्यर्थश्रमत्वा
त् कुपितेन पक्षाभ्यां गृहीत्वा शिलायामास्फालितः उपरतश्च अतोऽहं ब्रवीमि नानाम्यं नमते दारु इत्यादि॥ तथा च उपदेशो हि मूर्खाणां
प्रकोपाय न शांतये पयःपानं भुजंगानां केवलं विषवर्धनं॥ उपदेशो न दातव्यो यादृशे तादृशे जने पश्य वानरमूर्खेण सुगृही निर्गृही कृता॥ दमनकः
कथमेतत् सोऽब्रवीत् अस्ति कस्मिंश्चिद्वृक्षोद्देशे लंबमानशाखाकृतावसथे अरण्यचटकदंपती प्रतिवसतः स्म अथ कदा
चित्तयोः सुखसंस्थितयोः हेमंतमेघो मंदं मंदं वर्षितुमारब्धः अत्रांतरे कश्चिच्छाखामृगो वातासारसमाहतः प्रोद्धर्षितशरीरो दंतवीणां वा राम.
दयन्वेपमानः तस्याः शाखामूलमासाद्योपविष्टः अथ तं तादृशमवलोक्य चटिका प्राह भो भद्र हस्तपादसमोपेतो दृश्यसे पुरुषा २६

हसति: शीतेनभिद्यसेमूढ कथंनकुरुषेगृहं एतच्छ्रुत्वावानरःसकोपमाह यसंकल्पोमौनंनअतीनभवसि. अहोधार्ष्ट्यमस्याः कथमामुपहसति.
स्त विमुखि दुष्टचारे रंडेपंडितवादिनि नाशंकसेप्रजल्पंतीनाद्य किंत्वांप्रतिहन्म्यहं अथचाकःकोपोस्याउपरि उक्तंच गंडस्थलेषुमधुवारि
सक्तलोलमत्तभ्रमद्भ्रमरपादतलाहतोपि कोपंनगच्छतिनितांतबलोपिनागस्तुल्येबलेहिबलवान्परिकोपमेति एवंप्रलपंतीमाह पु
नःकिंममोपरिवल्गया. उक्तंच वाच्यंश्रद्धासमेतस्यपृच्छतश्चविशेषतः प्रोक्तंश्रद्धाविहीनस्यअरण्यरुदितोपमं तत्किंबहुनातावत्सकुलायस्थिता
तयातयाभिहितोयावद्भूमीमारुह्यतंकुलायंशतधाभंगमनयत्. अतोहंब्रवीमिउपदेशोनदातव्यइति करटकः त्वंखवशिक्षितोपिन
शिक्षितस्त्वं अथवानतेदोषोस्ति यतःसाधोःशिक्षागुणायसंपद्यतेनासाधोः उक्तंच किंकरोत्येवपांडित्यमस्थानेविनियोजितं अंधकार
प्रच्छन्नेघटेदीपइवाहितः तद्व्यर्थंपांडित्यंत्वमाश्रितः ममवचनमश्रुत्वानात्मनःशांतिमपिनवेत्सि उक्तंच रामोहममृगांनेवत्तिनकुर्षोयाने
पुनःसोद्धिज्ञंविप्रस्यैकमवस्यधेनुहरलोलज्ञां अहोहेहयः धूर्तैश्चालयत्तुयस्यमोहस्यधर्मात्मनोदत्तवान्ग्रामःसेतुरूपोपिनाशमुपेयव
श्चापरित्यज्यते अपिच अर्थात्मनोविनाशंगणयतिनखलःपरव्यसनहृष्टः प्रायःसहस्रनाशेसमरमुखेनृत्यतिकबंधः अहोसाधु
चेदमुच्यते धर्मबुद्धिःकुबुद्धिश्चद्वावेतौविदितौमम पुत्रेणात्यर्थपांडित्यात्पिताधूमेनघातितः दमनकः कथमेतत् सोब्रवीत् अस्तिकस्मिं
श्चिदधिष्ठानेधर्मबुद्धिःपापबुद्धिश्चद्वौमित्रेप्रतिवसतः अथकदाचित्पापबुद्धिनाचिंतितं यावदहंतावन्मूर्खोदारिद्र्योपहतश्च तदेनंधर्मबुद्धिमादा
यदेशांतरंगत्वास्याश्रयेणार्थोपार्जनंकृत्वाएनमपिवंचयित्वासुखीभवामि अथान्यस्मिन्नहनिपापबुद्धिर्धर्मबुद्धिमाह भोमित्रवार्द्ध
क्येकिंत्वमात्मनश्चेष्टितंस्मरिष्यसि देशांतरमदृष्ट्वाकांशिशुजनवार्तांकथयिष्यसि. उक्तंच देशांतरेषुबहुविधभाषावेषादियेननन
ज्ञातं भ्रमताधरणीपीठेतस्यफलंजन्मनोव्यर्थ तथाच विद्यांवित्तंशिल्पंतावन्नाप्नोतिमानवःसम्यक् यावद्व्रजतिनभूमौदेशा
द्देशांतरंहृष्टः अथतद्वचनमाकर्ण्यप्रहृष्टमनाआप्तेनैवसहगुरुजनानुज्ञातः शुभेहनिदेशांतरंप्रस्थितः तत्रचधर्मबुद्धिप्रभावेनभ्र

मतापापबुद्धिनाप्यनंतरं वित्तमासादितं तच्चापि पितोऽप्यन्तोपार्जितमविनीतोऽत्र हष्टोऽस्य गृहं प्रत्येकैकवयेन प्रस्थितो उक्तं च आत्मविद्यार्थशिल्पानां दे
शांतरनिवासिनां कोपमात्रेपि भूभागः वातयोजनवद्भवेत् अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः भद्र न सर्वमेतद्वि
त्तं गृहं प्रति नेतुं युज्यते यतः कुटुंबिनो बांधवाश्च प्रार्थयिष्यंति तदत्रैव वनगहने क्वापि भूमौ निःक्षिप्य किंचिन्मात्रमादाय गृहं प्रविशावः
भूयोपि प्रयोजने संजाते तन्मात्रं समेत्यास्मात्स्थानान्नेष्यावः उक्तं च न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो मुनेरपि यतस्तस्य दर्शना
च्चलते मनः तथा च यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् तदाकर्ण्य धर्मबुद्धिराह भद्र एवं
क्रियतां तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेनास्थितवंतौ अन्यदा च पापबुद्धिना निशीथे तत्रागत्य सर्वं वित्तमादाय गर्त्तां पूरयित्वा स्वभव
नं जगाम अथान्येद्युः धर्मबुद्धिं समेत्य प्रोवाच सखे बहुकुटुंबा वयं वित्ताभावात्सीदामः तद्गत्वा तत्स्थानात् किंचिन्मात्रमानयावः सोऽब्र
वीत् भद्र एवं क्रियतामिति अथ द्वावपि गत्वा यावत्स्थानं खनतस्तावद्रिक्तं भांडं दृष्टवंतौ अत्रांतरे पापबुद्धिः हा हतोऽस्मि इति शिरस्ताड
यन्प्रोवाच भो धर्मबुद्धे त्वया हृतमेतद्धनं नान्येन यतो भूयोपि गर्त्तापूरणं कृतं तत्प्रयच्छ मे तस्यार्धं अथवाहं राजकुले निवेदयिष्यामि स प्रा
ह भो दुरात्मन्मा मैवं वद धर्मबुद्धिः खल्वहं नैतच्चौरकर्म करोमि उक्तं च मातृवत्परदाराणि परद्रव्याणि लोष्टवत् आत्मवत्सर्वभूतानि
यः पश्यति स पंडितः एवं तौ द्वावपि विवदमानौ धर्माधिकारिणं गतवंतौ प्रोचतुः परस्परं दूषयंतौ अथ धर्माधिकाराधिष्ठितपुरुषैर्दि
व्यार्थं यावन्नियोजितौ तावत्पापबुद्धिराह अहो न सम्यग्दृष्टो न्यायः उक्तं च विवादेऽन्विष्यते पत्रं तदभावे तु साक्षिणः साक्ष्यभावात्त
तो दिव्यं प्रवदंति मनीषिणः अत्र विषये मम वृक्षदेवताः साक्षिभूताः संति ता आवयोरेकतमं चौरं साधुं वा करिष्यंति अथ तैः सर्वै रुक्तं
रभिहितं भो युक्तमुक्तं भवता उक्तं च अंत्यजोपि यदा साक्षी विवादे संप्रजायते न तत्र विद्यते दिव्यं किं पुनर्यत्र देवताः तदस्माकमप्यत्र विष
ये महत्कौतूहलं वर्तते तत्प्रत्यूषसमये युष्माभ्यामस्माभिः सह तत्र वनोद्देशे गंतव्यमिति अथ पापबुद्धिः स्वगृहं गत्वा स्वजनकमुवाच ता ३९

तत्र स्थितोऽहं मयार्थो धर्मबुद्धिश्चोरितः स च तव वचनेन परित्यक्तुं यास्यति अन्यथा मम प्राणैः सह यास्यति स आह वत्स द्रुतं वद येन प्रोऽपतद्धनं स्थिर
तां नयामि पापबुद्धिः तात अस्ति तत्प्रदेशे महती शमी तस्यां महत्कोटरमस्ति तत्र त्वं सांप्रतमेव प्रविश ततः प्रभाते यदाहं सत्यश्रावणं करोमि तदा
त्वया वाच्यं यत् धर्मबुद्धिश्चौर इति तथानुष्ठिते प्रत्यूषे पापबुद्धिः स्नात्वा धर्मबुद्धिपुरःसरो राजपुत्रैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच
आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च अहश्च रात्रिश्च उभे च संध्ये धर्मोऽपि जानाति नरस्य वृत्तं तत्कथय वनदेवताः आव
योर्यश्चौर इति अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच भो धर्मबुद्धिना हृतमेतद्धनं तदाकर्ण्य सर्वे राजपुरुषा विस्मयोत्फुल्ललोचना यावत्
धर्मबुद्धेर्नियहं वित्तहरणोचितं शास्त्रदृष्ट्या अवलोकयन्ति तावद्धर्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवार्य वह्निना संदीपितं
अथ ज्वलति तस्मिन् शमीकोटरे अर्धदग्धशरीरः स्फुटितेक्षणः करुणं परिदेवयन् पापबुद्धिपिता निश्चक्राम ततस्तैः सर्वैः पृष्टः सन् सर्वं पाप
बुद्धिचेष्टितं तेषां निवेदयामास उपरतश्च अथ ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रविलंब्य धर्मबुद्धिं प्रशस्य इदमूचुः अहो साधु
साध्विदमुच्यते उपायं चिन्तयेत्प्राज्ञस्तथापायं च चिन्तयेत् पश्यतो बककर्मस्य नकुलेन हता बकाः दमनक आह कथमेतत् सोऽब्रवीत्
अस्ति कस्मिंश्चिद्वनोद्देशे बहुबकसनाथो वटपादपः तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म स च बकबालकानजातपक्षानपि सदैव
भक्षयन् कालं नयतीति अथैको बको भक्षितानि शिशूनि दृष्ट्वा वैराग्यात् सरस्तीरमासाद्य बाष्पपूरप्लुतलोचनो अधोमुखस्तिष्ठति तं च
तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच माम किमेवं रुद्यते भवताद्य स आह भद्र किं करोमि मम दुर्भाग्यस्य मम बालकाः को
टरनिवासिना सर्पेण भक्षिताः तद्दुःखदुःखितोऽहं रोदिमि तत्कथय मे यद्यस्ति कश्चिदुपायस्तद्विनाशाय तदाकर्ण्य कुलीरकश्चिं
तयामास तावदस्य सहजवैरी तत्तथोपदेशं प्रयच्छामि यथान्येऽपि बकाः सर्वे संक्षयमायान्ति उक्तं च नवनीत
समां वाणीं कृत्वा चित्तं सुनिर्दयं तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा आह च माम यद्येवं तन्मत्स्यमांसखण्डानि

पंचतंत्र १ त्रिनकुलस्यसर्पकोटरं यावत्प्रदर्शयति तथानुकूल सन्मार्गेणागत्य तं दृष्ट्वा सर्पं विनाशयिष्यति अथ तथानुष्ठिते मत्स्यमांसखंडानुसारेण नकुलेन

३८ नं कुलसर्पं निहत्य तेपि वकाः भक्षिताः सर्वे वकाश्च शनैः २ भक्षिताः अतोहं ब्रवीमि उपायं चिंतयेत् प्राज्ञः तदनेन पापबुद्धिना उपायश्चिंतितो नापा

यस्तस्य न फलं एवं हृदयं पापबुद्धिना पापबुद्धिना पापबुद्धिरिति ते नापायः पापबुद्धिर्यत् तन्मे वाचितं त्वया केवलं पापबुद्धिरसि ततो मया स्वामिनः

प्राणसंदेहं नयता ततः पापबुद्धिना तत्र या स्वधर्मेणात्मनो दुष्टत्वं कौटिल्यं च अथवा साध्विदमुच्यते यत्नादपि कः पश्यति शिखिनामाहारनिःसर

तंत्र ५ णमार्गं यदि जलदध्वनिमुदितास्त एव मूढा नन्त्यन्तु यदि त्वं स्वामिनं मनोदशानयसि तदस्माद्विधस्य का गणना तस्मान्मम संनिधानेन न भो

प० ३ तावत् तुलां लोहसहस्रस्य यत्र खादंति मूषकाः राजंस्तत्र हरेच्छ्येनो बालकं नात्र विस्मयः दमनकः कथमेतत् सचाह अस्ति क

स्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः सच विभवक्षयाद्देशांतरगमनमना व्यचिंतयत् यत्र देशे यथा स्थाने भोगा भुक्ताः स्ववीर्य

तः तस्मिन् विभवहीनो यो वसेत्स पुरुषाधमः तथाच येनाहंकारयुक्तेन चिरं विलसितं पुरा दीनं वदति तत्रैव यः परेषां स निंदितः तस्य

च गृहे लोहभारघटिता पूर्वपुरुषोपार्जिता तुलासीत् तां च कस्यचिच्छ्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशांतरं प्रस्थितः ततः सुचिरं का

लं देशांतरं भ्रांत्वा पुनस्तदेव स्वपुरमागत्य तं श्रेष्ठिनमुवाच भोः श्रेष्ठिन् दीयतां मे सा निक्षेपतुला सप्राह भो नास्ति त्वदीया तुला सा

मूषकैर्भक्षिता जीर्णधनः भोः श्रेष्ठिन्नास्ति ते दोषो यदि सा मूषकैर्भक्षिता इति ईदृगेव संसारः न किंचिदत्र शाश्वतमस्ति परमहं नद्यां

स्नानार्थं गमिष्यामि तत्त्वमात्मीयं शिशुं धनदेवनाम्ना मया सह स्नानोपकरणहस्तं प्रेषयेति सोपि चौर्यभयात्त्वं शंकितः स्वपुत्रमुवाच वत्सपि राम:

तृव्योयं तव पितृव्यः स्नानार्थं नद्यां यास्यति तद्गम्यतामनेन सार्द्धं स्नानोपकरणमादायेति अहो साध्विदमुच्यते न भक्त्या कस्यचित्कोपि ३८

प्रियं प्रकुरुते नरः मुक्त्वा भयं प्रलोभं वा कार्यकारणमेव वा तथाच अत्यादरो भवेद्यत्र कार्यकारणवर्जितः तत्र शंका प्रक

तेष्यापरिणामेस्मृत्वावहा अथासौवणिक्पुत्रः स्नानोपकरणमादायप्रहृष्टमनाअभ्यागतेनसहप्रस्थितः तथानुष्ठितेवणिक्स्नातोवालिकयु
त्रंनदीतहायांप्रक्षिप्यतद्वारंबृहच्छिलयाप्रछाद्यसत्वरंगृहमागतः पृष्टश्चतेनवणिजा भोअभ्यागततत्कथ्यतां२ कुत्रमेशिशुर्यस्त्वया
सहनदींगतइति॰ सआह॰ नदीतटात्श्येनेनहृतइति॰ श्रेष्ठीमिथ्यावादिन्किंक्वचित्श्येनोवालंहर्तुंशक्नोतितत्समर्पयमेसुतं अन्यथा
राजकुलेनिवेदयिष्यामीति॰ सआह भोसत्यवादिन्यथाश्येनोवालंननयतितथामूषका अपिलोहभारघटितांतुलांनभक्षयंतितदर्पयमे
तुलांयदितेदारकेनप्रयोजनं एवंविवदमानौद्वावपिराजकुलंगतौतत्रवणिक्श्रेष्ठीतारस्वरेणप्रोवाच भोअब्रह्मण्यमब्रह्मण्यं ममशिशुर
नेनचौरेणापहृतः अथधर्माधिकारिणस्तमूचुः भोसमर्प्यतांश्रेष्ठिसुतः सआह किंकरोमिपश्यतोमेनदीतटाच्छ्येनेनापहृतःशिशुः
तच्छ्रुत्वातेप्रोचुः भोसत्यंनाभिहितंभवताकिंश्येनःशिशुंहर्तुंसमर्थोभवति सआह भोश्रूयतांमद्वचः तुलांलोहसहस्रस्ययत्र
खादंतिमूषकाः राजन्तत्रहरेत्श्येनोवालकंनात्रविस्मयः तेप्रोचुः कथमेतत् ततःश्रेष्ठीआदितःसर्ववृत्तांतंसभ्यानांनिवेद
यामास ततस्तैर्विहस्यद्वावपितौपरस्परंसंबोध्यतुलाशिशुप्रदानेनसंतोषितौ अतोहंब्रवीमितुलांलोहसहस्रस्येति॰
तन्मूर्खसंजीवकप्रसादमसहमानेनत्वयाएतत्कृतम् अहोसाध्विदमुच्यते प्रायेणात्रकुलान्वितानकुलजाः स्त्रीवल्लभंदुर्भगा
दातारंकृपणाऋजूननृजवोवित्तान्वितंनिर्धनाः वैरूप्यापहताश्चकांतवपुषंधर्माश्रयंपापिनोनानाशास्त्रविचक्षणंचपुरु
षंनिंदंतिमूर्खानराः तथाच मूर्खाणांपंडिताद्वेष्यानिर्धनानांमहाधनाः व्रतिनःपापशीलानामसतीनांकुलस्त्रियः ए
वंसंवदतोस्तयोःसंजीवकःक्षणमेकंपिंगलकेनसहयुद्धंकृत्वातस्यखरतरनखप्रहाराभिहतोगतासुर्वसुंधरापृष्टे
निपपात अथतंगतासुमालोक्यपिंगलकस्तद्गुणस्मरणार्द्रहृदयःप्रोवाच भोअयुक्तंकृतंमयापापेनसंजीवकंव्या

पंचतंत्रे १ पादपतात् यतोविश्वासघातादन्यंनास्तिपापतरंकर्म उक्तंच यः ह्लः सदेत्पः आत्मश्रीर्नैतरकाहितिश्चयम् । विषदक्तोपिसंवत्सरक्षयेद्दे
३६ तमसाधितम् तथामय्यामनामधेयस्सदेवप्रशंशितः तातिंकथयिष्यामितेषामग्रतः उक्तंच उक्तोभर्त्तीतियः पूर्वंगुणवानितिसंसदि नत
स्यदोषोवक्तव्यः प्रतिज्ञाभंगभीरुणा एवंविधंप्रलपंतंदमनकः समुपगम्यसलज्जमाह देवकालमत्तवेषक्त्यायेः यद्द्रोहकारिणंराज्ञे
अहत्वेस्थंवोवासितन्नेतदुपपन्नंभूभुजां उक्तंच पितावायदिवाभ्राता पुत्रोभार्याथवासुहृत् प्राणद्रोहंयदागच्छेद्धंतव्योनास्ति
पातकम् तथाच राजाघृणी ब्राह्मणः सर्वभक्षः स्त्रीचावपादुष्टबुद्धिः सहायः प्रेष्यःप्रतीपः स्वाधिकारप्रमादीसर्वेत्याज्याः
हत्यंनवेत्ति अपिच सत्यानृताच परुषाप्रियवादिनी चहिंस्रादयालुरपिवार्थपरावदान्या नित्यव्ययाप्रचुररत्नसमागमाच
वेश्यांगनेवनृपनीतिरनेकरूपा एवंतेनसंबोधितः अपिच अकालेताडितः कश्चिदकालेनापिनदृश्यते एवंयातिनरनागान्तता
...नामधातिनम् तथाच अप्रसादाच्चशोचनीयस्तदाश्वभाषसे गताः मृतगताःस्वनानुशोचंतिपंडिताः पिंगलकः सं
जीवकस्य...योकेल्पत्वाद्दमनकसचिवःसन्राज्यमकरोत् दमनकोपिनिःकंटकंतदामैत्रीपदवीसुखमनुभूयकरटकेन
सहराजप्रसादमाससाद ॥ इतिश्रीविष्णुशर्मविरचितेपंचतंत्रोपाख्यानेमित्रभेदोनामप्रथमंतंत्रम् समाप्तंवे श्रीराम
दमित्रभेदनामप्रथमतंत्रम् श्रीः श्रीः ॥ शाके १७५० श्रावणकृष्णनवम्यांशनौलिखितंलिखायितंचदेव ३६
कीनंदनपंतेन शुभमस्तु श्रीकृष्णार्पणमस्तु श्रीकृष्णायनमः अनेनलिखनकर्मणाप्रीनगवान्यदुनंदन
च श्रीराम शुभंभवतु श्रीरामचंद्रजानकीपतयेनमः श्रीकृष्णायगोपीवल्लभायनंदनंदनायनमः श्रीशिवः

ए॰ तं॰ २ नतस्यात्माकृतं प्रियः आत्मनाहि कृतं पापमात्मनैव हि भुज्यते सोहं पापमतिश्चैव पापकर्मरतः सदा पतिष्याम्यहं महाघोरे नरके नात्र
संशयः नूनं मम नृशंसस्य प्रत्यादर्शः कृतः शुभः प्रयच्छता स्वमांसानि कपोतेन महात्मना अद्य प्रभृति देहं स्वं सर्वभोगविवर्जि
१२ तम् तोयं स्वल्पमिव ग्रीष्मे शोषयिष्याम्यहं ततः शीतवातातपसहः कृशाङ्गो मलिनस्तथा उपवासैर्विविधैः सम्यक् चरिष्ये
धर्ममुत्तमं ततो यष्टिं शलाकां च जालकं पञ्जरं तथा बभञ्ज लुब्धको दीनां कपोतीं च मुमोच ताम् लुब्धकेन ततो मुक्ता दृष्ट्वाग्नौ
पतितं पतिम् कपोती विललापार्ता शोकसन्तप्तमानसा न कार्यमद्य मे नाथ जीवितेन त्वया विना दीनायाः पतिहीनायाः किं
नार्या जीवितप्रयोजनम् मनोदर्पः स्वहङ्कारः कुटुम्बं ज्ञातिबान्धवाः दासभृत्यजनो ह्यासां वैधव्येन प्रणश्यति एवं विलप्य बहुशः
कृपणं भृशदुःखिता पतिव्रता सुसंदीप्तं तमेवाग्निं विवेश सा ततो दिव्याम्बरधरा दिव्याभरणभूषिता भर्तारं सा विमानस्थं
ददर्श च कपोतिका सोऽपि दिव्यतनुर्भूत्वा यथार्थमिदमब्रवीत् अहो मामनुगच्छन्त्या कृतं साधु शुभे त्वया तिस्रः कोट्यो
ऽर्धकोटी च यानि रोमाणि मानवे तावत्कालं वसेत् स्वर्गे भर्तारं यानुगच्छति एवं हर्षाविष्टः स विमानमारोप्य परिष्वज्य
च सुखेन ततस्तौ लुब्धकोऽपि परमां निर्वृतिं कृत्वामरणाभिमुखो महद्वनं विवेश तत्र दावानलं दृष्ट्वा निविष्टो विरताशयः
निर्दग्धकल्मषो भूत्वा दिवं प्राप्य विमोदते अतोऽहं ब्रवीमि श्रूयते वै कपोतेनेति सम्यगीरिता एवं तस्याभिप्रायं ज्ञात्वा राम:
ऽरिमर्दनो दीप्तास्यमाह भद्र तवात्र विषये कोऽभिप्रायः दीप्तास्यः कथयति देव मम सामते दोषावपि न प्रतिभाति य १२
तोऽनसामान्नाशत्रुः सोऽभावमवति नवमेदनं लोभाविष्टो नरो नित्यं वाहतेनैवापद दुग्धं पश्यति मार्जारो यथा तान लकु
डा तिरं तस्मादुपगतोऽनेनाविश्वास्य वध्यः स्यात् शत्रुर्वा ज्ञातिघाताय युक्तिस्तु कामरोपितः सम्यग्नयति हाने

स्याभर्त्ता न तुष्यति तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्वदेवताः दावाग्निनेव वृक्षा निर्दग्धाः सपुष्पस्तबका लता भस्मीभवतु सा नारी यस्य
स्याभर्त्ता न तुष्यति पुनश्चाब्रवीत् श्रृणु नाथ वक्ष्ये त्वं कान्तायत्ते वचः श्रूयतां हितं मम प्राणैरपि त्वया नित्यं संरक्ष्यः शरणागतः
एष शाकुनिकः शेते तव गेहं समाश्रितः क्षुधार्त्तश्च शीतार्त्तश्च तस्मात्पूजां समाचर श्रूयते यः साश्रयमतिथिं प्राप्तं यथाशक्ति
न पूजयेत् तस्यासौ दुःकृतं दत्त्वा सुकृतं चापकर्षति मा चास्मै त्वं कृथा द्वेषं बद्धानेनेति मत्प्रिया स्वकृतैरेव बद्धाहं प्राक्तनैः क
र्मबंधनैः यतः दारिद्र्यशोकदुःखानि बंधनव्यसनानि च आत्मापराधवृक्षस्य फलान्येतानि देहिनाम् तस्मात्त्वं द्वेषमुत्सृज्य
मद्बंधनसमुद्भवम् धर्मे मनः समाधाय जमेनं यथाविधि तत्तस्या हृद्वचनं श्रुत्वा धर्मयुक्तिसमन्वितम् उपगम्य ततो धृ
ष्टः कपोतः प्राह लुब्धकं भद्र सुस्वागतं तेऽस्तु ब्रूहि किं करवाणि ते संतापश्च न कर्त्तव्यः स्वगृहे वर्त्तते भवान् तस्य तद्
वचनं श्रुत्वा प्रत्युवाच विहंगमम् कपोत खलु शीतं मे हिमत्राणं विधीयताम् स गत्वांगारमात्रमानयामास पावकम्
ततः शुष्केषु पर्णेषु तमाशु समदीपयत् सुसंदीप्तं ततः कृत्वा तमुवाच शरणागतम् प्रतापय सुविश्रब्धं स्वगात्राण्यत्र नि
र्भयः न चास्ति विभवः कश्चिद्येन ते नाशये क्षुधाम् सहस्रं भरते कश्चिच्छतमन्यो दशापरः मम त्वकृतपुण्यस्य क्षुद्रस्या
त्मापि दुर्भरः एकस्याप्यतिथेरन्नं यः प्रदातुं न शक्तिमान् तस्यानेकपरिक्लेशे गेहे किं वसतः फलम् तत्तथा साधये
याम्येतच्छरीरं दुःखजीवितं यथा भूयो न वक्ष्यामि नास्तीत्यर्थे समागते स निनिन्द किलात्मानं आत्मना न तु लुब्धकम्
उवाच तर्पयिष्ये त्वां मुहूर्तं प्रतिपालय एवमुक्त्वा स धर्मात्मा प्रहृष्टेनान्तरात्मना तमग्निं संपरिक्रम्य प्रविवेश स्व
वेश्मवत् ततस्तं लुब्धको दृष्ट्वा कृपयाभृशपीडितः कपोतमग्नौ पतितं वाक्यमेतदभाषत यः करोति नरः पाप

४ दमक कृष्णदास । ... ४

ॐ नमः श्रीः अथेदमारभ्यते मित्रसंप्राप्तिर्नाम द्वितीयं तन्त्रं यस्यायमाद्यः श्लोकः असाधना वित्तहीना बुद्धिमन्तो बहुश्रुताः साधयन्त्याशु का
र्याणि काककूर्ममृगाखुवत् राजपुत्राः ऊचुः कथमेतत् विष्णुशर्मा कथयति अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरं तस्यानुना
तिदूरे महोच्छ्रायवाननेकपक्षिकोपभुक्तो न्यग्रोधः सर्वाश्रयोऽस्ति उक्तं च छायासुप्तमृगः शकुन्तनिवहैर्विष्वग्विलुप्तच्छदः कीटैरावृतकोट
नि: शांतं ४ रः कपिकुलैः स्कन्धे कृतप्रश्रयः विश्रब्धं मधुपैर्निपीतकुसुमः श्लाघ्यः स एव द्रुमः सर्वाङ्गैर्बहुसत्त्वसङ्घसुखदो भूभारभूतोऽपरः तत्र लघुपत
नको नाम वायसः प्रतिवसति स्म स कदाचित् प्राणयात्रार्थं पुरमुद्दिश्य प्रचलितः तद्विहङ्गमनिवासिनां पक्षिबन्धननिमित्तमायात
कृष्णतनुं स्फुटितचरणमूर्ध्वपिण्डिकमतिपरुषशरीरं स्थूलशिरस्कं रक्तायतनयनं भूमिरनुगम्यमानं बहुभिः श्वभिः जालतण्डुलपाणिकं
बहुभिर्द्वितीयमिव कालं पाशहस्तमन्तकमिव पापस्य हृदयमिवाधर्मस्योपदेष्टारमिव सर्वपातकानां सुहृदमिव वल्लभो दृष्ट्वा व्याधं मा
घट मवश्यं तं व्याधमेकमपश्यत् अथ तं दृष्ट्वा शङ्कितमना व्यचिन्तयत् किमयं पापात्मा किं ममैवार्थे आहोस्विदन्यस्य व्यवसायः स ... दृष्टा
गत्वा कौतुकशतमेव पृष्ठतोऽनुगम्यावस्थितः अथ व्याधोऽपि तं न्यग्रोधमूले जालं वितत्य तण्डुलान् प्रकीर्य प्रच्छन्ने नातिदूरे निभृतः स्थितः अथ गत्वा
विचिन्त्य लक्षणानि निवर्तितनमेव वटपादपं गत्वा सर्वान् विहङ्गमान् प्रोवाच भो गृहीतधनुर्दुरात्मा लुब्धकः समभ्येति तावालेन तण्डुलहस्तो न विश्वसनीयः
एष जालं प्रसार्य तण्डुलान् प्रक्षेप्स्यति ते भवद्भिः कालकूटसदृशा द्रष्टव्याः अथ तत्र ये पक्षिणः स्थितास्ते लघुपतनकवाक्यार्गलया निवारि
तास्तांस्तण्डुलान् हालाहलाङ्कुरानिव पश्यन्तो निभृतास्तस्थुः अत्रान्तरे कपोतशतैः परिवृतश्चित्रग्रीवो नाम कपोतराजः प्राणयात्रार्थं
चित्रग्रीव परिभ्रमंस्तांस्तण्डुलान् दूरतोऽपश्यत् अथ लघुपतनकेन निवार्यमाणोऽपि जिह्वालौल्यात् भक्षणार्थं तत्र महाजाले पतन् सति
पातसमकालमेव सपरिवारः बद्धोऽभूत् अथ वासावस्थितं जिह्वालौल्यात् सकलानां ... अथ वा
नितीं वधोपायो मानानामिव दृश्यते अथवा दैवप्रतिकूलतया भवत्येवं विधाय उक्तं च पौलस्त्यः कथमन्यदारहरणे

... दोषं ५

निकटवर्ति॥

पं० तं० हि० सोऽद्रोहेन विज्ञातवान् रामेणापि वनेन हेमहरिणस्यासंभवो लक्षितः असौ श्वाप्य ... विस्थिरे राज्ञः महात्मा यो ह्यनर्थः के
१ थं ज्ञात्वा सन्नविपत्तिकं मनस्सां प्रायो मतिः क्षीयते तथाच कृतांतपाशबद्धानां दैवेनाविष्टचेतसां बुद्धयः कुब्ज २७
गामिन्यो भवन्ति महतामपि एतान्निवसरे लुब्धकोपि तान्वृक्षान्निधाय प्रहृष्टमनाः कंदडमुपचम्य यथा तथी ...
वितः चित्रग्रीवोपि सानुचरः पाशबंधव्यसनाकुलस्तमायान्तं दृष्ट्वा मृत्युत्पन्नमतितया तान्कपोतानुवाच अहो नमे
तव्यं यतः सर्वेषु व्यसनेष्वेव बुद्धिर्यस्य न हीयते स तेषां पारमभ्येति प्राप्नोति परमं सुखम् तत्सर्वैरपि एकचित्तीभूय संघाते
छेदनीयं नोत्पत्यात्म्याद् जालं गत्वा जालमिदं छेदनीयं अन्यथा संघातं विना न शक्यते जालमपहर्तुं अन्यच्च ... प्राप्य यत
तनवो ह्यपि तन्तवो नित्यं तन्तवो बहुलाः समाः बहून्वकुत्वादायासादनेकस्य मध्यवासतान् असंहतविनाशं ... सुर्भवति दशमस्य
उक्तंच एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः असंहता विनश्यन्ति भारुंडा इव पक्षिणः कपोताः पृच्छंति कथमेतत्
चित्रग्रीवः कथयति इह कस्मिंश्चित्सरसि भारुंडा नाम पक्षिणः प्रतिवसंति स्म तेषामुदरमेकं ग्रीवे द्वे भवतः अथ तेषां
मध्यात्कस्यापि पक्षिणः स्वेच्छया विचरतः एकया ग्रीवया किमप्यमृतफलं प्राप्तं द्वितीयया अभिहितं ममाप्यर्द्धं देहि अ रापः
थ यदा न याचमानया दानं दत्तं तदा द्वितीयया ग्रीवया कोपात्कुतोप्यन्विष्य विषं भक्षितं भक्षिते विषे एकोदरत्वान्मृत्युरभवत्
अतोऽहं ब्रवीमि एकोदराः पृथग्ग्रीवा इति अथ ते ... एवं संघातं ... इति श्रुत्वा ते कपोता जीवि १
तार्थिनः संघातेन जालमपहृत्य ... उड्डीय वियति वितानं ... लुब्धकोऽपि पश्चि

जालमपक्रियमाणं दृष्ट्वा विस्मितमना ऊर्द्धाननो दृष्टपूर्वमित्याकुलचित्त इमं श्लोकमपठत् संहतास्तु हरन्ती
मेममजालं विहंगमाः यदा तु विपतिष्यन्ति वशमेष्यन्ति मे तदा इति विचार्य्य सोऽनुमार्गमारब्धः चित्रग्रीवोऽपि तं कू
रमनुगच्छन्तं दृष्ट्वा तदभिप्रायं ज्ञात्वा नाकुलमनाः गिरितरुविषमभूभागानामुपरिगन्तुमारब्धः लघुपतन
कोऽपि चित्रग्रीवस्य सुनयचरितेन व्याधस्य दुरिताभिप्रायेण च विस्मितमना ऊर्द्धमधश्च मुहुर्मुहुर्निरीक्षमाणश्चाहा
रचिंतामुन्मुच्य कौतुकपरस्तदेव कपोतवृंदमनुगतः चिंतयति किमयं च दुरात्मा करिष्यतीति अथ लुब्धकोऽपि विष
ममार्गव्यवहितं कपोतवृंदं ज्ञात्वा निराशः प्रतिनिवृत्तोऽब्रवीत् नहि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्ने
न करतलगतमपि नश्यति यस्य च भवितव्यता नास्ति किंच पराङ्मुखे विधौ चेत्स्यात् यद्विचस्याद्धनागमः तदसो
न्यदपि संगृह्य याति शंखनिधिर्यथा तदास्तां तावद्विहगामिषलोभः कुटुंबजीवनोपायमूलं जालमपि नष्टं
अत्रांतरे चित्रग्रीवस्तं निवृत्तं प्रत्याशं दृष्ट्वा तान्कपोतानुवाच भो निःशंकं समागम्यतां निवृत्तो दुरात्मा लुब्धकः न
दस्माकं प्रमदारोप्येन गरे गमनं श्रेयः यतस्तत्र प्रागुत्तरदिग्भागे हिरण्यकनामा मूषको मम प्रियसुहृत्
प्रतिवसति स चास्माकं बंधविपाशं करिष्यति समर्थश्चाप भाषाद्विमोक्षयायेति उक्तं च यतः सर्वेषा
मेव मर्त्यानां व्यसने समुपस्थिते वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न संदधे अथ पतत्रयो वाक्यैर्हितैर्हिरण्यकमूषक

मर्त्यानां

पं.तं.द्वि. दिवसवेलि सर्वे तत्र हि लघुमामासाद्य भूमाववतेरुः अथवा अनागतं भयं दृष्ट्वा नीतिशास्त्रविशारदः अवसन्मूषकस्तत्र कृत्वा दुर्गं
२ विलम् उक्तं च दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः तथा च न गजानां सहस्रेण न
लक्षेणापि वाजिनाम् तत्कर्म सिध्यति राज्ञां दुर्गेणैकेन यत्सिध्यति शतमेकोपि संधत्ते प्राकारस्थो धनुर्धरः तस्माद्दुर्गं प्रशंसन्ति नीति
शास्त्रविदो जनाः अथ तेषां निपातभयात् चकितहृदयो हिरण्यकोपि विडालपदन्यासानि मत्वा बिलदुर्गमनुसृत्य स्थितो किमिदानीमिति तावत्
तुमारब्धः चित्रग्रीवोपि बिलद्वारमवस्थितस्तमाह भद्र हिरण्यक सत्वरमेहि पश्य ममेतावस्थां तच्छ्रुत्वा दुर्गान्निर्गत एव
हिरण्यकोऽब्रवीत् भद्र कोऽभवान् किमर्थमायातः कीदृक्ते कार्यं तत्कथ्यतामिति तच्छ्रुत्वापि चित्रग्रीव आह भो चित्रग्रीवो नाम
मकपोतराजस्ते सुहृत् तत्सत्वरमागच्छ गुरुतरं प्रयोजनमस्ति तदाकर्ण्य पुलकिततनुः परिहृष्टात्मा त्वरमाणो निःक्रान्तश्च
ब्रवीत् सुहृदः स्नेहसंपन्ना लोचनानंददायिनः गृहे गृहवतां नित्यं नागच्छन्ति महात्मनां तथा च भवनीतिर्यथायस्य समा
गच्छन्ति निस्पृहाः विशेषात्तस्य सौख्यं वनाकीर्णस्य तत् अथ चित्रग्रीवं सपरिवारं पाशबद्धं विलोक्य सविषादं हिरण्यको
ब्रवीत् भद्र किमिदं कुतो वा कथयेति सोऽब्रवीत् भद्र जानन्नपि किं मां पृच्छसि उक्तं च यतः यस्माच्च येन च यथा च यदा च य
च्च यावच्च यत्र च शुभाशुभमात्मकर्म तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च विधातृवशादुपैति विशेषतश्चाभक्ष्यकवोल
लात्त्वं जगत्सुहृत् प्राणकाले हृतेऽहरिः यतः पञ्चदशः दूरतोपि च भवेत्तदा सम्बन्धः सम्बन्धसमीहितं सप्तादशयोजनशतादामिषं
प्रेक्षते खगः सोऽपि पार्श्वस्थितं दैवाद्बन्धनं नैव पश्यति अपि च रविनिशाकरयोर्ग्रहपीडनं गजभुजंगमयोरपि बंधनम् म रामः
तिमतां च समीक्ष्य दरिद्रतां विधिरहो बलवानिति मे मतिः किंच व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं २

मरा कः साधुस्त्रोत्रयोः ४

नैनिपुणैरगाधसलिलान्मीनाः समुद्रादपि दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः कालो हि व्यसनप्रसारितभुजो गृह्णाति दूरादपि अथ हिर-
ण्यकश्चित्रग्रीवस्य पाशांश्छेत्तुमारब्धः चित्रग्रीवेणाभिहितं भद्र विरुद्धमेतत् मा तावन्मम पाशाः छिद्यन्तां किंतु मत्परिजनस्य तेहि
कर्तय हिरण्यकः प्रकुपितः प्राह नयुक्तमुक्तं भवता यतः स्वामिनोनंतरं भृत्याः स काह मा मैवं वद अस्मानपि परित्यज्य मामाश्रिता एते सर्वदैव
न४ राकौस्त्वत्कथमेतावन्मात्रमपि संमानं न करोमि उक्तं च यतः यः संमानं सदा धत्ते भृत्यानां क्षितिपोधिकं वित्ताभावेपि ते हृष्टास्तं त्यजंति
नकर्हिचित् तथा च विश्वासः संपदां मूलं तेन यूथपतिर्गजः सिंहो मृगाधिपत्येपि न मृगैरुपसेव्यते अपरं कदाचिन्मम पाशच्छेदे तव दंत-
वेदना भवति अथवा पापात्मा लुब्धकः समभ्याति तदेव च पतनं नरकपातः उक्तं च सदाचारेषु भृत्येषु सीदत्सु यो हि यत्प्रभुः सुखी स्यान्नरकं
याति स परत्रेह सीदति तच्छ्रुत्वा प्रहृष्टो हिरण्यक आह भो वेद्म्यहं सर्वं स्वामिधर्मं परं तव परीक्षा कृता मयैतदभिहितं ततः सर्वेषां पाशच्छेदं
करिष्यामि भवानप्येतैर्बहुपरिवारो भविष्यति उक्तं च यतः कारुण्यं संविभागश्च यस्य भृत्येषु सर्वदा संभाव्यः स महीपालस्त्रैलोक्यस्या-
पि रक्षणे एवमुक्त्वा सर्वेषां पाशच्छेदं कृत्वा हिरण्यकश्चित्रग्रीवं प्राह सखे गच्छाधुना स्वाश्रयं भूयोपि व्यसने प्राप्ते समागंतव्यमिति उक्त्वा
स्वदुर्गं प्रविष्टः चित्रग्रीवोपि सपरिवारः स्वाश्रयं जगाम साधुवदमुच्यते मित्रवान् साधयत्यर्थान् दुःसाध्यानपि वै यतः तस्मान्मित्राणि कुर्वीत स-
मान्येव च आत्मनः लघुपतनकोपि सर्वं चित्रग्रीवस्य बंधनमोक्षं विलोक्य सविस्मयो व्यचिंतयत् अहो हिरण्यकस्य दुर्गसामग्री वतस्मान्म-
मापि एतेन हिरण्यकेन सह प्रीतिकरणं यद्यप्यहं चंचलप्रकृतिरविश्वासपरश्च न वकेनापि बंधयितुं शक्यः तथापि मित्रं कार्यमिति
उक्तं च समर्थेनापि कर्तव्यं मित्रमप्युदयार्थिना उदधिः परिपूर्णोपि चिस्वास्याद्वसमीहते एवं मत्वा पादपादवतीर्य विवरद्वारमा-
श्रित्य सर्वोपि लघुपतनकनामा हिरण्यकमाहूतवान् भद्र हिरण्यक एहि एहि तच्छ्रुत्वा हिरण्यकोप्यचिंतयत् किमन्योपि पाशबद्धः

के.तं.२ पुनः कपोतस्त्रिस्वपिति यो मां व्याहरतीति आह च भोः को भवान् वायस आह अहं लघुपतनको नाम वायसः तदाकर्ण्य हिरण्यको विहस्याह
२ तल्लीनः प्राह भद्र तद्गम्यतामस्मात् स्थानात् स जल्पाह तवोपान्ते गुरुकार्येणागतः तत्किं न त्वया सह दर्शनमिति हिरण्यक आ
ह न मम त्वत्संगमेन कार्यमिति वायस आह भो चित्रग्रीवस्य मोक्षणेन त्वत्प्रकाशात् दृष्ट्वा महती प्रीतिः संजाता तन्ममापि कदाचित् तव पा
र्श्वे बंधमोक्षो भविष्यति तत्क्रियतां मया सह मैत्री हिरण्यक आह भो त्वं आहं भोज्यभूतः का त्वया सह मम मैत्री उक्तं च यो मित्रं कुरु
ते मूढ आत्मनोऽसदृशं कुधीः हीनं वाप्यधिकं वापि हास्यतां यात्यसौ जनः तथा च ययोरेव समं वित्तं ययोरेव समं कुलं तयोर्मैत्री वि
वाहश्च न तु पुष्टविपुष्टयोः तज्जल्पतामिति वायस आह भो स्थाह तवद्वारे उपविष्टो यदि त्वं मैत्रीं न करोषि ततः प्राणत्यागं करि
ष्यामि हिरण्यक आह भोः कथं त्वया सह वैरिणो मैत्रीं करोमि उक्तं च शत्रुणा न हि संदध्यात् सुश्लिष्टेनापि संधिना सुतप्तमपि पानीयं
शमयत्येव पावकं वायस आह भो भवता सह मम दर्शनमपि नास्ति कुतो वैरं तत्किमनुचितं वदसि हिरण्यक आह भो वैरं द्विविधं भवति
सहजं कृत्रिमं च तत्सहजवैरी त्वमस्माकं तत्र कृत्रिमं नाशमायाति धेरं जाकृत्रिमैर्गुणैः प्राणदानं विना नैव सहजं याति संक्षयः
वायस आह भो द्विविधस्यापि वैरस्य लक्षणं श्रोतुमिच्छामि हिरण्यक आह भोः कारणेन निर्वृत्तं कृत्रिमं तदर्होपकारेणापयाति
स्वाभाविकं कथमपि न गच्छति तद्यथा नकुलसर्पाणां शष्पभुक्नखायुधानां जलानलयोर्देवदैत्यानां सारमेयमार्जाराणां सपत्नी
सिंहगजानां लुब्धकहरिणानां काकोलूकानां पंडितमूर्खाणां पतिव्रताकुलटानां सज्जनदुर्जनानामेतेषां नित्यं वै- राम:
रं भवति न च केनापि कस्यचित् व्यापादितस्तथापि प्राणान् तापयन्ति वायस आह अकारणमेतत् श्रूयतां मे वचनं कारणान्मित्रतां
याति कारणाद्याति शत्रुतां तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता तस्मात् ... ... हिरण्यक आह २

त्वयासह कः समागमः श्रूयतां नीतिः सर्वस्वं सकृद्दुष्टं वयो मित्रं दुर्जनः संधातुमिच्छति स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा तथा च गुणवानहं
न मे कश्चिद्वैरयातनां करिष्यति नैतदपि संभाव्यं उक्तं च यतः सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिनेर्मीमांसाकृतमुन्ममाथ
सहसा हस्ती मुनिं जैमिनिम् छंदो ज्ञाननिधिं जघान मकरो वेलातटे पिंगलं अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः वायस
आह अस्त्येतत् तथापि श्रूयतां तात उपकाराद्धि लोकानां निमित्तान्मृगपक्षिणाम् भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात्सताम्
किंच मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति सुजनस्तु कनकघटवद्दुर्भेद्यः सुकरसंधिश्च अपिच इक्षोरग्रात्क्रमशः पर्वणि पर्वणि यथा
रसविशेषः तद्वत्सज्जनमैत्री विपरीतानां च विपरीता तत्सर्वथा साधुरेवाहं अपरं त्वां शपथैर्निर्भयं करोमि हिरण्यक आह न मेस्ति त्वदीयशप
थैः प्रत्ययः उक्तं च यतः शपथैः संहितस्यापि न विश्वासं व्रजेत् श्रूयते शपथं कृत्वा वृत्रः शक्रेण सूदितः तथा च न विश्वासं विना
शत्रुर्देवानामपि सिद्ध्यति विश्वासात्त्रिदशेंद्रेण दितेर्गर्भो विदारितः बृहस्पतेरपि प्राज्ञस्तस्मान्नैवात्र विश्वसेत् इहेच्छेदात्मनो हि वृ
द्धिमायुर्वित्तसुखानि च सूक्ष्मेणापि हि रंध्रेण प्रविश्याभ्यंतरं रिपुः नाशयेच्च शनैः पश्चात्प्लवं सलिलपूरवत् न विश्वसेदविश्वस्ते वि
श्वस्ते नातिविश्वसेत् विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृंतति न वध्यते ह्यविश्वस्तो दुर्बलो बलवत्तरैः विश्वस्तास्त्वाशु वध्यंते बलवंतोपि दुर्ब
लैः सुकृत्यं विष्णुगुप्तस्य मित्राप्तिर्भार्गवस्य च बृहस्पतेरविश्वासो नीतिः संधिस्त्रिधा स्थिता महतोप्यर्थसारस्य यो विश्वासं रिपोर्गतः
भार्यासु च विरक्तासु तदंतं तस्य जीवितम् तच्छ्रुत्वा लघुपतनकोपि निरुत्तरश्चिंतयामास अहो बुद्धिप्रागल्भ्यमस्य नीतिविष
ये अथवा अत एवास्योपरि मैत्रीपक्षपातः आह च सख्यं साप्तपदीनं भोः इत्याहुर्विबुधा जनाः तस्मात्त्वं मित्रतां प्राप्तो वच
नं मम तच्छृणु इदानीं मैत्रीं प्रतिपद्यस्व अन्यथाहमत्रैव स्थाने प्राणत्यागं करिष्यामि उक्तो हिरण्यकोऽचिंतयत् नायं दुष्टबुद्धि

पं.तं.२ वचनादेव ज्ञायते । यतः नाविदग्धः प्रियं ब्रूयान्नाकामी मंडनप्रियः । नास्पृहो नाधिकारी स्यान्नास्फुटवक्ता न वंचकः ॥ तदवश्यमनेन सह मया मैत्री प्रतिपत्तव्या ।
४ एवं मनसा संप्रधार्य वायसमब्रवीत् भद्र त्वयाहं यातोऽहं भवता अपरं मया त्वद्बुद्धिपरीक्षणार्थं एतदभिहितं । अधुना त्वदंके गतं मे शिरः इत्येवमुक्त्वा नि
र्गन्तुमारब्धः पुनरर्धनिर्गतस्थ एवावस्थितः ततो लघुपतनकेनाभिहितं किं मत्तोऽद्यापि भवतः किंचिद्विश्वासकारणं यतो दुर्गान्तर्निर्गतोऽसि हि
रण्यो ब्रवीत् नाहं भवत्कृते शंकितस्तथापि किं न वेत्सि यान्यमित्रपार्श्वात् ... मम विध्वंसस्य विनाशः स्यादिति उक्तं च यतः भीतभीतः पुरः स्थ
कुर्मेदं जंतुं विसर्पति भूमौ सहेलया पश्चाज्जारहस्तो गतामिव । अथ वायसः कुटाराग्रीवान्मित्रभंगेनयं मित्रमुपजायते शालिसंभागिभवनं त्वपा
षाकादिवत्तल्लभेत तेनापि हितोऽसौ त्वरां निर्गत्य सादरं परस्परं समागतौ सुहृत्त्वेन ततो लघुपतनको हिरण्यकमाह प्रविश भवानात्मभवनं आहा
रमन्वेषयाम्यहं वसुकालस्य सकाशादपत्रा तत् किं विहगमहं प्रविश्य ... लब्ध्वा ... सिद्धं दृष्ट्वा तत्र सकाममाहारं कृत्वा ... कृत्स्न
स्नामांसपेशीमादाय हिरण्यान्तिकमेवागतः तं चाहूय वदत् हिरण्यक मिदं मयोपनीतं मांसमिति तस्यापि वटुकृतेन आदाय च
आहृतेन बहवः शालिकणास्तण्डुलानां महान्पुंजः कृतः आह च ... स्वसामर्थ्येनोपनीतान् भक्षयेत् तांस्तण्डुलानिति । ततस्तौ परस्परमुत्कर्षभाव
पि प्रीतिप्रकटनाय भक्षितवन्तौ मैत्रीबीजमेतत् उक्तं च ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति भुंक्ते भोजयते नित्यं षड्विधं प्रीतिलक्षणं ॥
नोपकारं विना प्रीतिः कथंचित्कस्यचिद्भवेत् उपयाचितदानेन यतो देवा अपीप्सिताः तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते वत्सः क्षीरक्ष
यं दृष्ट्वा परित्यजति मातरम् पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकम् यत्प्रसादादपि द्वेषी मित्रतां याति तत्क्षणात् तथा च पुत्रादपि राम.
प्रियतरं भवतीह दानं मन्ये पशोरपि विवेकविवर्जितस्य दत्ते खलेऽपि निखिलं लघु येन लोके दुग्धं ददाति महिषी यादृशानपत्या कि
बहुना प्रीतिनिरंतरां कृत्वा तु भक्षितमानवैमासेवत मूषको वायसश्चैव गतावेकालमित्रताम् । एवं स मूषकस्तदुपराजितमनास्तथावि ४

श्चत्तो यथात त्पद्को ष्ये प्रविष्टः सर्वे तातिष्ठति । अथान्यस्मिन्नहनि वायसोऽश्रुपूरितनयनः समागत्य सगद्गदमुवाच भद्र हिरण्यक मम विरक्तिः सं
जाता अस्य देशस्योपरि अतस्तं त्यक्ष्याम्यन्यत्र हिरण्यक आह भद्र वैराग्यकारणं किं सोऽब्रवीत् भद्र श्रूयतां अस्मिन्देशे महती अनावृष्टिः
संजाता सर्वोपि नगरजनो बुभुक्षया पीडितो बलिमात्रमपि न प्रयच्छति । अपरं गृहे गृहे विहंगबंधार्थं पाशाः प्रगुणीकृताः अस्मदाहारो लोकः संहृतः
अहमपि आयुःशेषतया पाशे न पतितोऽस्मि तेनाहं विदेशं चलितो बाष्पमोक्षणं करोमीति । स आह कोऽतिभारः समर्थानां किं दूरं व्यवसायिनां को विदेशः
सुविद्यानां कः परः प्रियवादिनाम् तथा च विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ततोऽहं देशान्तरं यास्यामी
ति हिरण्यक आह तर्हि क्व यास्यसीति कथय स आह अस्ति दक्षिणापथे वनगहनमध्ये महान्ह्रदः तत्रास्ति त्वत्तोऽप्यधिकः परमसुहृत् मंथरको
नाम कूर्मः स मे लघुमत्स्यमांसशकलानि दास्यति तेन सह सुभाषितगोष्ठीमनुभवन्सुखेन कालं नेष्यामि । यतो नाहमिह पक्षिक्षयं द्रष्टुमि
च्छामि उक्तं च यतः धन्यास्तात न पश्यन्ति देशभंगं कुलक्षयं परहस्तगतां भार्यां मित्रं चापदि संस्थितं हिरण्यक आह यद्येवं तर्हि अहमपि आगमि
स ष्यामि त्वया सह ममापि महद्दुःखमस्ति स आह किं तव हिरण्यक आह भो बहु वक्तव्यमस्ति तत्रैव गतस्तत्सर्वं निवेदयिष्यामि । वायस आह
अहं तावदाकाशगतिः भवान्भूचरः तत्कथं मया सह तत्रागमिष्यसि स आह यदि मत्प्राणान् रक्षसि तदा स्वपृष्ठमारोप्य शनैः शनैर्मां
प्रापय इति । तच्छ्रुत्वा सानंदो वायस आह यद्येवं तद्धन्योऽहं न मत्तः समोऽस्ति यो धन्यतरः तदेवं क्रियतां अहं संपातादिकानष्टौ उड्डय
नानि वेद्मि । ततस्त्वां सुखेन नेष्यामि हिरण्यक आह भो उड्डयननामानि अहं श्रोतुमिच्छामि वायस आह संपातं विप्रपातं च महापातं निपातनं ।
वक्रं तिर्यक् तथा चोर्ध्वमष्टमं लघुसंज्ञकं तदेवं श्रुत्वा हिरण्यकस्तत्क्षणादेवोपरि समारूढः सोऽपि संपातोड्डयनेन प्रस्थितः शनैः शनैः
तेन सह तं ह्रदं प्रचलितः अत्रांतरे मंथरकोऽधिष्ठितं वायसमवलोक्य देशकालविदन्योऽयमिति ज्ञात्वा सत्वरं जले प्रविष्टः
लघुपतनकोऽपि तीरस्थतरुकोटरे हिरण्यकं मुक्त्वा शाखाग्रमारुह्य तारस्वरेणोवाच भो मंथरक अहं वायसश्चिरात्सोत्कं

पं. तं. द्वि. हृदयः समायातस्त्वरागतस्तस्मात्किं मां पिबिति । उक्तं च यतः । किं चंदनैः सकर्पूरैस्तुषारैः किं सुशीतलैः । सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीम् ॥ तद्वृत्त्वानिष्
५ टानर्पारिज्ञायक्लोकिततत्करानंदाश्रुजनयनः संवरसलिलान्निः क्रान्तो मम पापरिज्ञानाभिर्दुर्गतिमपराधः क्षम्यतां उक्तं च यतः मयस्यनष्टापतेर्वीर्य
नकुलनस्यैवहितं नतेन संविद्कुर्यादिस्तुवावहस्पतिः इति श्रुत्वा मंथरकोऽपि सोमालो लघुपतनमालिंगितवान् ह्यवतीद्ववपिवाहतालिंगितोपुल
कितस्स्यारीरो दूराधस्तात्दुपविष्टावालापविरतानंदाश्रुवंतौ परस्परं प्रोचतुः हिरण्यपोपमंथरकोऽप्रणम्यतत्रोपविष्टः अथ तं समालोक्य मंथरको लघुपत
नकं प्राह भोः कोयमपरो वकः कस्माद्भवस्यभूतोयं दृष्टसमारोप्य अत्रसमानीतः तन्नोक्लेयन्त्व्यकारणेन भाव्यमिति तत्श्रुत्वा लघुपतनकः प्राह
हिरण्यको नामायं मूषकोयं मम सुहृद्वितीयमिवजीवितं किं बहुना पर्जन्यस्यमिव धाराधाराधवाः तारकाः भूमेरेणवो यद्वत्संख्ययापरिवर्जिताः
गुणाः संख्यापरित्यक्तास्तद्वदस्य महात्मनः परं निर्वेदमापन्नः संप्राप्तोयं तवांतिके मंथरक प्राह किमस्य वैराग्यस्य कारणं वायस आह दृष्टो
मयात्र तत्रैवपरं वदुवचभूयमेतत् तवेवगतःकथयिष्यामि इत्युक्त्वा मंथरकेनाकथितं भद्र हिरण्यक इदानीं आवयोर्वैराग्यकारणं निवेद
य । हिरण्यकः कथयति अस्ति दाक्षिणात्ये जनपदे प्रमदारोप्यं नाम नगरं तस्य नातिदूरे महेश्वरायतनं तत्र तस्यासन्नमठे परिव्राट् चूडाकर्णो नाम
प्रतिवसति स्म स च भिक्षावलोकितो तस्मान्नगरान्मर्मस्वडुडद्राक्षरभोलिमानोपकरणानां भक्ष्यादिविशेषाणां भिक्षाभाजनं संपूर्णं कृत्वा मठमा
गत्य यथाविधि शालायां दाहल्वा तदुपरि तच्छेषमन्नं भिक्षापात्रे संस्थाप्य प्रातस्तत्कर्मकरविचारकार्थं नागदंतेस्थापयति पश्चात् च पिति प्रत्यू
षे च तदन्नं कर्मकरालाद्दत्वा तत्रैव देवायतने संमार्जनोपलेपनमंडलादिकं समर्पयति अन्यस्मिन्नहनि मम बांधवैर्निवेदितं स्वामिन् मूषका
कर्मोमठे नागदंतावलंबितं सिद्धमन्नं सदैवात्तिष्ठति तत्किं अन्यत्र हृष्टाटनेन अद्य तत्र गत्वा यथेच्छं भुंज्महे आह तत्समपारिजनस्तद्वचनं श्रुत्वा राम
प्रत्यहं जीवामि एवं च कालो वर्त्तते तेन च यत्नमेवस्थापितेनतस्मिन्नयाप्यस्यमाणोसपारः आह निर्वृत्तोमे प्रातिभयात्स्थानाद्यु चेन्नेत्र ५
तिमंक्रमयति तथापि तदहमनादीसैनेवजात्रोमि नमयामि च अथ कदाचिने नमद्भाधर्मनिहानजनेरबंधाः समानीताः तेनम

गवान्स्कन्धोपितद्भिक्षापात्रं हंति अहमपि त्रासादभासितेप्यल्लेप्रहारभयादपसर्पामि एवमेतेन सह मम कालो रात्रौ विग्रहपरस्परस्य कालो व्रजतीति। अथान्य
स्मिन्नहनितद्गृहे तीर्थयात्राप्रसंगेन तन्मित्रं बृहस्पति नामा तापसः प्राघुर्णकः समायातः कृतेकोपितस्य स्वागतादिपूर्वार्हं कृत्वा आश्रममपनीत
वान् ततश्च रात्रौ एकत्र प्रस्तरे द्वावपि प्रसुप्तौ धर्मकथां कर्तुमारब्धौ। अथ चूडाकर्णोपि मूषकत्रासात् जर्जरवंशेन भिक्षापात्रं परि
ताडयन् बृहस्पतेर्धर्मकथां कथयतः शून्यमनाः प्रतिवचनं प्रयच्छति तन्मतो न किंचिदुदाहरति। अथासौ अभ्यागतः परं कोपमुपागतस्तमुवाच भो चूडाकर्ण
परिज्ञातस्त्वं सम्यक् मया न गतसौहृदः तत् तेन मया सह साल्हादं न जल्पसि। तद्रात्रावपि त्वदीयं मठं त्यक्त्वा अन्यत्र यास्यामीति। उक्तं च यतः।
एह्यागच्छ समाविशासनमिदं कस्माच्चिराद्दृश्यसे का वार्ता ननु किमु दुर्बलोसि कुशलं प्रीतोस्मि ते दर्शनात्। एवं ये समुपागतान् प्रणयिनः प्रत्यालपंत्यादरा
त्तेषां युक्तमशंकितेन मनसा हर्म्याणि गंतुं सदा। अन्यच्च। यत्रागतं प्राघुणकं दृष्ट्वा दिशो वीक्षतेवाप्यधः। ये यांति सदने तस्य ते शृंगरहिता वृषाः। नाभ्युत्था
नक्रिया यत्र नालापमधुरा गिरः। गुणदोषकथा नैव तस्य हर्म्ये न गम्यते। तदेकमठप्राप्त्यापि त्वं गर्वितस्त्यक्तस्नेहो नेतद्वेत्सि यन्मठाश्रयव्याजे
न नरकोपार्जना कृता। उक्तं च यतः। नरकाय मतिस्ते चेत् पौरोहित्यं समाचर। वर्षं यावत् किमन्येन मठचिन्तया दिनत्रयम्। तन्मूढ शोचितव्ये यत्त्वं
गर्वं वहसि। अथ तत् श्रुत्वा भयत्रस्तमनाश्चूडाकर्णः प्राह। भो भगवन् मा मैवं वद। नान्यो मम मान्यः सुहृत्त्वोप्यस्ति। ततः श्रूयतां गोष्ठीशैथिल्यका
रणं। एष दुरात्मा मूषकः प्रोन्नतस्थाने स्थितमपि भिक्षापात्रं उत्प्लुत्य आरुह्य भिक्षाशेषं भक्षयति। तदभावे कर्मकरा द्यत्ति विहारं मार्ज
नादि कर्म न कुर्वंति। तन्मूषकत्रासार्थमनेन वंशेन मुहुर्मुहुर्भिक्षापात्रं ताडयामि नान्यत्कारणमिति। अपरमेतत्कौतूहलमेतस्य दुरात्मनो
त यदुत्पतनेन मार्जारमर्कटादयोपि तिरस्कृताः। बृहस्पतिः प्राह। अथ ज्ञायते कस्मिन्प्रदेशे बिलं तस्य। चूडाकर्ण आह। भो भगवन् न
वेद्मि सोब्रवीत् नूनं निधानस्योपरि तस्य बिलं निधानोष्मणा निश्चितं कूर्दति एषः। उक्तं च। ऊष्मापि वित्तजो वृद्धिं तेजो नयति देहिना
न् किं पुनस्तस्य संभोगस्त्यागधर्मसमन्वितः। तथा च। नाकस्मात् शांडिली माता विक्रीणाति तिलैस्तिलान्। लुंचितानितरैर्यस्मा

पं.तं. २ कार्यमत्र भविष्यति ब्राह्मण्याह कथमेतत् सोऽब्रवीत् कदाचिदहं कस्मिंश्चिदधिष्ठाने अन्नग्रहणनिमित्तं कमपि ब्राह्मणं वासार्थं प्रार्थितवान् ततो ब्रा
६ ह्मणेन यालो(?)कृतः तत्राहं देवतार्चनादिपरास्मि ह्यामि अथान्यस्मिन् दिने प्रत्यूषे प्रबुद्धो ब्राह्मण ब्राह्मण्योः संवादं दत्तावधानः शृणोमि ब्राह्मणः प्रा
